2 Parts Rs 4/-

S.C. Upadhyaya
Fergusson College
Poona
1930-31

Works of Shankaracharya.

In Original Sanskrit.

MINOR WORKS.

श्रीशंकराचार्यविरचितग्रंथसंग्रहः ।

प्रकरणग्रंथाः ।

EDITED BY

Hari Raghunath Bhagavat. B. A.

रा. रा. हरि रघुनाथ भागवत

इत्यनेन संशोधिताः ।

Ashtekar & Co. Poona.

1924.

शालिवाहनशकाब्दाः । १८४६

Printed by Mr. L. B. Kokate, at his " Hanuman Press, 300 Sadashiva Peth, Poona City.

AND

Published by Mr. H. R. Bhagavat, at 674 Sadashiva Peth, Poona City.

अनुक्रमणिका ।

भूमिका ।

श्रीमदाचार्याणां ब्रह्मसूत्रभाष्यस्य मत्कृतप्रकाशनादनंतरं पंच वर्षाण्यतीतानि कालस्य । प्रकरणग्रंथानां मुद्रणमारब्धमपि विघ्नबाहुल्यात्परित्यक्तमिवासीन्मया । यद्यप्यधुना मुद्रणाध्वनः पारं न गतोऽहं, तथापि पारं द्रष्टुं समर्थोऽस्मीत्येतदपि भगवत्कृपाप्रसाद एव । किंबहुना ।

संशोधकः प्रकाशकश्च ।

श्रीशंकराचार्यविरचितप्रकरणग्रंथसंग्रहः ।

॥ अपरोक्षानुभूतिः॥

श्रीहरिं परमानंदमुपदेष्टारमीश्वरम् ।
व्यापकं सर्वलोकानां कारणं तं नमाम्यहम् ॥ १ ॥
अपरोक्षानुभूतिर्वै प्रोच्यते मोक्षसिद्धये ।
सद्भिरेषा प्रयत्नेन वीक्षणीया मुहुर्मुहुः ॥ २ ॥
स्ववर्णाश्रमधर्मेण तपसा हरितोषणात् ।
साधनं प्रभवेत्पुंसां वैराग्यादिचतुष्टयम् ॥ ३ ॥
ब्रह्मादिस्थावरान्तेषु वैराग्यं विषयेष्वनु ।
यथैव काकविष्ठायां वैराग्यं तद्धि निर्मलम् ॥ ४ ॥
नित्यमात्मस्वरूपं हि दृश्यं तद्विपरीतगम् ।
एवं यो निश्चयः सम्यग्विवेको वस्तुनः स वै ॥ ५ ॥
सदैव वासनात्यागः शमोऽयमिति शब्दितः ।
निग्रहो बाह्यवृत्तीनां दम इत्यभिधीयते ॥ ६ ॥
विषयेभ्यः परावृत्तिः परमोपरतिर्हि सा ।
सहनं सर्वदुःखानां तितिक्षा सा शुभा मता ॥ ७ ॥
निगमाचार्यवाक्येषु भक्तिः श्रद्धेति विश्रुता ।
चित्तैकाग्र्यं तु सल्लक्ष्ये समाधानमिति स्मृतम् ॥ ८ ॥
संसारबंधनिर्मुक्तिः कथं मे स्यात्कदा विभो ।

इति या सुदृढा बुद्धिर्वक्तव्या सा मुमुक्षुता ॥ ९ ॥
उक्तसाधनयुक्तेन विचारः पुरुषेण हि ।
कर्तव्यो ज्ञानसिद्ध्यर्थमात्मनः शुभमिच्छता ॥ १० ॥
नोत्पद्यते विना ज्ञानं विचारेणान्यसाधनैः ।
यथा पदार्थभानं हि प्रकाशेन विना क्वचित् ॥ ११ ॥
कोऽहं कथमिदं जातं को वा कर्ताऽस्य विद्यते ।
उपादानं किमस्तीह विचारः सोऽयमीदृशः ॥ १२ ॥
नाहं भूतगणो देहो नाहं चाक्षगणस्तथा ।
एतद्विलक्षणः कश्चिद्विचारः सोऽयमीदृशः ॥ १३ ॥
अज्ञानप्रभवं सर्वं ज्ञानेन प्रविलीयते ।
संकल्पो विविधः कर्ता विचारः सोऽयमीदृशः ॥ १४ ॥
एतयोर्यदुपादानमेकं सूक्ष्मं सदव्ययम् ।
यथैव मृद्घटादीनां विचारः सोऽयमीदृशः ॥ १५ ॥
अहमेकोऽपि सूक्ष्मश्च ज्ञाता साक्षी सदव्ययः ।
तदहं नात्र संदेहो विचारः सोऽयमीदृशः ॥ १६ ॥
आत्मा विनिष्कलो ह्येको देहो बहुभिरावृतः ।
तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् ॥ १७ ॥
आत्मा नियामकश्चान्तर्देहो बाह्यो नियामकः ।
तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् ॥ १८ ॥
आत्मा ज्ञानमयः पुण्यो देहो मांसमयोऽशुचिः ।
तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् ॥ १९ ॥
आत्मा प्रकाशकः स्वच्छो देहस्तामस उच्यते ।
तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् ॥ २० ॥
आत्मा नित्यो हि सद्रूपो देहोऽनित्यो ह्यसन्मयः ।
तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् ॥ २१ ॥

आत्मनस्तत्प्रकाशत्वं यत्पदार्थावभासनम् ।
नाग्न्यादिदीप्तिवद्दीप्तिर्भवत्यान्ध्यं यतो निशि ॥ २२ ॥
देहोऽहमित्ययं मूढो मत्वा तिष्ठत्यहो जनः ।
ममायमित्यपि ज्ञात्वा घटद्रष्टेव सर्वदा ॥ २३ ॥
ब्रह्मैवाहं समः शान्तः सच्चिदानंदलक्षणः ।
नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २४ ॥
निर्विकारो निराकारो निरवद्योऽहमव्ययः ।
नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २५ ॥
निरामयो निराभासो निर्विकल्पोऽहमाततः ।
नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २६ ॥
निर्गुणो निष्क्रियो नित्यो नित्यमुक्तोऽहमच्युतः ।
नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २७ ॥
निर्मलो निश्चलोऽनंतः शुद्धोऽहमजरोऽमरः ।
नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २८ ॥
स्वदेहे शोभनं सन्तं पुरुषाख्यं च संमतम् ।
किं मूर्ख शून्यमात्मानं देहातीतं करोषि भो ॥ २९ ॥
स्वात्मानं शृणु मूर्ख त्वं श्रुत्या युक्त्या च पूरुषम् ।
देहातीतं सदाकारं सदुर्दर्शं भवादृशैः ॥ ३० ॥
अहंशब्देन विख्यात एक एव स्थितः परः ।
स्थूलत्वानैकतां प्राप्तः कथं स्याद्देहकः पुमान् ॥ ३१ ॥
अहं द्रष्टृतया सिद्धो देहो दृश्यतया स्थितः ।
ममायमिति निर्देशात्कथं स्याद्देहकः पुमान् ॥ ३२ ॥
अहं विकारहीनस्तु देहो नित्यं विकारवान् ।
इति प्रतीयते साक्षात्कथं स्याद्देहकः पुमान् ॥ ३३ ॥
यस्मात्परमिति श्रुत्यां तया पुरुषलक्षणम् ।

विनिर्णीतं विमूढेन कथं स्याद्देहकः पुमान् ॥ ३४ ॥
सर्वं पुरुष एवेति सूक्ते पुरुषसंज्ञिते ।
अप्युच्यते यतः श्रुत्या कथं स्याद्देहकः पुमान् ॥ ३५ ॥
असंगः पुरुषः प्रोक्तो बृहदारण्यकेऽपि च ।
अनंतमलसंश्लिष्टः कथं स्याद्देहकः पुमान् ॥ ३६ ॥
तत्रैव च समाख्यातः स्वयंज्योतिर्हि पूरुषः ।
जडः परप्रकाश्योऽयं कथं स्याद्देहकः पुमान् ॥ ३७ ॥
प्रोक्तोऽपि कर्मकांडेन ह्यात्मा देहाद्विलक्षणः ।
नित्यश्च तत्फलं भुंक्ते देहपातादनंतरम् ॥ ३८ ॥
लिंगं चानेकसंयुक्तं चलं दृश्यं विकारि च ।
अव्यापकमसद्रूपं तत्कथं स्यात्पुमानयम् ॥ ३९ ॥
एवं देहद्वयादन्य आत्मा पुरुष ईश्वरः ।
सर्वात्मा सर्वरूपश्च सर्वातीतोऽहमव्ययः ॥ ४० ॥
इत्यात्मदेहभावेन प्रपंचस्यैव सत्यता ।
यथोक्ता तर्कशास्त्रेण ततः किं पुरुषार्थता ॥ ४१ ॥
इत्यात्मदेहभेदेन देहात्मत्वं निवारितम् ।
इदानीं देहभेदस्य ह्यसत्त्वं स्फुटमुच्यते ॥ ४२ ॥
चैतन्यस्यैकरूपत्वाद्भेदो युक्तो न कर्हिचित् ।
जीवत्वं च मृषा ज्ञेयं रज्जौ सर्पग्रहो यथा ॥ ४३ ॥
रज्ज्वज्ञानात्क्षणेनैव यद्वद्रज्जुर्हि सर्पिणी ।
भाति तद्वच्चितिः साक्षाद्विश्वाकारेण केवला ॥ ४४ ॥
उपादानं प्रपंचस्य ब्रह्मणोऽन्यन्न विद्यते ।
तस्मात्सर्वप्रपंचोऽयं ब्रह्मैवास्ति न चेतरत् ॥ ४५ ॥
व्याप्यव्यापकता मिथ्या सर्वमात्मेति शासनात् ।
इति ज्ञाते परे तत्त्वे भेदस्यावसरः कुतः ॥ ४६ ॥

श्रुत्या निवारितं नूनं नानात्वं स्वमुखेन हि ।
कथं भासो भवेदन्यः स्थिते चाद्वयकारणे ॥ ४७ ॥
दोषोऽपि विहितः श्रुत्या मृत्योर्मृत्युं स गच्छति ।
इह पश्यति नानात्वं मायया वंचितो नरः ॥ ४८ ॥
ब्रह्मणः सर्वभूतानि जायन्ते परमात्मनः ।
तस्मादेतानि ब्रह्मैव भवन्तीत्यवधारयेत् ॥ ४९ ॥
ब्रह्मैव सर्वनामानि रूपाणि विविधानि च ।
कर्माण्यपि समग्राणि बिभर्तीति श्रुतिर्जगौ ॥ ५० ॥
सुवर्णाज्जायमानस्य सुवर्णत्वं च शाश्वतम् ।
ब्रह्मणो जायमानस्य ब्रह्मत्वं च तथा भवेत् ॥ ५१ ॥
स्वल्पमप्यंतरं कृत्वा जीवात्मपरमात्मनोः ।
योऽवतिष्ठति मूढात्मा भयं तस्याभिभाषितम् ॥ ५२ ॥
यत्राज्ञानाद्भवेद्द्वैतमितरस्तत्र पश्यति ।
आत्मत्वेन यदा सर्वं नेतरस्तत्र चाण्वपि ॥ ५३ ॥
यस्मिन्सर्वाणि भूतानि ह्यात्मत्वेन विजानतः ।
न वै तस्य भवेन्मोहो न च शोकोऽद्वितीयतः ॥ ५४ ॥
अयमात्मा हि ब्रह्मैव सर्वात्मकतया स्थितः ।
इति निर्धारितं श्रुत्या बृहदारण्यसंस्थया ॥ ५५ ॥
अनुभूतोऽप्ययं लोको व्यवहारक्षमोऽपि सन् ।
असद्रूपो यथा स्वप्न उत्तरक्षणबाधतः ॥ ५६ ॥
स्वप्नो जागरणेऽलीकः स्वप्नेऽपि न हि जागरः ।
द्वयमेव लये नास्ति लयोऽपि ह्युभयोर्न च ॥ ५७ ॥
त्रयमेवं भवेन्मिथ्या गुणत्रयविनिर्मितम् ।
अस्य द्रष्टा गुणातीतो नित्यो ह्येकश्चिदात्मकः ॥ ५८ ॥
यद्वन्मृदि घटभ्रान्तिं शुक्तौ वा रजतस्थितिम् ।

तद्वद्ब्रह्मणि जीवत्वं भ्रांत्या पश्यति न स्वतः ॥ ५९ ॥
यथा मृदि घटो नाम कनके कुंडलाभिधा ।
शुक्तौ हि रजतख्यातिर्जीवशब्दस्तथा परे ॥ ६० ॥
यथैव व्योम्नि नीलत्वं यथा नीरं मरुस्थले ।
पुरुषत्वं यथा स्थाणौ तद्वद्विश्वं चिदात्मनि ॥ ६१ ॥
यथैव शून्ये वेतालो गंधर्वाणां पुरं यथा ।
यथाऽऽकाशे द्विचंद्रत्वं तद्वत्सत्ये जगत्स्थितिः ॥ ६२ ॥
यथा तरंगकल्लोलैर्जलमेव स्फुरत्यलम् ।
पात्ररूपेण ताम्रं हि ब्रह्मांडौघैस्तथाऽऽत्मता ॥ ६३ ॥
घटनाम्ना यथा पृथ्वी पटनाम्ना हि तंतवः ।
जगन्नाम्ना चिदाभाति ज्ञेयं तत्तदभावतः ॥ ६४ ॥
सर्वोऽपि व्यवहारस्तु ब्रह्मणा क्रियते जनैः ।
अज्ञानान्न विजानन्ति मृदेव हि घटादिकम् ॥ ६५ ॥
कार्यकारणता नित्यमास्ते घटमृदोर्यथा ।
तथैव श्रुतियुक्तिभ्यां प्रपंचब्रह्मणोरिह ॥ ६६ ॥
गृह्यमाणे घटे यद्वन्मृत्तिका भाति वै बलात् ।
वीक्ष्यमाणे प्रपंचेऽपि ब्रह्मैवाभाति भासुरम् ॥ ६७ ॥
सदैवात्मा विशुद्धोऽपि ह्यशुद्धो भाति वै सदा ।
यथैव द्विविधा रज्जुर्ज्ञानिनोऽज्ञानिनोऽनिशम् ॥ ६८ ॥
यथैव मृन्मयः कुंभस्तद्वद्देहोऽपि चिन्मयः ।
आत्मानात्मविभागोऽयं मुधैव क्रियते बुधैः ॥ ६९ ॥
सर्पत्वेन यथा रज्जू रजतत्वेन शुक्तिका ।
विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता ॥ ७० ॥
घटत्वेन यथा पृथ्वी पटत्वेनैव तंतवः ।
विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता ॥ ७१ ॥

कनकं कुंडलत्वेन तरंगत्वेन वै जलम् ।
विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता ॥ ७२ ॥
चोरत्वेन यथा स्थाणुर्जलत्वेन मरीचिका ।
विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता ॥ ७३ ॥
गृहत्वेनेव काष्ठानि खड्गत्वेनेव लोहता ।
विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता ॥ ७४ ॥
यथा वृक्षविपर्यासो जलाद्भवति कस्यचित् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७५ ॥
पोतेन गच्छतः पुंसः सर्वं भातीव चंचलम् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७६ ॥
पीतत्वं हि यथा शुभ्रे दोषाद्भवति कस्यचित् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७७ ॥
चक्षुर्भ्यां भ्रमशीलाभ्यां सर्वं भाति भ्रमात्मकम् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७८ ॥
अलातं भ्रमणेनैव वर्तुलं भाति सूर्यवत् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७९ ॥
महत्त्वे सर्ववस्तूनामणुत्वं ह्यतिदूरतः ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८० ॥
सूक्ष्मत्वे सर्ववस्तूनां स्थूलत्वं चोपनेत्रतः ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८१ ॥
काचभूमौ जलत्वं वा जलभूमौ हि काचता ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८२ ॥
यद्वदग्नौ मणित्वं हि मणौ वा वह्निता पुमान् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८३ ॥
अभ्रेषु सत्सु धावत्सु सोमो धावति भाति वै ।

तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८४ ॥
यथैव दिग्विपर्यासो मोहाद्भवति कस्यचित् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८५ ॥
यथा शशी जले भाति चंचलत्वेन कस्यचित् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८६ ॥
एवमात्मन्यविद्यातो देहाध्यासो हि जायते ।
स एवात्मा परिज्ञातो लीयते च परात्मनि ॥ ८७ ॥
सर्वमात्मतया ज्ञातं जगत्स्थावरजंगमम् ।
अभावात्सर्वभावानां देहानां चात्मता कुतः ॥ ८८ ॥
आत्मानं सततं जानन् कालं नय महामते ।
प्रारब्धमखिलं भुंजन्नोद्वेगं कर्तुमर्हसि ॥ ८९ ॥
उत्पन्नेऽप्यात्मविज्ञाने प्रारब्धं नैव मुंचति ।
इति यच्छ्रूयते शास्त्रे तन्निराक्रियतेऽधुना ॥ ९० ॥
तत्त्वज्ञानोदयादूर्ध्वं प्रारब्धं नैव विद्यते ।
देहादीनामसत्यत्वाद्यथा स्वप्नो विबोधतः ॥ ९१ ॥
कर्म जन्मान्तरकृतं प्रारब्धमिति कीर्तितम् ।
तत्तु जन्मान्तराभावात्पुंसो नैवास्ति कर्हिचित् ॥ ९२ ॥
स्वप्नदेहो यथाऽध्यस्तस्तथैवायं हि देहकः ।
अध्यस्तस्य कुतो जन्म जन्माभावे हि तत्कुतः ॥ ९३ ॥
उपादानं प्रपंचस्य मृद्भांडस्येव कथ्यते ।
अज्ञानं चैव वेदान्तैस्तस्मिन्नष्टे क्व विश्वता ॥ ९४ ॥
यथा रज्जुं परित्यज्य सर्पं गृह्णाति वै भ्रमात् ।
तद्वत्सत्यमविज्ञाय जगत्पश्यति मूढधीः ॥ ९५ ॥
रज्जुरूपे परिज्ञाते सर्पभ्रांतिर्न तिष्ठति ।
अधिष्ठाने तथा ज्ञाते प्रपंचः शून्यतां व्रजेत् ॥ ९६ ॥

देहस्यापि प्रपंचत्वात्प्रारब्धावस्थितिः कुतः ।
अज्ञानिजनबोधार्थं प्रारब्धं वक्ति वै श्रुतिः ॥ ९७ ॥
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ।
बहुत्वं तन्निषेधार्थं श्रुत्या गीतं च यत्स्फुटम् ॥ ९८ ॥
उच्यतेऽज्ञैर्बलाच्चैतत्तदानर्थद्वयागमः ।
वेदान्तमतहानं च यतो ज्ञानमिति श्रुतिः ॥ ९९ ॥
त्रिपंचांगान्यथो वक्ष्ये पूर्वोक्तस्य हि लब्धये ।
तैश्च सर्वैः सदा कार्यं निदिध्यासनमेव तु ॥ १०० ॥
नित्याभ्यासादृते प्राप्तिर्न भवेत्सच्चिदात्मनः ।
तस्माद्ब्रह्म निदिध्यासेज्जिज्ञासुः श्रेयसे चिरम् ॥ १०१ ॥
यमो हि नियमस्त्यागो मौनं देशश्च कालतः ।
आसनं मूलबंधश्च देहसाम्यं च दृक्स्थितिः ॥ १०२ ॥
प्राणसंयमनं चैव प्रत्याहारश्च धारणा ।
आत्मध्यानं समाधिश्च प्रोक्तान्यंगानि वै क्रमात् ॥ १०३ ॥
सर्वं ब्रह्मेति विज्ञानादिंद्रियग्रामसंयमः ।
यमोऽयमिति संप्रोक्तोऽभ्यसनीयो मुहुर्मुहुः ॥ १०४ ॥
सजातीयप्रवाहश्च विजातीयतिरस्कृतिः ।
नियमो हि परानंदो नियमात्क्रियते बुधैः ॥ १०५ ॥
त्यागः प्रपंचरूपस्य चिदात्मत्वावलोकनात् ।
त्यागो हि महतां पूज्यः सद्यो मोक्षमयो यतः ॥ १०६ ॥
यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
यन्मौनं योगिभिर्गम्यं तद्भजेत्सर्वदा बुधः ॥ १०७ ॥
वाचो यस्मान्निवर्तन्ते तद्वक्तुं केन शक्यते ।
प्रपंचो यदि वक्तव्यः सोऽपि शब्दविवर्जितः ॥ १०८ ॥
इति वा तद्भवेन्मौनं सतां सहजसंज्ञितम् ।

गिरा मौनं तु बालानां प्रयुक्तं ब्रह्मवादिभिः ॥ १०९ ॥
आदावंते च मध्ये च जनो यस्मिन्न विद्यते ।
येनेदं सततं व्याप्तं स देशो विजनः स्मृतः ॥ ११० ॥
कलनात्सर्वभूतानां ब्रह्मादीनां निमेषतः ।
कालशब्देन निर्दिष्टो ह्यखंडानंद अद्वयः ॥ १११ ॥
सुखेनैव भवेद्यस्मिन्नजस्रं ब्रह्मचिंतनम् ।
आसनं तद्विजानीयान्नेतरत्सुखनाशनम् ॥ ११२ ॥
सिद्धं यत्सर्वभूतादि विश्वाधिष्ठानमव्ययम् ।
यस्मिन्सिद्धाः समाविष्टास्तद्वै सिद्धासनं विदुः ॥ ११३ ॥
यन्मूलं सर्वभूतानां यन्मूलं चित्तबंधनम् ।
मूलबंधः सदा सेव्यो योगोऽसौ राजयोगिनाम् ॥ ११४ ॥
अंगानां समतां विद्यात्समे ब्रह्मणि लीयते ।
नो चेन्नैव समानत्वमृजुत्वं शुष्कवृक्षवत् ॥ ११५ ॥
दृष्टिं ज्ञानमयीं कृत्वा पश्येद्ब्रह्ममयं जगत् ।
सा दृष्टिः परमोदारा न नासाग्रावलोकिनी ॥ ११६ ॥
द्रष्टृदर्शनदृश्यानां विरामो यत्र वा भवेत् ।
दृष्टिस्तत्रैव कर्तव्या न नासाग्रावलोकिनी ॥ ११७ ॥
चित्तादिसर्वभावेषु ब्रह्मत्वेनैव भावनात् ।
विरोधः सर्ववृत्तीनां प्राणायामः स उच्यते ॥ ११८ ॥
निषेधनं प्रपंचस्य रेचकाख्यः समीरणः ।
ब्रह्मैवास्मीति या वृत्तिः पूरको वायुरीरितः ॥ ११९ ॥
ततस्तद्वृत्तिनैश्चल्यं कुंभकः प्राणसंयमः ।
अयं चापि प्रबुद्धानामज्ञानां घ्राणपीडनम् ॥ १२० ॥
विषयेष्वात्मतां दृष्ट्वा मनसश्चिति मज्जनम् ।
प्रत्याहारः स विज्ञेयोऽभ्यसनीयो मुमुक्षुभिः ॥ १२१ ॥

यत्र यत्र मनो याति ब्रह्मणस्तत्र दर्शनात् ।
मनसो धारणं चैव धारणा सा परा मता ॥ १२२ ॥
ब्रह्मैवास्मीति सद्वृत्त्या निरालंबतया स्थितिः ।
ध्यानशब्देन विख्याता परमानंददायिनी ॥ १२३ ॥
निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः ।
वृत्तिविस्मरणं सम्यक् समाधिर्ज्ञानसंज्ञकः ॥ १२४ ॥
एवं चाकृतिमानंदं तावत्साधु समभ्यसेत् ।
वश्यो यावत्क्षणात्पुंसः प्रयुक्तः संभवेत्स्वयम् ॥ १२५ ॥
ततः साधननिर्मुक्तः सिद्धो भवति योगिराट् ।
तत्स्वरूपं न चैकस्य विषयो मनसो गिराम् ॥ १२६ ॥
समाधौ क्रियमाणे तु विघ्ना आयान्ति वै बलात् ।
अनुसंधानराहित्यमालस्यं भोगलालसम् ॥ १२७ ॥
लयस्तमश्च विक्षेपो रसास्वादश्च शून्यता ।
एवं यद्विघ्नबाहुल्यं त्याज्यं ब्रह्मविदा शनैः ॥ १२८ ॥
भाववृत्त्या हि भावत्वं शून्यवृत्त्या हि शून्यता ।
पूर्णवृत्त्या हि पूर्णत्वं तथा पूर्णत्वमभ्यसेत् ॥ १२९ ॥
ये हि वृत्तिं जहत्येनां ब्रह्माख्यां पावनीं पराम् ।
वृथैव ते तु जीवन्ति पशुभिश्च समा नराः ॥१३०॥
ये हि वृत्तिं विजानन्ति ये ज्ञात्वा वर्धयन्त्यपि ।
ये वै सत्पुरुषा धन्या वंद्यास्ते भुवनत्रये ॥१३१॥
येषां वृत्तिः समावृद्धा परिपक्वा च सा पुनः ।
ते वै सद्ब्रह्मतां प्राप्ता नेतरे शब्दवादिनः ॥१३२॥
कुशला ब्रह्मवार्तायां वृत्तिहीनाः सुरागिणः ।
ते ह्यज्ञानितमा नूनं पुनरायान्ति यान्ति च ॥१३३॥
निमेषार्धं न तिष्ठन्ति वृत्तिं ब्रह्ममयीं विना ।

यथा तिष्ठन्ति ब्रह्माद्याः सनकाद्याः शुकादयः ॥१३४॥
कार्ये कारणताऽऽयाता कारणे न हि कार्यता ।
कारणत्वं ततो गच्छेत्कार्याभावे विचारतः ॥१३५॥
अथ शुद्धं भवेद्वस्तु यद्वै वाचामगोचरम् ।
द्रष्टव्यं मृद्घटेनैव दृष्टान्तेन पुनः पुनः ॥१३६॥
अनेनैव प्रकारेण वृत्तिर्ब्रह्मात्मिका भवेत् ।
उदेति शुद्धचित्तानां वृत्तिज्ञानं ततः परम् ॥१३७॥
कारणं व्यतिरेकेण पुमानादौ विलोकयेत् ।
अन्वयेन पुनस्तद्धि कार्ये नित्यं प्रपश्यति ॥१३८॥
कार्ये हि कारणं पश्येत्पश्चात्कार्यं विसर्जयेत् ।
कारणत्वं ततो नश्येदवशिष्टं भवेन्मुनिः ॥१३९॥
भावितं तीव्रवेगेन वस्तु यन्निश्चयात्मना ।
पुमांस्तद्धि भवेच्छीघ्रं ज्ञेयं भ्रमरकीटवत् ॥१४०॥
अदृश्यं भावरूपं च सर्वमेतच्चिदात्मकम् ।
सावधानतया नित्यं स्वात्मानं भावयेद्बुधः ॥१४१॥
दृश्यं ह्यदृश्यतां नीत्वा ब्रह्माकारेण चिंतयेत् ।
विद्वान्नित्यसुखे तिष्ठेद्धिया चिद्रसपूर्णया ॥१४२॥
एभिरंगैः समायुक्तो राजयोग उदाहृतः ।
किंचित्पक्वकषायाणां हठयोगेन संयुतः ॥१४३॥
परिपक्वं मनो येषां केवलोऽयं च सिद्धिदः ।
गुरुदैवतभक्तानां सर्वेषां सुलभो जवात् ॥१४४॥

इति अपरोक्षानुभूतिः समाप्ता ॥

———

॥ आत्मबोध ॥

तपोभिः क्षीणपापानां शान्तानां वीतरागिणाम् ।
मुमुक्षूणामपेक्ष्योऽयमात्मबोधो विधीयते ॥१॥
बोधोऽन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनम् ।
पाकस्य वह्निवज्ज्ञानं विना मोक्षो न सिध्यति ॥२॥
अविरोधितया कर्म नाविद्यां विनिवर्तयेत् ।
विद्याऽविद्यां निहन्त्येव तेजस्तिमिरसंघवत् ॥३॥
अविच्छिन्न इवाज्ञानात्तन्नाशे सति केवलः ।
स्वयं प्रकाशते ह्यात्मा मेघापायेंऽशुमानिव ॥४॥
अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्विनिर्मलम् ।
कृत्वा ज्ञानं स्वयं नश्येज्जलं कतकरेणुवत् ॥५॥
संसारः स्वप्नतुल्यो हि रागद्वेषादिसंकुलः ।
स्वकाले सत्यवद्भाति प्रबोधे सत्यसद्भवेत् ॥६॥
तावत्सत्यं जगद्भाति शुक्तिकारजतं यथा ।
यावन्न ज्ञायते ब्रह्म सर्वाधिष्ठानमद्वयम् ॥७॥
उपादानेऽखिलाधारे जगन्ति परमेश्वरे ।
सर्गस्थितिलयान्यान्ति बुद्बुदानीव वारिणि ॥८॥
सच्चिदात्मन्यनुस्यूते नित्ये विष्णौ प्रकल्पिताः ।
व्यक्तयो विविधाः सर्वा हाटके कटकादिवत् ॥९॥
यथाऽकाशो हृषीकेशो नानोपाधिगतो विभुः ।
तद्भेदाद्भिन्नवद्भाति तन्नाशे केवलो भवेत् ॥१०॥
नानोपाधिवशादेव जातिनामाश्रमादयः ॥
आत्मन्यारोपितास्तोये रसवर्णादिभेदवत् ॥ ११ ॥

पंचीकृतमहाभूतसंभवं कर्मसंचितम् ।
शरीरं सुखदुःखानां भोगायतनमुच्यते ॥ १२ ॥
पंचप्राणमनोबुद्धिदशेंद्रियसमन्वितम् ।
अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनम् ॥ १३ ॥
अनाद्यविद्याऽनिर्वाच्या कारणोपाधिरुच्यते ।
उपाधित्रितयादन्यमात्मानमवधारयेत् ॥ १४ ॥
पंचकोशादियोगेन तत्तन्मय इव स्थितः ।
शुद्धात्मा नीलवस्त्रादियोगेन स्फटिको यथा ॥ १५ ॥
वपुस्तुषादिभिः कोशैर्युक्तं युक्त्यवघाततः ।
आत्मानमान्तरं शुद्धं विविंच्यात्तंडुलं यथा ॥ १६ ॥
सदा सर्वगतोऽप्यात्मा न सर्वत्रावभासते ।
बुद्धावेवावभासेत स्वच्छेषु प्रतिबिंबवत् ॥ १७ ॥
देहेंद्रियमनोबुद्धिप्रकृतिभ्यो विलक्षणम् ।
तद्वृत्तिसाक्षिणं विद्यादात्मानं राजवत्सदा ॥ १८ ॥
व्यापृतेष्विंद्रियेष्वात्मा व्यापारीवाविवेकिनाम् ।
दृश्यतेऽभ्रेषु धावत्सु धावन्निव यथा शशी ॥ १९ ॥
आत्मचैतन्यमाश्रित्य देहेंद्रियमनोधियः ।
स्वक्रियार्थेषु वर्तन्ते सूर्यालोकं यथा जनाः ॥ २० ॥
देहेंद्रियगुणान्कर्माण्यमले सच्चिदात्मनि ।
अध्यस्यन्त्यविवेकेन गगने नीलतादिवत् ॥ २१ ॥
अज्ञानान्मानसोपाधेः कर्तृत्वादीनि चात्मनि ।
कल्प्यन्तेऽम्बुगते चंद्रे चलनादि यथांभसः ॥ २२ ॥
रागेच्छासुखदुःखादि बुद्धौ सत्यां प्रवर्तते ।
सुषुप्तौ नास्ति तन्नाशे तस्माद्बुद्धेस्तु नात्मनः ॥ २३ ॥
प्रकाशोऽर्कस्य तोयस्य शैत्यमग्नेर्यथोष्णता ।

स्वभावः सच्चिदानंदनित्यनिर्मलतात्मनः ॥ २४ ॥
आत्मनः सच्चिदंशश्च बुद्धेर्वृत्तिरिति द्वयम् ।
संयोज्य चाविवेकेन जानामीति प्रवर्तते ॥ २५ ॥
आत्मनो विक्रिया नास्ति बुद्धेर्बोधो न जात्वपि ।
जीवः सर्वमलं ज्ञाता कर्ता द्रष्टेति मुह्यति ॥ २६ ॥
रज्जुसर्पवदात्मानं जीवं ज्ञात्वा भयं वहेत् ।
नाहं जीवः परात्मेति ज्ञातश्चेन्निर्भयो भवेत् ॥ २७ ॥
आत्मावभासयत्येको बुद्ध्यादीनींद्रियाणि हि ।
दीपो घटादिवत्स्वात्मा जडैस्तैर्नावभास्यते ॥ २८ ॥
स्वबोधे नान्यबोधेच्छा बोधरूपतयात्मनः ।
न दीपस्यान्यदीपेच्छा यथा स्वात्मप्रकाशने ॥ २९ ॥
निषिध्य निखिलोपाधीन्नेति नेतीति वाक्यतः ।
विद्यादैक्यं महावाक्यैर्जीवात्मपरमात्मनोः ॥ ३० ॥
आविद्यकं शरीरादि दृश्यं बुद्बुदवत्क्षरम् ।
एतद्विलक्षणं विद्यादहं ब्रह्मेति निर्मलम् ॥ ३१ ॥
देहान्यत्वान्न मे जन्मजराकार्श्यलयादयः ।
शब्दादिविषयैः संगो निरिंद्रियतया न च ॥ ३२ ॥
अमनस्त्वान्न मे दुःखरागद्वेषभयादयः ।
अप्राणो ह्यमनाः शुभ्र इत्यादिश्रुतिशासनात् ॥ ३३ ॥
निर्गुणो निष्क्रियो नित्यो निर्विकल्पो निरंजनः ।
निर्विकारो निराकारो नित्यमुक्तोऽस्मि निर्मलः ॥ ३४ ॥
अहमाकाशवत्सर्वं बहिरंतर्गतोऽच्युतः ।
सदा सर्वसमः सिद्धो निःसंगो निर्मलोऽचलः ॥ ३५ ॥
नित्यशुद्धविमुक्तैकमखंडानंदमद्वयम् ।
सत्यं ज्ञानमनंतं यत्परं ब्रह्माहमेव तत् ॥ ३६ ॥

एवं निरंतरकृता ब्रह्मैवास्मीति वासना ।
हरत्यविद्याविक्षेपान्रोगानिव रसायनम् ।। ३७ ।।
विविक्तदेश आसीनो विरागो विजितेंद्रियः ।
भावयेदेकमात्मानं तमनंतमनन्यधीः ।। ३८ ।।
आत्मन्येवाखिलं दृश्यं प्रविलाप्य धिया सुधीः ।
भावयेदेकमात्मानं निर्मलाकाशवत्सदा ।। ३९ ।।
रूपवर्णादिकं सर्वं विहाय परमार्थवित् ।
परिपूर्णचिदानंदस्वरूपेणावतिष्ठते ॥ ४० ॥
ज्ञातृज्ञानज्ञेयभेदः परात्मनि न विद्यते ।
चिदानंदैकरूपत्वाद्दीप्यते स्वयमेव सः ॥ ४१ ॥
एवमात्मारणौ ध्यानमथने सततं कृते ।
उदितावगतिर्ज्वाला सर्वज्ञानेंधनं दहेत् ।। ४२ ।।
अरुणेनेव बोधेन पूर्वं संतमसे हृते ।
तत आविर्भवेदात्मा स्वयमेवांशुमानिव ।। ४३ ।।
आत्मा तु सततं प्राप्तोऽप्यप्राप्तवदविद्यया ।
तन्नाशे प्राप्तवद्भाति स्वकंठाभरणं यथा ।। ४४ ।।
स्थाणौ पुरुषवद्भ्रांत्या कृता ब्रह्मणि जीवता ।
जीवस्य तात्त्विके रूपे तस्मिन्दृष्टे निवर्तते ।। ४५ ।।
तत्त्वस्वरूपानुभवादुत्पन्नं ज्ञानमंजसा ।
अहं ममेति चाज्ञानं बाधते दिग्भ्रमादिवत् ।। ४६ ।।
सम्यग्विज्ञानवान्योगी स्वात्मन्येवाखिलं स्थितम् ।
एकं च सर्वमात्मानमीक्षते ज्ञानचक्षुषा ।। ४७ ।।
आत्मैवेदं जगत्सर्वमात्मनोऽन्यन्न किंचन ।
मृदो यद्वद्घटादीनि स्वात्मानं सर्वमीक्षते ।। ४८ ।।
जीवन्मुक्तस्तु तद्विद्वान्पूर्वोपाधिगुणांस्त्यजेत् ।

स सच्चिदादिधर्मत्वं भेजे भ्रमरकीटवत् ॥ ४९ ॥
तीर्त्वा मोहार्णवं हत्वा रागद्वेषादिराक्षसान् ।
योगी शांतिसमायुक्त आत्मा रामो विराजते ॥ ५० ॥
बाह्यानित्यसुखासक्तिं हित्वात्मसुखनिर्वृतः ।
घटस्थदीपवच्छश्वदंतरेव प्रकाशते ॥ ५१ ॥
उपाधिस्थोऽपि तद्धर्मैरलिप्तो व्योमवन्मुनिः ।
सर्वविन्मूढवत्तिष्ठेदसक्तो वायुवच्चरेत् ॥ ५२ ॥
उपाधिविलयाद्विष्णौ निर्विशेषं विशेन्मुनिः ।
जले जलं वियद्व्योम्नि तेजस्तेजसि वा यथा ॥ ५३ ॥
यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखम् ।
यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत् ॥ ५४ ॥
यद्दृष्ट्वा नापरं दृश्यं यद्भूत्वा न पुनर्भवः ।
यज्ज्ञात्वा नापरं ज्ञेयं तद्ब्रह्मेत्यवधारयेत् ॥ ५५ ॥
तिर्यगूर्ध्वमधः पूर्णं सच्चिदानंदमद्वयम् ।
अनंतं नित्यमेकं यत्तद्ब्रह्मेत्यवधारयेत् ॥ ५६ ॥
अतद्व्यावृत्तिरूपेण वेदान्तैर्लक्ष्यतेऽव्ययम् ।
अखंडानंदमेकं यत्तद्ब्रह्मेत्यवधारयेत् ॥ ५७ ॥
अखंडानंदरूपस्य तस्यानंदलवाश्रिताः ।
ब्रह्माद्यास्तारतम्येन भवंत्यानंदिनोऽखिलाः ॥ ५८ ॥
तद्युक्तमखिलं वस्तु व्यवहारश्चिदन्वितः ।
तस्मात्सर्वगतं ब्रह्म क्षीरे सर्पिरिवाखिले ॥ ५९ ॥
अनण्वस्थूलमह्रस्वमदीर्घमजमव्ययम् ।
अरूपगुणवर्णाख्यं तद्ब्रह्मेत्यवधारयेत् ॥ ६० ॥
यद्भासा भासतेऽर्कादि भास्यैर्यत्तु न भास्यते ।
येन सर्वमिदं भाति तद्ब्रह्मेत्यवधारयेत् ॥ ६१ ॥

स्वयमंतर्वहिर्व्याप्य भासयन्नखिलं जगत् ।
ब्रह्म प्रकाशते वह्निप्रतप्तायसपिंडवत् ॥ ६२ ॥
जगद्विलक्षणं ब्रह्म ब्रह्मणोऽन्यन्न किंचन ।
ब्रह्मान्यद्भाति चेन्मिथ्या यथा मरुमरीचिका ॥ ६३ ॥
दृश्यते श्रूयते यद्यद्ब्रह्मणोऽन्यन्न तद्भवेत् ।
तत्त्वज्ञानाच्च तद्ब्रह्म सच्चिदानंदमद्वयम् ॥ ६४ ॥
सर्वगं सच्चिदानंदं ज्ञानचक्षुर्निरीक्षते ॥
अज्ञानचक्षुर्नेक्षेत भास्वंतं भानुमंधवत् ॥ ६५ ॥
श्रवणादिभिरुद्दीप्तज्ञानाग्निपरितापितः ।
जीवः सर्वमलान्मुक्तः स्वर्णवद्द्योतते स्वयम् ॥ ६६ ॥
हृदाकाशोदितो ह्यात्मा बोधभानुस्तमोपहृत् ।
सर्वव्यापी सर्वधारी भाति भासयतेऽखिलम् ॥ ६७ ॥

दिग्देशकालाद्यनपेक्ष्य सर्वगं
शीतादिहृन्नित्यसुखं निरंजनम् ।
यः स्वात्मतीर्थं भजते विनिष्क्रियः ।
स सर्ववित्सर्वगतोऽमृतो भवेत् ॥ ६८ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीशंकरभगवतः कृतौ आत्मबोधः समाप्तः ॥

॥ तत्त्वोपदेशः ॥

तत्त्वंपदार्थशुद्ध्यर्थं गुरुः शिष्यं वचोऽब्रवीत् ।
वाक्ये तत्त्वमसीत्यत्र त्वंपदार्थं विवेचय ॥ १ ॥
न त्वं देहोऽसि दृश्यत्वादुपजात्यादिमत्त्वतः ।
भौतिकत्वादशुद्धत्वादनित्यत्वात्तथैव च ॥ २ ॥
अदृश्यो रूपहीनस्त्वं जातिहीनोऽप्यभौतिकः ।
शुद्धनित्योऽसि दृग्रूपो घटो यद्वन्न दृग्भवेत् ॥ ३ ॥
न भवानिंद्रियाण्येषां करणत्वेन या श्रुतिः ।
प्रेरकस्त्वं पृथक्तेभ्यो न कर्ता करणं भवेत् ॥ ४ ॥
नानैतान्येकरूपस्त्वं भिन्नस्तेभ्यः कुतः शृणु ।
न चैकेंद्रियरूपस्त्वं सर्वत्राहंप्रतीतितः ॥ ५ ॥
न तेषां समुदायोऽसि तेषामन्यतमस्य च ।
विनाशेऽप्यात्मधीस्तावदस्ति स्यान्नैवमन्यथा ॥ ६ ॥
प्रत्येकमपि तान्यात्मा नैव तत्र नयं शृणु ।
नानास्वामिकदेहोऽयं नश्येद्भिन्नमताश्रयः ॥ ७ ॥
नानात्माभिमतं नैव विरुद्धविषयत्वतः ।
स्वाम्यैक्ये तु व्यवस्था स्यादेकपार्थिवदेशवत् ॥ ८ ॥
न मनस्त्वं न वा प्राणो जडत्वादेव चैतयोः ।
गतमन्यत्र मे चित्तमित्यन्यत्वानुभूतितः ॥ ९ ॥
क्षुत्तृड्भ्यां पीडितः प्राणो ममायं चेति भेदतः ॥
तयोर्द्रष्टा पृथक्ताभ्यां घटद्रष्टा घटाद्यथा ॥ १० ॥
सुप्तौ लीनास्ति या बोधे सर्वं व्याप्नोति देहकम् ॥
चिच्छायया च संबद्धा न सा बुद्धिर्भवान्द्विज ॥ ११ ॥

नानारूपवती बोधे सुप्तौ लीनातिचंचला ॥
यतो दृगेकरूपस्त्वं पृथक्तस्य प्रकाशकः ॥ १२ ॥
सुप्तौ देहाद्यभावेऽपि साक्षी तेषां भवान्यतः ॥
स्वानुभूतिस्वरूपत्वान्नान्यस्तस्याति भासकः ॥ १३ ॥
प्रमाणं बोधयन्तं तं बोधं मानेन ये जनाः ॥
बुभुत्स्यन्ते त एधोभिर्दग्धुं वांछन्ति पावकम् ॥ १४ ॥
विश्वमात्मानुभवाति तेनासौ नानुभूयते ॥
विश्वं प्रकाशयत्यात्मा तेनासौ न प्रकाश्यते ॥ १५ ॥
ईदृशं तादृशं नैतन्न परोक्षं सदेव यत् ॥
तद्ब्रह्म त्वं न देहादिदृश्यरूपोऽसि सर्वदृक् ॥ १६ ॥
इदंत्वेनैव यद्भाति सर्वं तच्च निषिध्यते ॥
अवाच्यतत्त्वमनिदं न वेद्यं स्वप्रकाशतः ॥ १७ ॥
सत्यं ज्ञानमनंतं च ब्रह्मलक्षणमुच्यते ॥
सत्यत्वाज्ज्ञानरूपत्वादनंतत्वात्त्वमेव हि ॥ १८ ॥
सति देहाद्युपाधौ स्याज्जीवस्तस्य नियामकः ॥
ईश्वरः शक्त्युपाधित्वाद्द्वयोर्बाधे स्वयंप्रभः ॥ १९ ॥
अपेक्ष्यतेऽखिलैर्मानैर्न यन्मानमपेक्षते ॥
वेदवाक्यं प्रमाणं तद्ब्रह्मात्मावगतौ मतम् ॥ २० ॥
अतो हि तत्त्वमस्यादिवेदवाक्यं प्रमाणतः ॥
ब्रह्मणोऽस्ति यया युक्त्या सास्माभिः संप्रकीर्त्यते ॥ २१ ॥
शोधिते त्वंपदार्थे हि तत्त्वमस्यादि चिंतितम् ॥
संभवेन्नान्यथा तस्माच्छोधनं कृतमादितः ॥ २२ ॥
देहेंद्रियादिधर्मान्यः स्वात्मन्यारोपयन्मृषा ॥
कर्तृत्वाद्यभिमानी च वाच्यार्थस्त्वंपदस्य सः ॥ २३ ॥
देहेंद्रियादिसाक्षी यस्तेभ्यो भाति विलक्षणः ॥

स्वयं बोधस्वरूपत्वाल्लक्ष्यार्थस्त्वंपदस्य सः ॥ २४ ॥
वेदांतवाक्यसंवेद्यविश्वातीताक्षराद्वयम् ॥
विशुद्धं यत्स्वसंवेद्यं लक्ष्यार्थस्तत्पदस्य सः ॥ २५ ॥
सामानाधिकरण्यं हि पदयोस्तत्त्वयोर्द्वयोः ॥
संबंधस्तेन वेदान्तैर्ब्रह्मैक्यं प्रतिपाद्यते ॥ २६ ॥
भिन्नप्रवृत्तिहेतुत्वे पदयोरेकवस्तुनि ॥
वृत्तित्वं यत्तथैवैक्यं विभक्त्यंतकयोस्तयोः ॥ २७ ॥
सामानाधिकरण्यं तत्संप्रदायिभिरीरितम् ॥
तथा पदार्थयोरेव विशेषणविशेष्यता ॥ २८ ॥
अयं सः सोऽयमितिवत्संबंधो भवति द्वयोः ॥
प्रत्यक्त्वं सद्वितीयत्वं परोक्षत्वं च पूर्णता ॥ २९ ॥
परस्परविरुद्धं स्यात्ततो भवति लक्षणा ॥
लक्ष्यलक्षणसंबंधः पदार्थप्रत्यगात्मनोः ॥ ३० ॥
मानांतरोपरोधाच्च मुख्यार्थस्यापरिग्रहे ॥
मुख्यार्थस्याविनाभूते प्रवृत्तिर्लक्षणोच्यते ॥ ३१ ॥
त्रिविधा लक्षणा ज्ञेया जहत्यजहती तथा ॥
अन्योभयात्मिका ज्ञेया तत्राद्या नैव संभवेत् ॥ ३२ ॥
वाच्यार्थमखिलं त्यक्त्वा वृत्तिः स्याद्या तदन्विते ॥
गंगायां घोष इतिवज्जहती लक्षणा हि सा ॥ ३३ ॥
वाच्यार्थस्यैकदेशस्य प्रकृते त्याग इष्यते ॥
जहती संभवेन्नैव संप्रदायविरोधतः ॥ ३४ ॥
वाच्यार्थमपरित्यज्य वृत्तिरन्यार्थके तु या ॥
कथितेयमजहती शोणोऽयं धावतीतिवत् ॥ ३५ ॥
न संभवति साप्यत्र वाच्यार्थेऽतिविरोधतः ॥
विरोधांशपरित्यागो दृश्यते प्रकृते यतः ॥ ३६ ॥

वाच्यार्थस्यैकदेशं च परित्यज्यैकदेशकम् ॥
या बोधयति सा ज्ञेया तृतीया भागलक्षणा ॥ ३७ ॥
सोऽयं विप्र इदं वाक्यं बोधयत्यादितस्तथा ॥
तत्कालत्वविशिष्टं च तथैतत्कालसंयुतम् ॥ ३८ ॥
अतस्तयोर्विरुद्धं तत्तत्कालत्वादिधर्मकम् ॥
त्यक्त्वा वाक्यं यथा विप्रपिंडं बोधयतीरितम् ॥ ३९ ॥
तथैव प्रकृते तत्त्वमसीत्यत्र श्रुतौ शृणु ॥
प्रत्यक्त्वादीन्परित्यज्य जीवधर्मास्त्वमःपदात् ॥ ४० ॥
सर्वज्ञत्वपरोक्षादीन्परित्यज्य ततःपदात् ॥
शुद्धं कूटस्थमद्वैतं बोधयत्यादरात्परम् ॥ ४१ ॥
तत्त्वमोः पदयोरैक्यमेव तत्त्वमसीत्यलम् ॥
इत्थमैक्यावबोधेन सम्यग्ज्ञानं दृढं नयैः ॥ ४२ ॥
अहं ब्रह्मेति विज्ञानं यस्य शोकं तरत्यसौ ॥
आत्मा प्रकाशमानोऽपि महावाक्यैस्तथैकता ॥ ४३ ॥
तत्त्वमोर्बोध्यतेऽथापि पौर्वापर्यानुसारतः ॥
तथापि शक्यते नैव श्रीगुरोः करुणां विना ॥ ४४ ॥
अपरोक्षयितुं लोके मूढैः पंडितमानिभिः ॥
अंतःकरणसंशुद्धौ स्वयं ज्ञानं प्रकाशते ॥ ४५ ॥
वेदवाक्यैरतः किं स्याद्गुरुणेति न सांप्रतम् ॥
आचार्यवान्पुरुषो हि वेदेत्येवं श्रुतिर्जगौ ॥ ४६ ॥
अनादाविह संसारे बोधको गुरुरेव हि ॥
अतो ब्रह्मात्मवस्त्वैक्यं ज्ञात्वा दृश्यमसत्तया ॥ ४७ ॥
अद्वैते ब्रह्मणि स्थेयं प्रत्यग्ब्रह्मात्मना सदा ॥
तत्प्रत्यक्षात्परिज्ञातमद्वैतब्रह्मचिद्घनम् ॥ ४८ ॥
प्रतिपाद्यं तदेवात्र वेदांतैर्न द्वयं जडम् ॥

सुखरूपं चिदद्वैतं दुःखरूपमसज्जडम् ॥ ४९ ॥
वेदांतैस्तद्द्वयं सम्यङ् निर्णीतं वस्तुतो नयात् ।
अद्वैतमेव सत्यं त्वं विद्धि द्वैतमसत्सदा ॥५०॥
शुद्धे कथमशुद्धः स्याद्दृश्यं मायामयं ततः ।
शुक्तौ रूप्यं मृषा यद्वत्तथा विश्वं परात्मनि ॥५१॥
विद्यते न स्वतः सत्त्वं नासतः सत्त्वमस्ति वा ।
बाध्यत्वान्नैव सद्द्वैतं नासत्प्रत्यक्षभानतः ॥५२॥
सदसन्न विरुद्धत्वादतोऽनिर्वाच्यमेव तत् ।
यः पूर्वमेक एवासीत्सृष्ट्वा पश्चादिदं जगत् ॥५३॥
प्रविष्टो जीवरूपेण स एवात्मा भवान्परः ।
सच्चिदानंद एव त्वं विस्मृत्यात्मतया परम् ॥५४॥
जीवभावमनुप्राप्तः स एवात्मासि बोधतः ।
अद्वयानंदचिन्मात्रः शुद्धः साम्राज्यमागतः ॥५५॥
कर्तृत्वादीनि यान्यासंस्त्वयि ब्रह्माद्वये परे ।
तानीदानीं विचार्य त्वं किंस्वरूपाणि वस्तुतः ॥५६॥
अत्रैव शृणु वृत्तांतमपूर्वं श्रुतिभाषितम् ।
कश्चिद्गांधारदेशीयो महारत्नविभूषितः ॥५७॥
स्वगृहे स्वांगणे सुप्तः प्रमत्तः सन्कदाचन ।
रात्रौ चौरः समागत्य भूषणानां प्रलोभितः ॥५८॥
बद्ध्वा देशांतरं चौरैर्नीतः सन्गहने वने ।
भूषणान्यपहृत्यापि बद्धाक्षकरपादकः ॥५९॥
निक्षिप्तो विपिनेऽतीव कुशकंटकवृश्चिकैः ।
व्यालव्याघ्रादिभिश्चैव संकुले तरुसंकटे ॥६०॥
व्यालादिदुष्टसत्त्वेभ्यो महारण्ये भयातुरः ।
शिलाकंटकदर्भाद्यैर्देहस्य प्रतिकूलकैः ॥६१॥

क्रियमाणे विलुठने विशीर्णांगोऽसमर्थकः ।
क्षुत्तृड्डातपवाय्वग्न्यादिभिस्तप्तोऽतितापकैः ॥६२॥
बंधमुक्तौ तथा देशप्राप्तावेव सुदुःखधीः ।
ईदृशे कांचिदाक्रोशनैकं तत्रैव तस्थिवान् ॥६३॥
तथा रागादिभिर्वर्गैः शत्रुभिर्दुःखदायिभिः ।
चौरैर्देहाभिमानाद्यैः स्वानंदधनहारिभिः ॥६४॥
ब्रह्मानंदे प्रमत्तः स्वाज्ञाननिद्रावशीकृतः ।
बद्धस्त्वं बंधनैर्भोगतृष्णाज्वरादिभिर्दृढम् ॥६५॥
अद्वयानंदरूपात्त्वां प्रच्याव्यातीव धूर्तकैः ।
दूरनीतोऽसि देहेषु संसारारण्यभूमिषु ॥६६॥
सर्वदुःखनिदानेषु शरीरादित्रयेषु च ।
नानायोनिषु कर्मांधवासनानिर्मितासु च ॥६७॥
प्रवेशितोऽसि सृष्टोऽसि बद्धः स्वानंददृष्टितः ।
अनादिकालमारभ्य दुःखं चानुभवन्सदा ॥६८॥
जन्ममृत्युजरादोषनरकादिपरंपराम् ॥
निरंतरं विषण्णोऽनुभवन्नत्यंतशोकवान् ॥६९॥
अविद्याभूतबंधस्य निवृत्तौ दुःखदस्य च ।
स्वरूपानंदसंप्राप्तौ सत्योपायं न लब्धवान् ॥ ७० ॥
यथा गांधारदेशीयश्चिरं दैवाद्दयालुभिः ।
कैश्चित्पांथैः परिप्राप्तैर्मुक्तदृष्ट्यादिबंधनः ॥ ७१ ॥
सः स्वस्थैरुपदिष्टश्च पंडितो निश्चितात्मकः ।
ग्रामाद्ग्रामांतरं गच्छेन्मेधावी मार्गतत्परः ॥ ७२ ॥
गत्वा गांधारदेशं सः स्वगृहं प्राप्य पूर्ववत् ।
बांधवैः संपरिष्वक्तः सुखी भूत्वा स्थितोऽभवत् ॥ ७३ ॥
त्वमप्येवमनेकेषु दुःखदायिषु जन्मसु ।

भ्रांतो दैवाच्छुभे मार्गे जातश्रद्धः सुकर्मकृत् ॥ ७४ ॥
वर्णाश्रमाचारपरोऽवाप्तपुण्यमहोदयः ।
ईश्वरानुग्रहाल्लब्धो ब्रह्मविद्गुरुसत्तमः ॥ ७५ ॥
विधिवत्कृतसंन्यासो विवेकादियुतः सुधीः ।
प्राप्तो ब्रह्मोपदेशोऽद्य वैराग्याभ्यासतः परम् ॥ ७६ ॥
पंडितस्तत्र मेधावी युक्त्या वस्तु विचारयन् ।
निदिध्यासनसंपन्नः प्राप्तो हि त्वं परं पदम् ॥ ७७ ॥
अतो ब्रह्मात्मविज्ञानमुपदिष्टं यथाविधि ।
मयाचार्येण ते धीर सम्यक्तत्र प्रयत्नवान् ॥ ७८ ॥
भूत्वा विमुक्तबंधस्त्वं छिन्नद्वैतात्मसंशयः ।
निर्द्वंद्वो निःस्पृहो भूत्वा विचरस्व यथासुखम् ॥ ७९ ॥
वस्तुतो निष्प्रपंचोऽसि नित्यमुक्तः स्वभावतः ।
न ते बंधविमोक्षौ स्तः कल्पितौ तौ यतस्त्वयि ॥ ८० ॥
न विरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ ८१ ॥
श्रुतिसिद्धांतसारोऽयं तथैव त्वं स्वया धिया ।
संविचार्य निदिध्यास्य निजानंदात्मकं परम् ॥ ८२ ॥
साक्षात्कृत्वा परिच्छिन्नाद्वैतब्रह्माक्षरं स्वयम् ।
जीवन्नेव विनिर्मुक्तो विश्रांतः शांतिमाश्रय ॥ ८३ ॥
विचारणीया वेदान्ता वंदनीयो गुरुः सदा ।
गुरूणां वचनं पथ्यं दर्शनं सेवनं नृणाम् ॥ ८४ ॥
गुरुर्ब्रह्म स्वयं साक्षात्सेव्यो वंद्यो मुमुक्षुभिः ।
नोद्वेजनीय एवायं कृतज्ञेन विवेकिना ॥ ८५ ॥
यावदायुस्त्वया वंद्यो वेदांतो गुरुरीश्वरः ।
मनसा कर्मणा वाचा श्रुतिरेवैष निश्चयः ॥ ८६ ॥

भावाद्वैतं सदा कुर्यात्क्रियाद्वैतं न कर्हिचित् ।
अद्वैतं त्रिषु लोकेषु नाद्वैतं गुरुणा सह ॥ ८७ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीशंकरभगवतः कृतौ तत्त्वोपदेशः संपूर्णः ॥

॥ प्रौढानुभूतिः ॥

प्रौढप्रौढनिजानुभूतिगलितद्वैतेंद्रजालो गुरु-
गूंढं गूढमघौघदुष्टकुधियां स्पष्टं सुधीशालिनाम् ।
स्वांते सम्यगिहानुभूतमपि सच्छिष्यावबोधाय तत्
सत्यं संस्मृतवान्समस्तजगतां नैजं निजालोकनात् ॥ १ ॥

द्वैतं मय्यखिलं समुत्थितमिदं मिथ्या मनःकल्पितं
तोयं तोयविवर्जिते मरुतले भ्रांत्यैव सिद्धं न हि ॥
यद्येवं खलु दृश्यमेतदखिलं नाहं न वा तन्मम
प्रौढानंदचिदेकसन्मयवपुः शुद्धोऽस्म्यखंडोऽस्म्यहम् ॥ २ ॥

देहो नाहमचेतनोऽयमनिशं कुडयादिवन्निश्चितो
नाहं प्राणमयोऽपि वा दृतिधृतो वायुर्यथा निश्चितः
सोऽहं नापि मनोमयः कपिचलः कार्पण्यदुष्टो न वा
बुद्धिर्बुद्धकुवृत्तिकेव कुहना नाज्ञानमंधंतमः ॥ ३ ॥

नाहं खादिरपि स्फुटं मरुतलभ्राजत्पयः साम्यत-
स्तेभ्यो नित्यविलक्षणोऽखिलदृशिः सौरप्रकाशो यथा
दृश्यैः संगविवर्जितो गगनवत्संपूर्णरूपोऽस्म्यहं
वस्तुस्थित्यनुरोधतस्त्वहमिदं वीच्यादि सिंधुर्यथा ॥ ४ ॥

निर्द्वंतोऽस्म्यहमस्मि निर्मलचिदाकाशोऽस्मि पूर्णोऽस्म्यहं
निर्देहोऽस्मि निरिंद्रियोऽस्मि नितरां निष्प्राणवर्गोऽस्म्यहम् ।
निर्मुक्ताशुभमानसोऽस्मि विगलद्विज्ञानकोशोऽस्म्यहं
निर्मायोऽस्मि निरंतरोऽस्मि विपुलप्रौढप्रकाशोऽस्म्यहम् ॥ ५ ॥

मत्तोऽन्यन्न हि किंचिदस्ति यदि चिद्भास्यं ततस्तन्मृषा
गुंजावह्निवदेव सर्वकलनाधिष्ठानभूतोऽस्म्यहम् ॥
सर्वस्यापि दृगस्म्यहं समरसः शांतोऽस्म्यपापोऽस्म्यहं

पूर्णोऽस्मि द्वयवर्जितोऽस्मि विपुलाकाशोऽस्मि नित्योऽस्म्यहम् ॥
मय्यस्मिन्परमार्थके श्रुतिशिरोवेद्ये स्वतो भासने
का वा विप्रतिपत्तिरेतदखिलं भात्येव यत्संनिधेः ॥
सौरालोकवशात्प्रतीतमखिलं पश्यन्न तस्मिन्जनः
संदिग्धोऽस्त्यत एव केवलशिवः कोऽपि प्रकाशोऽस्म्यहम् ॥७॥
नित्यस्फूर्तिमयोऽस्मि निर्मलसदाकाशोऽस्मि शांतोऽस्म्यहं
नित्यानंदमयोऽस्मि निर्गतमहामोहांधकारोऽस्म्यहम् ॥
विज्ञातं परमार्थतत्त्वमखिलं नैजं निरस्ताशुभं
मुक्तप्राप्यमपास्तभेदकलनाकैवल्यसंज्ञोऽस्म्यहम् ॥ ८ ॥
स्वाप्नद्वैतवदेव जाग्रतमपि द्वैतं मनोमात्रकं
मिथ्येत्येव विहाय सच्चिदमलस्वांतैकरूपोऽस्म्यहम् ॥
यद्वा वेद्यमशेषमेतदनिशं मद्रूपमेवेत्यपि
ज्ञात्वा त्यक्तमरुन्महोदधिरिव प्रौढो गभीरोऽस्म्यहम् ॥ ९ ॥
गंतव्यं किमिहास्ति सर्वपरिपूर्णस्याप्यखंडाकृतेः
कर्तव्यं किमिहास्ति निष्क्रियतनोर्मोक्षैकरूपस्य मे ॥
निर्द्वैतस्य न हेयमन्यदपि वा नोवाप्युपेयांतरं
शांतोऽद्यास्मि विमुक्ततोयविमलो मेघो यथा निर्मलः ॥ १० ॥
किं नः प्राप्तमितः पुरा किमधुना लब्धं विचारादिना
यस्मात्तत्सुखरूपमेव सततं जाज्वल्यमानोऽस्म्यहम् ॥
किं वापेक्ष्यमिहापि मय्यतितरां मिथ्याविचारादिकं
द्वैताद्वैतविवर्जिते समरसे मौनं परं संमतम् ॥ ११ ॥
श्रोतव्यं च किमस्ति पूर्णसुदृशो मिथ्यापरोक्षस्य मे ।
मंतव्यं च न मेऽस्ति किंचिदपि वा निःसंशयज्योतिषः ॥
ध्यातृध्येयविभेदहानिवपुषो न ध्येयमस्त्येव मे
सर्वात्मैकमहारसस्य सततं नो वा समाधिर्मम ॥ १२ ॥

आत्मानात्मविवेचनापि मम नो विद्वत्कृता रोचते-
ऽनात्मा नास्ति यदस्ति गोचरवपुः को वा विवेक्तुं क्षमी ॥
मिथ्यावादविचारचिंतनमहो कुर्वन्त्यदृष्टात्मका
भ्रांता एव न पारगा दृढधियस्तूष्णीं शिलावत्स्थिताः ॥ १३ ॥
वस्तुस्थित्यनुरोधतस्त्वहमहो कश्चित्पदार्थो न चा-
प्येवं कोऽपि बिभामि संततदृशी वाङ्मानसागोचरः ॥
निष्पापोऽस्म्यभयोऽस्म्यहं विगतदुःशंकाकलंकोऽस्म्यहं
संशान्तानुपमानशीतलमहः प्रौढप्रकाशोऽस्म्यहम् ॥ १४ ॥
योऽहं पूर्वमितः प्रशान्तकलनाशुद्धोऽस्मि बुद्धोऽस्म्यहं
यस्मान्मत्त इदं समुत्थितमभूदेतन्मया धार्यते ॥
मय्येव प्रलयं प्रयाति निरधिष्ठानाय तस्मै सदा
सत्यानंदचिदात्मकाय विपुलप्रज्ञाय मह्यं नमः ॥ १५ ॥
सत्ताचित्सुखरूपमस्ति सततं नाहं च न त्वं मृषा
नेदं वापि जगत्प्रदृष्टमखिलं नास्तीति जानीहिं भो ॥
यत्प्रोक्तं करुणावशात्त्वयि मया तत्सत्यमेतत्स्फुटं
श्रद्धत्स्वानघ शुद्धबुद्धिरसि चेन्मात्रास्तु ते संशयः ॥ १६ ॥
स्वारस्यैकसुबोधचारुमनसे प्रौढानुभूतिस्त्वियं
दातव्या न तु मोहदुग्धकुधिये दुष्टांतरंगाय च ॥
येयं रम्यविदर्पितोत्तमशिरः प्राप्ता चकास्ति स्वयं
सा चेन्मर्कटहस्तदेशपतिता किं राजते केतकी ॥ १७ ॥

इति प्रौढानुभूतिः समाप्ता ॥

॥ ब्रह्मज्ञानावलीमाला ॥

सकृच्छ्रवणमात्रेण ब्रह्मज्ञानं यतो भवेत् ।
ब्रह्मज्ञानावलीमाला सर्वेषां मोक्षसिद्धये ॥ १ ॥
असंगोऽहमसंगोऽहमसंगोऽहं पुनः पुनः ।
सच्चिदानंदरूपोऽहमहमेवाहमव्ययः ॥ २ ॥
नित्यशुद्धविमुक्तोऽहं निराकारोऽहमव्ययः ।
भूमानंदस्वरूपोऽहमहमेवाहमव्ययः ॥ ३ ॥
नित्योऽहं निरवद्योऽहं निराकारोऽहमच्युतः ।
परमानंदरूपोऽहमहमेवाहमव्ययः ॥ ४ ॥
शुद्धचैतन्यरूपोऽहमात्मारामोऽहमेव च ।
अखंडानंदरूपोऽहमहमेवाहमव्ययः ॥ ५ ॥
प्रत्यक्चैतन्यरूपोऽहं शांतोऽहं प्रकृतेः परः ।
शाश्वतानंदरूपोऽहमहमेवाहमव्ययः ॥ ६ ॥
तत्त्वातीतः परात्माहं मध्यातीतः परः शिवः ।
मायातीतः परं ज्योतिरहमेवाहमव्ययः ॥ ७ ॥
नानारूपव्यतीतोऽहं चिदाकारोऽहमच्युतः ।
सुखरूपस्वरूपोऽहमहमेवाहमव्ययः ॥ ८ ॥
मायातत्कार्यदेहादि मम नास्त्येव सर्वदा ।
स्वप्रकाशैकरूपोऽहमहमेवाहमव्ययः ॥ ९ ॥
गुणत्रयव्यतीतोऽहं ब्रह्मादीनां च साक्ष्यहम् ।
अनंतानंतरूपोऽहमहमेवाहमव्ययः ॥ १० ॥
अंतर्यामिस्वरूपोऽहं कूटस्थः सर्वगोऽस्म्यहम् ॥
परमात्मस्वरूपोऽहमहमेवाहमव्ययः ॥ ११ ॥
निष्कलोऽहं निष्क्रियोऽहं सर्वात्माद्यः सनातनः ।

अपरोक्षस्वरूपोऽहमहमेवाहमव्ययः ॥ १२ ॥
द्वंद्वादिसाक्षिरूपोऽहमचलोऽहं सनातनः ।
सर्वसाक्षिस्वरूपोऽहमहमेवाहमव्ययः ॥ १३ ॥
प्रज्ञानघन एवाहं विज्ञानघन एव च ।
अकर्ताहमभोक्ताहमहमेवाहमव्ययः ॥ १४ ॥
निराधारस्वरूपोऽहं सर्वाधारोऽहमेव च ।
आप्तकामस्वरूपोऽहमहमेवाहमव्ययः ॥ १५ ॥
तापत्रयविनिर्मुक्तो देहत्रयविलक्षणः ।
अवस्थात्रयसाक्ष्यस्मि चाहमेवाहमव्ययः ॥ १६ ॥
दृग्दृश्यौ द्वौ पदार्थौ स्तः परस्परविलक्षणौ ।
दृग्ब्रह्म दृश्यं मायेति सर्ववेदांतडिंडिमः ॥ १७ ॥
अहं साक्षीति यो विद्याद्विविच्यैवं पुनः पुनः ॥
स एव मुक्तः स विद्वानिति वेदांतडिंडिमः ॥ १८ ॥
घटकुड्यादिकं सर्वं मृत्तिकामात्रमेव च ।
तद्वद्ब्रह्म जगत्सर्वमिति वेदान्तडिंडिमः ॥ १९ ॥
ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः ।
अनेन वेद्यं सच्छास्त्रमिति वेदान्तडिंडिमः ॥ २० ॥

॥ इति ब्रह्मज्ञानावलीमाला समाप्ता ॥

॥ लघुवाक्यवृत्तिः ॥

स्थूलो मांसमयो देहो सूक्ष्मः स्याद्वासनामयः ।
ज्ञानकर्मेंद्रियैः सार्धं धीप्राणौ तच्छरीरगौ ॥ १ ॥
अज्ञानं कारणं साक्षी बोधस्तेषां विभासकः ।
बोधाभासो बुद्धिगतः कर्ता स्यात्पुण्यपापयोः ॥ २ ॥
स एव संसरेत्कर्मवशाल्लोकद्वये सदा ।
बोधाभासाच्छुद्धबोधं विविच्यादतियत्नतः ॥ ३ ॥
जागरस्वप्नयोरेव बोधाभासविडंबना ।
सुप्तौ तु तल्लये बोधः शुद्धो जाडयं प्रकाशयेत् ॥ ४॥
जागरेऽपि धियस्तूष्णींभावः शुद्धेन भास्यते ।
धीव्यापाराश्च चिद्भास्याश्चिदाभासेन संयुताः ॥ ५ ॥
वह्नितप्तजलं तापयुक्तं देहस्य तापकम् ।
चिद्भास्या धीस्तदाभासयुक्तान्यं भासयेत्तथा ॥ ६ ॥
रूपादौ गुणदोषादिविकल्पा बुद्धिगाः क्रियाः ।
ताः क्रिया विषयैः सार्धं भासयन्ती चितिर्मता ॥ ७ ॥
रूपाच्च गुणदोषाभ्यां विविक्ता केवला चितिः ।
सैवानुवर्तते रूपरसादीनां विकल्पने ॥ ८ ॥
क्षणे क्षणेऽन्यथाभूता धीविकल्पाश्चितिर्न तु ।
मुक्तासु सूत्रवद्बुद्धिविकल्पेषु चितिस्तथा ॥ ९ ॥
मुक्ताभिरावृतं सूत्रं मुक्तयोर्मध्य ईक्षते ।
तथा वृत्तिविकल्पैश्चित्स्पष्टा मध्ये विकल्पयोः ॥ १० ॥
नष्टे पूर्वविकल्पे तु यावदन्यस्य नोदयः ।
निर्विकल्पकचैतन्यं स्पष्टं तावद्विभासते ॥ ११ ॥
एकद्वित्रिक्षणेष्वेवं विकल्पस्य निरोधनम् ।

क्रमेणाभ्यस्यतां यत्नाद्ब्रह्मानुभवकांक्षिभिः ॥ १२ ॥
सविकल्पकजीवोऽयं ब्रह्म तन्निर्विकल्पकम् ।
अहं ब्रह्मेति वाक्येन सोऽयमर्थोऽभिधीयते ॥ १३ ॥
सविकल्पकचिद्योऽहं ब्रह्मैकं निर्विकल्पकम् ।
स्वतःसिद्धा विकल्पास्ते निरोद्धव्याः प्रयत्नतः ॥ १४ ॥
शक्यः सर्वनिरोधेन समाधिर्योगिनां प्रियः ।
तदशक्तौ क्षणं रुद्ध्वा श्रद्धालुर्ब्रह्मतात्मनः ॥ १५ ॥
श्रद्धालुर्ब्रह्मतां स्वस्य चिंतयेद्बुद्धिवृत्तिभिः ।
वाक्यवृत्त्या यथाशक्ति ज्ञात्वाद्धाभ्यस्यतां सदा ॥ १६ ॥
तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनम् ।
एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः ॥ १७ ॥
देहात्मधीवद्ब्रह्मात्मधीदार्ढ्ये कृतकृत्यता ।
यदा तदायं म्रियतां मुक्तोऽसौ नात्र संशयः ॥ १८ ॥

॥ इति लघुवाक्यवृत्तिः समाप्ता ॥

॥ वाक्यवृत्तिः ॥

—:×:—

सर्गस्थितिप्रलयहेतुमचिंत्यशक्तिं
विश्वेश्वरं विदितविश्वमनंतमूर्तिम् ॥
निर्मुक्तबंधनमपारसुखांबुराशिं
श्रीवल्लभं विमलबोधघनं नमामि ॥ १ ॥

यस्य प्रसादादहमेव विष्णु-
र्मय्येव सर्वं परिकल्पितं च ॥
इत्थं विजानामि सदात्मरूपं
तस्यांघ्रिपद्मं प्रणतोऽस्मि नित्यम् ॥ २ ॥

तापत्रयार्कसंतप्तः कश्चिदुद्विग्नमानसः ।
शमादिसाधनैर्युक्तः सद्गुरुं परिपृच्छति ॥ ३ ॥
अनायासेन येनास्मान्मुच्येय भवबंधनात् ।
तन्मे संक्षिप्य भगवन्केवलं कृपया वद ॥ ४ ॥
साध्वी ते वचनव्यक्तिः प्रतिभाति वदामि ते ।
इदं तदिति विस्पष्टं सावधानमनाः शृणु ॥ ५ ॥
तत्त्वमस्यादिवाक्योत्थं यज्जीवपरमात्मनोः ।
तादात्म्यविषयं ज्ञानं तदिदं मुक्तिसाधनम् ॥ ६ ॥
को जीवः कः परश्चात्मा तादात्म्यं वा कथं तयोः ॥
तत्त्वमस्यादिवाक्यं वा कथं तत्प्रतिपादयेत् ॥ ७ ॥
अत्र ब्रूमः समाधानं कोऽन्यो जीवस्त्वमेव हि ॥
यस्त्वं पृच्छसि मां कोऽहं ब्रह्मैवासि न संशयः ॥ ८ ॥
पदार्थमेव जानामि नाद्यापि भगवन् स्फुटम् ॥
अहं ब्रह्मेति वाक्यार्थं प्रतिपद्ये कथं वद ॥ ९ ॥
सत्यमाह भवानत्र विगानं नैव विद्यते ॥

हेतुः पदार्थबोधो हि वाक्यार्थावगतेरिह ॥ १० ॥
अंतःकरणतद्वृत्तिसाक्षी चैतन्यविग्रहः ॥
आनंदरूपः सत्यः सन्किं नात्मानं प्रपद्यसे ॥ ११ ॥
सत्यानंदस्वरूपं धीसाक्षिणं ज्ञानविग्रहम् ॥
चिंतयात्मतया नित्यं त्यक्त्वा देहादिगां धियम् ॥ १२ ॥
रूपादिमान्यतः पिंडस्ततो नात्मा घटादिवत् ॥
वियदादिमहाभूतविकारत्वाच्च कुंभवत् ॥ १३ ॥
अनात्मा यदि पिंडोऽयमुक्तहेतुबलान्मतः ॥
करामलकवत्साक्षादात्मानं प्रतिपादय ॥ १४ ॥
घटद्रष्टा घटाद्भिन्नः सर्वथा न घटो यथा ॥
देहद्रष्टा तथा देहो नाहमित्यवधारय ॥ १५ ॥
एवमिंद्रियदृङ्नाहमिंद्रियाणीति निश्चिनु ॥
मनो बुद्धिस्तथा प्राणो नाहमित्यवधारय ॥ १६ ॥
संघातोऽपि तथा नाहमिति दृश्यविलक्षणम् ॥
द्रष्टारमनुमानेन निपुणं संप्रधारय ॥ १७ ॥
देहेंद्रियादयो भावा हानादिव्यापृतिक्षमाः ॥
यस्य संनिधिमात्रेण सोऽहमित्यवधारय ॥ १८ ॥
अनापन्नविकारः सन्नयस्कांतवदेव यः ॥
बुद्ध्यादींश्चालयेत्प्रत्यक् सोऽहमित्यवधारय ॥ १९ ॥
अजडात्मवदाभान्ति यत्सान्निध्याज्जडा अपि ॥
देहेंद्रियमनःप्राणाः सोऽहमित्यवधारय ॥ २० ॥
अगमन्मे मनोऽन्यत्र सांप्रतं च स्थिरीकृतम् ॥
एवं यो वेद धीवृत्तिं सोऽहमित्यवधारय ॥ २१ ॥
स्वप्नजागरिते सुप्तिं भावाभावौ धियां तथा ॥
यो वेत्त्यविक्रियः साक्षात्सोऽहमित्यवधारय ॥ २२ ॥

घटावभासको दीपो घटादन्यो यथेष्यते ॥
देहावभासको देही तथाऽहं बोधविग्रहः ॥ २३ ॥
पुत्रवित्तादयो भावा यस्य शेषतया प्रियाः ॥
द्रष्टा सर्वप्रियतमः सोऽहमित्यवधारय ॥ २४ ॥
परप्रेमास्पदतया मा न भूवमहं सदा ॥
भूयासमिति यो द्रष्टा सोऽहमित्यवधारय ॥ २५ ॥
यः साक्षिलक्षणो बोधस्त्वंपदार्थः स उच्यते ॥
साक्षित्वमपि बोद्धृत्वमविकारितयाऽऽत्मनः ॥ २६ ॥
देहेंद्रियमनःप्राणाहंकृतिभ्यो विलक्षणः ॥
प्रोज्झिताशेषषड्भावविकारस्त्वंपदाभिधः ॥ २७ ॥
त्वमर्थमेवं निश्चित्य तदर्थं चिंतयेत्पुनः ॥
अतद्व्यावृत्तिरूपेण साक्षाद्विधिमुखेन च ॥ २८ ॥
निरस्ताशेषसंसारदोषोऽस्थूलादिलक्षणः ॥
अदृश्यत्वादिगुणकः पराकृततमोमलः ॥ २९ ॥
निरस्तातिशयानंदः सत्यः प्रज्ञानविग्रहः ॥
सत्तास्वलक्षणः पूर्णः परमात्मेति गीयते ॥ ३० ॥
सर्वज्ञत्वं परेशत्वं तथा संपूर्णशक्तिता ॥
वेदैः समर्थ्यते यस्य तद्ब्रह्मेत्यवधारय ॥ ३१ ॥
यज्ज्ञानात्सर्वविज्ञानं श्रुतिषु प्रतिपादितम् ॥
मृदाद्यनेकदृष्टान्तैस्तद्ब्रह्मेत्यवधारय ॥ ३२ ॥
यदानंत्यं प्रतिज्ञाय श्रुतिस्तत्सिद्धये जगौ ॥
तत्कार्यत्वं प्रपंचस्य तद्ब्रह्मेत्यवधारय ॥ ३३ ॥
विजिज्ञास्यतया यच्च वेदान्तेषु मुमुक्षुभिः ॥
समर्थ्यतेऽतियत्नेन तद्ब्रह्मेत्यवधारय ॥ ३४ ॥
जीवात्मना प्रवेशश्च नियन्तृत्वं च तान्प्रति ॥

श्रूयते यस्य वेदेषु तद्ब्रह्मेत्यवधारय ॥ ३५ ॥
कर्मणां फलदातृत्वं यस्यैव श्रूयते श्रुतौ ॥
जीवानां हेतुकर्तृत्वं तद्ब्रह्मेत्यवधारय ॥ ३६ ॥
तत्त्वंपदार्थौ निर्णीतौ वाक्यार्थश्चिंत्यतेऽधुना ।
तादात्म्यमत्र वाक्यार्थस्तयोरेव पदार्थयोः ॥ ३७ ॥
संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र संमतः ॥
अखंडैकरसत्वेन वाक्यार्थो विदुषां मतः ॥ ३८ ॥
प्रत्यग्बोधो य आभाति सोऽद्वयानंदलक्षणः ॥
अद्वयानंदरूपश्च प्रत्यग्बोधैकलक्षणः ॥ ३९ ॥
इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् ॥
अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि ॥ ४० ॥
तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु ॥
पूर्णानंदैकरूपेण प्रत्यग्बोधोऽवतिष्ठते ॥ ४१ ॥
तत्त्वमस्यादिवाक्यं च तादात्म्यप्रतिपादने ॥
लक्ष्यौ तत्त्वंपदार्थौ द्वावुपादाय प्रवर्तते ॥ ४२ ॥
हित्वा द्वौ शबलौ वाच्यौ वाक्यं वाक्यार्थबोधने ॥
यथा प्रवर्ततेऽस्माभिस्तथा व्याख्यातमादरात् ॥ ४३ ॥
आलंबनतया भाति योऽस्मत्प्रत्ययशब्दयोः ॥
अंतःकरणसंभिन्नबोधः स त्वंपदाभिधः ॥ ४४ ॥
मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः ॥
पारोक्ष्यशबलः सत्याद्यात्मकस्तत्पदाभिधः ॥ ४५ ॥
प्रत्यक्परोक्षतैकस्य सद्वितीयत्वपूर्णता ॥
विरुध्यते यतस्तस्माल्लक्षणा संप्रवर्तते ॥ ४६ ॥
मानान्तरविरोधे तु मुख्यार्थस्यापरिग्रहे ॥
मुख्यार्थेनाविनाभूते प्रतीतिर्लक्षणोच्यते ॥ ४७ ॥

तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा ॥
सोऽयमित्यादिवाक्यस्थपदयोरिव नापरा ॥ ४८ ॥
अहं ब्रह्मेति वाक्यार्थबोधो यावद्दृढीभवेत् ॥
शमादिसहितस्तावदभ्यस्येच्छ्रवणादिकम् ॥ ४९ ॥
श्रुत्याचार्यप्रसादेन दृढो बोधो यदा भवेत् ॥
निरस्ताशेषसंसारनिदानः पुरुषस्तदा ॥ ५० ॥
विशीर्णकार्यकरणे भूतसूक्ष्मैरनावृतः ॥
विमुक्तकर्मनिगलः सद्य एव विमुच्यते ॥ ५१ ॥
प्रारब्धकर्मवेगेण जीवन्मुक्तो यदा भवेत् ॥
कंचित्कालमनारब्धकर्मबंधस्य संक्षये ॥ ५२ ॥
निरस्तातिशयानंदं वैष्णवं परमं पदम् ॥
पुनरावृत्तिरहितं कैवल्यं प्रतिपद्यते ॥ ५३ ॥

॥ इति वाक्यवृत्तिः संपूर्णा ॥

॥ सदाचारानुसंधानम् ॥

सच्चिदानंदकंदाय जगदंकुरहेतवे ॥
सदोदिताय पूर्णाय नमोऽनंताय विष्णवे ॥ १ ॥
सर्व वेदान्तसिद्धांतैर्ग्रथितं निर्मलं शिवम् ॥
सदाचारं प्रवक्ष्यामि योगिनां ज्ञानसिद्धये ॥ २ ॥
प्रातः स्मरामि देवस्य सवितुर्भर्ग आत्मनः ॥
वरेण्यं तद्धियो यो नश्चिदानंदे प्रचोदयात् ॥ ३ ॥
अन्वयव्यतिरेकाभ्यां जाग्रत्स्वप्नसुषुप्तिषु ॥
यदेकं केवलं ज्ञानं तदेवास्मि परं बृहत् ॥ ४ ॥
ज्ञानाज्ञानविलासोऽयं ज्ञानाज्ञाने च शाम्यति ॥
ज्ञानाज्ञाने परित्यज्य ज्ञानमेवावशिष्यते ॥ ५ ॥
अत्यंतमलिनो देहो देही चात्यंतनिर्मलः ॥
असंगोऽहमिति ज्ञात्वा शौचमेतत्प्रचक्षते ॥ ६ ॥
मन्मनो मीनवन्नित्यं क्रीडत्यानंदवारिधौ ॥
सुस्नातस्तेन पूतात्मा सम्यग्विज्ञानवारिणा ॥ ७ ॥
अथाघमर्षणं कुर्यात्प्राणापाननिरोधतः ॥
मनः पूर्णे समाधाय मग्नकुंभो यथार्णवे ॥ ८ ॥
लयविक्षेपयोः संधौ मनस्तत्र निरामिषम् ॥
स संधिः साधितो येन स मुक्तो नात्र संशयः ॥ ९ ॥
सर्वत्र प्राणिनां देहे जपो भवति सर्वद ॥
हंसः सोऽहमिति ज्ञात्वा सर्वबंधैर्विमुच्यते ॥ १० ॥
तर्पणं स्वसुखेनैव स्वेंद्रियाणां प्रतर्पणम् ॥
मनसा मन आलोक्य स्वयमात्मा प्रकाशते ॥ ११ ॥
आत्मनि स्वप्रकाशाग्नौ चित्तमेकाहुतिं क्षिपेत् ॥

अग्निहोत्री स विज्ञेयश्चेतरा नामधारकाः ॥ १२ ॥
देहो देवालयः प्रोक्तो देही देवो निरंजनः ॥
अर्चितः सर्वभावेन स्वानुभूत्या विराजते ॥ १३ ॥
मौनं स्वाध्ययनं ध्यानं ध्येयं ब्रह्मानुचिंतनम् ॥
ज्ञानेनेति तयोः सम्यङ्निषेधात्तत्त्वदर्शनम् ॥ १४ ॥
अतीतानागतं किंचिन्न स्मरामि न चिंतये ॥
रागद्वेषं विना प्राप्तं भुंजाम्यत्र शुभाशुभम् ॥ १५ ॥
देहाभ्यासो हि संन्यासो नैव काषायवाससा ॥
नाहं देहोऽहमात्मेति निश्चयो न्यासलक्षणम् ॥ १६ ॥
अभयं सर्वभूतानां दानमाहुर्मनीषिणः ॥
निजानंदे स्पृहा नान्ये वैराग्यस्यावधिर्मता ॥ १७ ॥
वेदांतश्रवणं कुर्यान्मननं चोपपत्तिभिः ॥
योगेनाभ्यसनं नित्यं ततो दर्शनमात्मनः ॥ १८ ॥
शब्दशक्तेरचिंत्यत्वाच्छब्दादेवापरोक्षधीः ॥
प्रसुप्तः पुरुषो यद्वच्छब्देनैवावबुध्यते ॥ १९ ॥
आत्मानात्मविवेकेन ज्ञानं भवति निश्चलम् ॥
गुरुणा बोधितः शिष्यः शब्दब्रह्मातिवर्तते ॥ २० ॥
न त्वं देहो नेंद्रियाणि न प्राणो न मनो न धीः ॥
विकारित्वाद्विनाशित्वाद्दृश्यत्वाच्च घटो यथा ॥ २१ ॥
विशुद्धं केवलं ज्ञानं निर्विशेषं निरंजनम् ॥
यदेकं परमानंदं तत्त्वमस्यद्वयं परम् ॥ २२ ॥
शब्दस्याद्यंतयोः सिद्धं मनसोऽपि तथैव च ॥
मध्ये साक्षितया नित्यं तदेव त्वं भ्रमं जहि ॥ २३ ॥
स्थूलवैराजयोरैक्यं सूक्ष्महैरण्यगर्भयोः ॥
अज्ञानमाययोरैक्यं प्रत्यग्विज्ञानपूर्णयोः ॥ २४ ॥

चिन्मात्रैकरसे विष्णौ ब्रह्मात्मैक्यस्वरूपके ॥
भ्रमेणैव जगज्जातं रज्ज्वां सर्पभ्रमो यथा ॥ २५ ॥
तार्किकाणां तु जीवेशौ वाच्यावेतौ विदुर्बुधाः ॥
लक्ष्यौ च सांख्ययोगाभ्यां वेदांतैरैक्यता तयोः ॥ २६ ॥
कार्यकारणवाच्यांशौ जीवेशौ यौ जहच्च तौ ॥
अजहच्च तयोर्लक्ष्यौ चिदंशावेकरूपिणौ ॥ २७ ॥
कर्मशास्त्रे कुतो ज्ञानं तर्के नैवास्ति निश्चयः ॥
सांख्ययोगौ भिदापन्नौ शाब्दिकाः शब्दतत्पराः ॥ २८ ॥
अन्ये पाषंडिनः सर्वे ज्ञानवार्तासुदुर्लभाः ॥
एकं वेदांतविज्ञानं स्वानुभूत्या विराजते ॥ २९ ॥
अहं ममेत्ययं बंधो ममाहं नेति मुक्तता ।
बंधमोक्षौ गुणैर्भाति गुणाः प्रकृतिसंभवाः ॥३०॥
ज्ञानमेकं सदा भाति सर्वावस्थासु निर्मलम् ।
मंदभाग्या न जानन्ति स्वरूपं केवलं बृहत् ॥३१॥
संकल्पसाक्षि यज्ज्ञानं सर्वलोकैकजीवनम् ।
तदेवास्मीति यो वेद स मुक्तो नात्र संशयः ॥३२॥
प्रमाता च प्रमाणं च प्रमेयं प्रमितिस्तथा ।
यस्य भासावभासन्ते मानं ज्ञानाय तस्य किम् ॥३३॥
अर्थाकारा भवेद्वृत्तिः फलेनार्थः प्रकाशते ।
अर्थज्ञानं विजानाति स एवार्थः प्रकाशते ॥३४॥
वृत्तिव्याप्यत्वमेवास्तु फलव्याप्तिः कथं भवेत् ।
स्वप्रकाशस्वरूपत्वात्सिद्धत्वाच्च चिदात्मनः ॥३५॥
चित्तं चैतन्यमात्रेण संयोगाच्चेतना भवेत् ।
अर्थादर्थांतरे वृत्तिर्गन्तुं चलति चांतरे ॥३६॥
निराधारा निर्विकारा या दशा सोन्मनी स्मृता ।

चित्तं चिदिति जानीयात्तकाररहितं यदा ॥३७॥
तकारो विषयाध्यासो जपारागो यथा मणौ ।
ज्ञेयवस्तुपरित्यगाज्ज्ञानं तिष्ठति केवलम् ॥३८॥
त्रिपुटी क्षीणतामेति ब्रह्मनिर्वाणमृच्छति ।
मनोमात्रमिदं सर्वं तन्मनो ज्ञानमात्रकम् ॥३९॥
अज्ञानं भ्रम इत्याहुर्विज्ञानं परमं पदम् ।
अज्ञानं चान्यथाज्ञानं मायामेतां वदन्ति ते ॥४०॥
ईश्वरं मायिनं विद्यान्मायातीतं निरंजनम् ।
सदानंदे चिदाकाशे मायामेघस्तडिन्मनः ॥४१॥
अहंता गर्जनं तत्र धारासारा हि वृत्तयः ।
महामोहांधकारेऽस्मिन्देवो वर्षति लीलया ॥४२॥
तस्या वृष्टेर्विरामाय प्रबोधैकसमीरणः ।
ज्ञानं दृग्दृश्ययोर्भावं विज्ञानं दृश्यशून्यता ॥४३॥
एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं तज्ज्ञानं ज्ञानमुच्यते ॥४४॥
विज्ञानं चोभयोरैक्यं क्षेत्रज्ञपरमात्मनोः ।
परोक्षं शास्त्रजं ज्ञानं विज्ञानं चात्मदर्शनम् ॥४५॥
आत्मनो ब्रह्मणः सम्यगुपाधिद्वयवर्जितम् ।
त्वमर्थविषयं ज्ञानं विज्ञानं तत्पदाश्रयम् ॥४६॥
पदयोरैक्यबोधस्तु ज्ञानविज्ञानसंज्ञितम् ।
आत्मानात्मविवेकस्य ज्ञानमाहुर्मनीषिणः ॥४७॥
अज्ञानं चान्यथा लोके विज्ञानं तन्मयं जगत् ।
अन्वयव्यतिरेकाभ्यां सर्वत्रैकं प्रपश्यति ॥४८॥
यत्तु वृत्तिजं ज्ञानं विज्ञानं ज्ञानमात्रकम् ।
अज्ञानध्वंसकं ज्ञानं विज्ञानं चोभयात्मकम् ॥४९॥

ज्ञानविज्ञाननिष्ठोऽयं तत्सद्ब्रह्माणि चार्पणम् ।
भोक्ता सत्त्वगुणः शुद्धो भोगानां साधनं रजः ॥५०॥
भोग्यं तमोगुणः प्राहुरात्मा चैषां प्रकाशकः ।
ब्रह्माध्ययनसंयुक्तो ब्रह्मचर्यारतः सदा ॥५१॥
सर्वं ब्रह्मेति यो वेद ब्रह्मचारी स उच्यते ।
गृहस्थो गुणमध्यस्थः शरीरं गृहमुच्यते ॥५२॥
गुणाः कुर्वन्ति कर्माणि नाहं कर्तेति बुद्धिमान् ।
किमुग्रैश्च तपोभिश्च यस्य ज्ञानमयं तपः ॥५३॥
हर्षामर्षविनिर्मुक्तो वानप्रस्थः स उच्यते ।
स गृही यो गृहातीतः शरीरं गृहमुच्यते ॥५४॥
सदाचारमिमं नित्यं योऽनुसंदधते बुधः ।
संसारसागराच्छीघ्रं स मुक्तो नात्र संशयः ॥५५॥

इति सदाचारानुसधानं संपूर्णम् ॥

॥ स्वात्मनिरूपणम् ॥

श्रीगुरुचरणद्वंद्वं वंदेऽहं मथितदुःसहद्वंद्वम् ।
भ्रांतिग्रहोपशांतीं पांसुमयं यस्य भसितमातनुते ॥१॥
देशिकवरं दयालुं वंदेऽहं निहतनिखिलसंदेहम् ॥
यच्चरणद्वयमद्वयमनुभवमुपदिशति तत्पदस्यार्थम् ॥२॥
संसारदावपावकसंतप्तः सकलसाधनोपेतः ।
स्वात्मनिरूपणनिपुणैर्वाक्यैः शिष्यः प्रबोध्यते गुरुणा ॥ ३ ॥
अस्ति स्वयमित्यस्मिन्नर्थे कस्यास्ति संशयः पुंसः ॥
अत्रापि संशयश्चेत् संशयिता यः स एव भवसि त्वम् ॥ ४ ॥
नाहमिति वेत्ति योऽसौ सत्यं ब्रह्मैव वेत्ति नास्तीति ॥
अहमस्मीति विजानन्ब्रह्मैवासौ स्वयं विजानाति ॥ ५ ॥
ब्रह्म त्वमेव तस्मान्नाहं ब्रह्मेति मोहमात्रमिदम् ॥
मोहेन भवति भेदः क्लेशाः सर्वे भवन्ति तन्मूलाः ॥ ६ ॥
न क्लेशपंचकमिदं भजते कृतकोशपंचकविवेकः ।
अत एव पंच कोशान् कुशलधियः संततं विचिन्वन्ति ॥ ७ ॥
अन्नप्राणमनोमयविज्ञानानंदपंचकोशानाम् ॥
एकैकान्तरभाजां भजति विवेकात्प्रकाश्यतामात्मा ॥ ८ ॥
वपुरिदमन्नमयाख्यः कोशो नात्मा जडो घटप्रायः ॥
प्रागुत्पत्तेः पश्चात्तदभावस्यापि दृश्यमानत्वात् ॥ ९ ॥
कोशः प्राणमयोऽयं वायुविशेषो वपुष्यवच्छिन्नः ॥
अस्य कथमात्मता स्यात् क्षुत्तृष्णाभ्यामुपेयुषः पीडाम् ॥ १० ॥
कुरुते वपुष्यहंतां गेहादौ यः करोति ममतां च ॥
रागद्वेषविधेयो नासावात्मा मनोमयः कोशः ॥ ११ ॥
सुप्तौ स्वयं विलीना बोधे व्याप्ता कलेवरं सकलम् ॥

विज्ञानशब्दवाच्या चित्प्रतिबिंबा न बुद्धिरप्यात्मा ॥ १२ ॥
सुप्तिगतैः सुखलेशैरभिमनुते यः सुखी भवामीति ॥
आनंदकोशनामा सोऽहंकारः कथं भवेदात्मा ॥ १३ ॥
यः स्फुरति बिंबभूतः स भवेदानन्द एव सकलात्मा ॥
प्रागूर्ध्वमपि च सत्त्वादविकारित्वादबाध्यमानत्वात् ॥ १४ ॥
अन्नमयादेरस्मादपरं यदि नानुभूयते किंचित् ॥
अनुभविताऽन्नमयादेरस्तीत्यस्मिन्न कश्चिदपलापः ॥ १५ ॥
स्वयमेवानुभवत्वाद्यद्यप्येतस्य नानुभाव्यत्वम् ॥
सकृदप्यभावशंका न भवेद्बोधस्वरूपसत्तायाः ॥ १६ ॥
अनुभवति विश्वमात्मा विश्वेनासौ न चानुभूयेत ॥
न खलु प्रकाश्यतेऽसौ विश्वमशेषं प्रकाशयन्भानुः ॥ १७ ॥
तदिदं तादृशमीदृशमेतावत्तावदिति च यन्न भवेत् ॥
ब्रह्म तदित्यवधेयं नो चेद्विषयो भवेत्परोक्षं च ॥ १८ ॥
इदमिदमिति प्रतीते वस्तुनि सर्वत्र बाध्यमानेऽपि ॥
अनिदमबाध्यं तत्त्वं सत्त्वादेतस्य न च परोक्षत्वम् ॥ १९ ॥
नावेद्यमपि परोक्षं भवति ब्रह्म स्वयंप्रकाशत्वात् ॥
सत्यं ज्ञानमनंतं ब्रह्मेत्यतस्य लक्षणं प्रथते ॥ २० ॥
सति कोशशक्त्युपाधौ संभवतस्तस्य जीवतेश्वरते ॥
नो चेत्तयोरभावाद्विगतविशेषं विभाति निजरूपम् ॥ २१ ॥
सति सकलदृश्यबाधे न किमप्यस्तीति लोकसिद्धं चेत् ॥
यन्न किमपीति सिद्धं ब्रह्म तदेवेति वेदतः सिद्धम् ॥ २२ ॥
एवं मतिरहितानां तत्त्वमसीत्यादिवाक्यचिंतनया ॥
प्रतिभात्येष परोक्षवदात्मा प्रत्यक्प्रकाशमानोऽपि ॥ २३ ॥
तस्मात्पदार्थशोधनपूर्वं वाक्यस्य चिंतयन्नर्थम् ॥
देशिकदयाप्रभावादपरोक्षयति क्षणेन चात्मानम् ॥ २४ ॥

देहेंद्रियादिधर्मानात्मन्यारोपयन्नभेदेन ॥
कर्तृत्वाद्यभिमानी बोधः स्यात्त्वंपदस्य वाच्योऽर्थः ॥ २५ ॥
देहस्य चेंद्रियाणां साक्षी तेभ्यो विलक्षणत्वेन ॥
प्रतिभाति योऽत्रबोधः प्रोक्तोऽसौ त्वंपदस्य लक्ष्योऽर्थः ॥ २६ ॥
वेदावसानवाचा संवेद्य सकलजगदुपादानम् ॥
सर्वज्ञताद्युपेतं चैतन्यं तत्पदस्य वाच्योऽर्थः ॥ २७ ॥
विविधोपाधिविमुक्तं विश्वातीतं विशुद्धमद्वैतम् ॥
अक्षरमनुभववेद्यं चैतन्यं तत्पदस्य लक्ष्योऽर्थः ॥ २८ ॥
सामानाधिकरण्यं तदनु विशेषणविशेष्यता चेति ॥
अथ लक्ष्यलक्षकत्वं भवति पदार्थात्मनां च संबंधः ॥ २९ ॥
एकत्र वृत्तिरर्थे शव्दानां भिन्नवृत्तिहेतूनाम् ॥
सामानाधिकरण्यं भवतीत्येवं वदन्ति लाक्षणिकाः ॥ ३० ॥
प्रत्यक्त्वपरोक्षत्वे परिपूर्णत्वं च सद्वितीयत्वम् ।
इतरेतरं विरुद्धं तत इह भवितव्यमेव लक्षणया ॥ ३१ ॥
मानान्तरोपरोधे मुख्यार्थस्यापरिग्रहे जाते ।
मुख्याविनाकृतेऽर्थे या वृत्तिः सैव लक्षणा प्रोक्ता ॥ ३२ ॥
निखिलमपि वाच्यमर्थं त्यक्त्वा वृत्तिस्तदन्वितेऽन्यार्थे ।
जहतीति लक्षणा स्यात् गंगायां घोषवदिह न ग्राह्या ॥ ३३ ॥
वाच्यार्थमत्यजन्त्या यस्या वृत्तेः प्रवृत्तिरन्यार्थे ।
इहमजहतीति कथिता शोणो धावतिवदत्र न ग्राह्या ॥ ३४ ॥
जहदजहतीति सा स्याद्या वाच्यार्थैकदेशमपहाय ।
बोधयति चैकदेशं सोऽयं द्विज इतिवदाश्रयेदेनाम् ॥ ३५ ॥
सोऽयं द्विज इति वाक्यं त्यक्त्वा प्रत्यक्परोक्षदेशाद्यम् ।
द्विजमात्रलक्षकत्वात्कथयत्यैक्यं पदार्थयोरुभयोः ॥ ३६ ॥
तद्वत्तत्त्वमसीति त्यक्त्वा प्रत्यक्परोक्षतादीनि ।

चिद्वस्तु लक्षयित्वा बोधयति स्पष्टमासिपदेनैक्यम् ॥ ३७ ॥
इत्थं बोधितमर्थं महता वाक्येन दर्शितैक्येन ।
अहमित्यपरोक्षयतां वेदो वेदयति वीतशोकत्वम् ॥ ३८ ॥
प्रायः प्रवर्तकत्वं विधिवचसां लोकवेदयोर्दृष्टम् ।
सिद्धं बोधयतोऽर्थं कथमिव तद्भवति तत्त्वमस्यादेः ॥ ३९ ॥
विधिरेव न प्रवृत्तिं जनयत्यभिलषितवस्तुबोधोऽपि ।
राजा याति सुतोऽभूत् इति बोधेन प्रवर्तते लोकः ॥ ४० ॥
ऐक्यपरैः श्रुतिवाक्यैरात्मा शश्वत्प्रकाश्यमानोऽपि ।
देशिकदयाविहीनैरपरोक्षयितुं न शक्यते पुरुषैः ॥ ४१ ॥
विरहितकाम्यनिषिद्धो विहितानुष्ठाननिर्मलस्वान्तः ।
भजति स्वमेव बोधं गुरुणा किमिति त्वया न मंतव्यम् ॥ ४२ ॥
कर्मभिरेव न बोधः प्रभवति गुरुणा विना दयानिधिना ।
आचार्यवान्हि पुरुषो वेदेत्यर्थस्य वेदसिद्धत्वात् ॥ ४३ ॥
वेदोऽनादितया वा यद्वा परमेश्वरप्रणीततया ।
भवति परमं प्रमाणं बाधो नास्ति स्वतश्च परतो वा ॥ ४४ ॥
नापेक्षते यदन्यद्यदपेक्षन्तेऽखिलानि मानानि ।
वाक्यं तन्निगमानां मानं ब्रह्माद्यतींद्रियावगतौ ॥ ४५ ॥
मानं प्रबोधयन्तं बोधं मानेन ये बुभुत्सन्ते ॥
एधोभिरेव दहनं दग्धुं वांछन्ति ते महात्मानः ॥ ४६ ॥
वेदोऽनादिरमुष्य व्यंजक ईशः स्वयंप्रकाशात्मा ॥
तदभिव्यक्तिमुदीक्ष्य प्रोक्तोऽसौ सूरिभिः प्रमाणमिति ॥ ४७ ॥
रूपाणामवलोके चक्षुरिवान्यन्न कारणं दृष्टम् ॥
तद्वददृष्टावगतौ वेदवदन्यो न वेदको हेतुः ॥ ४८ ॥
निगमेषु निश्चितार्थं तंत्रे कश्चिद्यदि प्रकाशयति ॥
तदिदमनुवादमात्रं प्रामाण्यं तस्य सिध्यति न किंचित् ॥ ४९ ॥

अंशद्वयवति निगमे साधयति द्वैतमेव कोऽप्यंशः ॥
अद्वैतमेव वस्तु प्रतिपादयति प्रसिद्धमपरोंऽशः ॥ ५० ॥
अद्वैतमेव सत्यं तस्मिन्द्वैतं न सत्यमध्यस्तम् ॥
रजतमिव शुक्तिकायां मृगतृष्णायामिवोदकस्फुरणम् ॥ ५१ ॥
आरोपितं यदि स्याददैतं वस्त्ववस्तुनि द्वैते ॥
तदयुक्तमेव यस्मात्सत्येऽध्यासो भवत्यसत्यानाम् ॥ ५२ ॥
यद्यारोपणमुभयोस्तद्व्यतिरिक्तस्य कस्याचिदभावात् ॥
आरोपणं न शून्ये तस्माददैतसत्यता ग्राह्या ॥ ५३ ॥
प्रत्यक्षाद्यनवगतं श्रुत्या प्रतिपादनीयमद्वैतम् ॥
द्वैतं न प्रतिपाद्यं तस्य स्वत एव लोकसिद्धत्वात् ॥५४ ॥
अद्वैतं सुखरूपं दुस्सहदुःखं सदा भवेद्वैतम् ॥
यत्र प्रयोजनं स्यात्प्रतिपादयति श्रुतिस्तदेवासौ ॥ ५५ ॥
निगमगिरा प्रतिपाद्यं वस्तु यदानंदरूपमद्वैतम् ॥
स्वाभाविकं स्वरूपं जीवत्वं तस्य केचन ब्रुवते ॥ ५६ ॥
स्वाभाविकं यदि स्याज्जीवत्वं तस्य विशदविज्ञप्तेः ।
सकृदपि न तद्विनाशं गच्छेदुष्णप्रकाशवद्वह्नेः ॥ ५७ ॥
यद्वदयो रसविद्धं कांचनतां याति तद्वदेवासौ ।
जीवः साधनशक्त्या परतां यातीति केचिदिच्छन्ति ॥ ५८ ॥
तदिदं भवति न युक्तं गतवति तस्मिंश्चिरेण रसवीर्ये ॥
प्रतिपद्यते प्रणाशं हैमो वर्णोऽप्ययस्समारूढः ॥ ५९ ॥
जीवत्वमपि तथेदं बहुविधसुखदुःखलक्षणोपेतम् ॥
गतमिव साधनशक्त्या प्रतिभात्येव प्रयाति न विनाशम् ॥ ६० ॥
तस्मात्स्वतो यदि स्याज्जीवस्सततं स एव जीवः स्यात् ॥
एवं यदि परमात्मा परमात्मैवायमिति भवेद्युक्तम् ॥ ६१ ॥
यदि वा परेण साम्यं जीवश्चेद्व्रजति साधनबलेन ॥

कालेन तदपि कियता नश्यत्येवेति निश्चितं सकलैः ॥ ६२ ॥
तस्मात्परं स्वकीयं मोहं मोहात्मकं च संसारम् ॥
स्वज्ञानेन जहित्वा पूर्णाः स्वयमेव शिष्यते नान्यत् ॥ ६३ ॥
सत्यं ज्ञानमनंतं प्रकृतं परमात्मरूपमद्वैतम् ॥
अवबोधयन्ति निखिलाः श्रुतयः स्मृतिभिः समं समरताभिः ६४॥
एकत्वबोधकानां निखिलानां निगमवाक्यजालानाम् ॥
वाक्यान्तराणि सकलान्यभिधीयन्तेऽस्य शेषभूतानि ॥ ६५ ॥
यस्मिन्मिहिरवदुदिते तिमिरवदपयान्ति कर्तृताऽऽदीनि ।
ज्ञानं विरहितभेदं कथमिव तद्भवति तत्त्वमरयादेः ॥ ६६ ॥
कर्मप्रकरणनिष्ठं ज्ञानं कर्मांगमिष्यते प्राज्ञैः ।
भिन्नप्रकरणभाजः कर्मांगत्वं कथं भवेज्ज्ञप्तेः ॥ ६७ ॥
अधिकारिविषयभेदौ कर्मज्ञानात्मकावुभौ कांडौ ।
एवं सति कथमनयोरंगांगित्वं परस्परं घटते ॥ ६८ ॥
ज्ञानं कर्मणि न स्या ज्ज्ञाने कर्मेदमपि तथा न स्यात् ।
तत्कथमनयोरुभयोस्तपनतमोवत्समुच्चयो घटते ॥ ६९ ॥
तस्मान्मोहनिवृत्तौ ज्ञानं न सहायमन्यदर्थयते ।
यद्वद्घनतरतिमिरप्रकरपरिध्वंसने सहस्रांशुः ॥७०॥
ज्ञानं तदेवममलं साक्षी विश्वस्य भवति परमात्मा ।
संबध्यते न धर्मैः साक्षी तैरेव सच्चिदानंदः ॥७१॥
रज्ज्वादेरुरगाद्यैः संबंधवदस्य दृश्यसंबंधः ।
सततमसंगोऽयमिति श्रुतिरप्यमुमर्थमेव साधयति ॥७२॥
कर्तृ च कर्म च यस्य स्फुरति ब्रह्मैव तन्न जानाति ।
यस्य न कर्तृ न कर्म स्फुटतरमयमेव वेदितुं क्रमते ॥७३॥
कर्तृत्वादिकमेतन्मायाशक्त्या प्रतीयते निखिलम् ।
इति केचिदाहुरेषा भ्रान्तिर्ब्रह्मातिरेकतो नान्यत् ॥७४॥

तस्मिन्ब्रह्मणि विदिते विश्वमशेषं भवेदिदं विदितम् ।
कारणमृदि विदितायां घटकरकाद्या यथाऽवगम्यन्ते ॥७५॥
तदिदं कारणमेकं विगतविशेषं विशुद्धचिद्रूपम् ।
तस्मात्सदेकरूपान्मायोपहितादभूदिदं विश्वम् ॥७६॥
कारणमसदिति केचित्कथयन्त्यसतो भवेन्न कारणता ।
अंकुरजननी शक्तिः सति खलु बीजे समीक्ष्यते सकलैः ॥७७॥
कारणमसादिति कथयन् वंध्यापुत्रेण निर्वहेत्कार्यम् ।
किंच मृगतृष्णिकांभः पीत्वोदन्यां महीयसीं शमयेत् ॥७८॥
यस्मान्न सोऽयमसतो वादः संभवति शास्त्रयुक्तिभ्याम् ।
तस्मात्सदेव तत्त्वं सर्वेषां भवति कारणं जगताम् ॥७९॥
जगदाकारतयाऽपि प्रथते गुरुशिष्यविग्रहतयाऽपि ।
ब्रह्माकारतयाऽपि प्रतिभातीदं परात्परं तत्त्वम् ॥८०॥
सत्यं जगदिति भानं संसृतये स्यादपक्वचित्तानाम् ।
तस्मादसत्यमेतन्निखिलं प्रतिपादयन्ति निगमान्ताः ॥८१॥
परिपक्वमानसानां पुरुषवराणां पुरातनैः सुकृतैः ।
ब्रह्मैवेदं सर्वं जगदिति भूयः प्रबोधयत्येषः ॥८२॥
अनवगतकांचनानां भूषणधीरेव भूषणे हैमे ।
एवमविवेकभाजां जगति जनानां न तात्त्विकी धिषणा ॥८३॥
अहमालंबनसिद्धं कस्य परोक्षं भवेदिदं ब्रह्म ।
तदपि विचारविहीनैरपरोक्षयितुं न शक्यते मुग्धैः ॥८४॥
अहमिदमिति च मतिभ्यां सततं व्यवहरति सर्वलोकोऽपि ।
प्रथमा प्रतीचि चरमा निवसति वपुरिन्द्रियादिबाह्येऽर्थे ॥८५॥
वपुरिन्द्रियादिविषये याऽहंबुद्धिर्महत्यसौ भ्रान्तिः ।
तद्बुद्धिस्तस्मिन्नित्यध्यासत्वेन शास्यमानत्वात् ॥८६॥
तस्मादशेषसाक्षी परमात्मैवाहमर्थ इत्युचितम् ।

अजडवदेव जडोऽयं सत्संबंधाद्भवत्यहंकारः ॥८७॥
तस्मात्सर्वशरीरेष्वहमहमित्येव भासते स्पष्टः ।
यः प्रत्ययो विशुद्धः तस्य ब्रह्मैव भवति मुख्योऽर्थः ॥८८॥
गोशब्दार्थो गोत्वं तदपि व्याक्तिः प्रतीयतेऽर्थतया ।
अहमर्थः परमात्मा तद्वद्भ्रान्त्या भवत्यहंकारः ॥८९॥
दग्धृत्वादिकमयसः पावकसंगेन भासते यद्वत् ।
तद्वच्चेतनसंगादहमि प्रतिभान्ति कर्तृताऽऽदीनि ॥९०॥
देहेंद्रियादिदृश्यव्यतिरिक्तं विमलमतुलमद्वैतम् ।
अहमर्थ इति विदित्वा तद्व्यतिरिक्तं न कल्पयेत्किंचित् ॥९१॥
यद्वत्सुखदुःखानामवयवभेदादनेकता देहे ।
तद्वदिहासति भेदेऽप्यनुभववैचित्र्यमात्मनामेषाम् ॥९२॥
किमिदं किमस्य रूपं कथमिदमासीदमुष्य को हेतुः ।
इति न कदाऽपि विचिंत्यं चिन्त्यं मायेति धीमता विश्वम् ॥९३॥
दंतिनि दारुविकारे दारु तिरोभवति सोऽपि तत्रैव ।
जगति तथा परमात्मा परमात्मन्यपि जगत्तिरोधत्ते ॥९४॥
आत्मामये महति पटे विविधजगच्चित्रमात्मना लिखितम् ।
स्वयमेव केवलमसौ पश्यन्प्रमुदं प्रयाति परमात्मा ॥९४॥
चिन्मात्रममलमक्षयमद्वयमानन्दमनुभवारूढम् ।
ब्रह्मैवास्ति तदन्यन्न किमप्यस्तीति निश्चयो विदुषाम् ॥ ९६ ॥
व्यवहारस्य दशेयं विद्याऽविद्येति भेदपरिभाषा ।
नास्त्येव तत्त्वदृष्ट्या तत्त्वं ब्रह्मैव नान्यदस्त्यस्मात् ॥ ९७ ॥
अस्त्यन्यदिति मतं चेत्तदपि ब्रह्मैव चास्तितारूपम् ।
व्यतिरिक्तमस्तितायाः नास्तितया शून्यमेव तत्सिद्धम् ॥ ९८ ॥
तत्त्वावबोधशक्त्या सुस्थितया बाधिता हि सा माया ।
आदेहपातमेषां आभात्यात्माऽप्ययं निजो विदुषाम् ॥ ९९ ॥

एष विशेषो विदुषां पश्यन्तोऽपि प्रपंचसंसारम् ।
पृथगात्मनो न किंचित् पश्येयुः सकलनिगमनिर्णीतात् ॥ १०० ॥
किं चिंत्यं किमचिंत्यं किं कथनीयं किमप्यकथनीयम् ।
किं कृत्यं किमकृत्यं निखिलं ब्रह्मेति जानतां विदुषाम् ॥ १०१ ॥
निखिलं दृश्यविशेषं दृग्रूपत्वेन पश्यतां विदुषाम् ।
बंधो नाऽपि न मुक्तिर्न परात्मत्वं न चाऽपि जीवत्वम् ॥ १०२ ॥
असकृदनुचिंतितानामव्याहततरनिजोपदेशानाम् ।
प्रामाण्यपरमसीम्नां निगमनमिदमेव निखिलनिगमानाम् ॥ १०३ ॥
इति बोधितः स गुरुणा शिष्यो हृष्टः प्रणम्य तं पदयोः ।
स्वानुभवसिद्धमर्थं स्वयमेवान्तर्विचारयामास ॥ १०४ ॥
अजरोऽहमक्षरोऽहं प्राज्ञोऽहं प्रत्यगात्मबोधोऽहम् ।
परमानंदमयोऽहं परमशिवोऽहं भवामि परिपूर्णः ॥ १०५ ॥
आद्योऽहमात्मभाजामात्मानंदानुभूतिरसिकोऽहम् ।
आबालगोपमखिलैरहमित्यनुभूयमानमहिमाऽहम् ॥ १०६ ॥
इंद्रियसुखविमुखोऽहं निजसुखबोधानुभूतिभरितोऽहम् ।
इतिमतिदूरतरोऽहं भावेतरसुखनिषिक्तचित्तोऽहम् ॥ १०७ ॥
ईशोऽहमीश्वराणां ईर्ष्याद्वेषानुषंगरहितोऽहम् ।
ईक्षणविषयमतीनामीप्सितपुरुषार्थसाधनपरोऽहम् ॥ १०८ ॥
उदयोऽहमेव जगतामुपनिषदुद्यानकृतविहारोऽहम् ॥
उद्वेलशोकसागरवाडवसुखहव्यवाहनार्चिरहम् ॥ १०९ ॥
ऊर्जस्वलनिजविभवैरूर्ध्वमधस्तिर्यगश्नुवानोऽहम् ॥
ऊहापोहविचारैरुररीकृततत्त्वप्रतीयमानोऽहम् ॥ ११० ॥
ऋषिरहमृषिगणकोऽहं सृष्टिरहं सृज्यमानमहमेव ॥
ऋद्धिरहं वृद्धिरहं तृप्तिरहं तृप्तिदीपदीप्तिरहम् ॥ १११ ॥
एकोऽहमेतदीदृशमेवमिति स्फुरितभेदरहितोऽहम् ॥

एष्टव्योऽहमनीहैरंतस्सुकृतानुभूतिरहितोऽहम् ॥ ११२ ॥
ऐक्यावभासकोऽहं वाक्यपरिज्ञानपावनमतीनाम् ॥
ऐशमहमेव तत्त्वं नैशतमःप्रायमोहमिहिरोऽहम् ॥ ११३ ॥
ओजोऽहमोषधीनामोतप्रोतायमानभुवनोऽहम् ॥
ओंकारसारसोल्लसदात्मसुखामोदमत्तभृंगोऽहम् ॥ ११४ ॥
औषधमहमशुभानामौपाधिकधर्मजालरहितोऽहम् ॥
औदार्यातिशयोऽहं विविधचतुर्वर्गतारणपरोऽहम् ॥ ११५ ॥
अंकुशमहमखिलानां महत्तया मत्तवारणेंद्राणाम् ।
अंबरमिव विमलोऽहं शंबररिपुजातविकृतिरहितोऽहम् ॥ ११६ ॥
आंतमविकल्पमतीनामस्खलदुपदेशगम्यमानोऽहम् ।
अस्थिरसुखविमुखोऽहं सुस्थिरसुखबोधसंपदुचितोऽहम् ॥ ११७ ॥
करुणारसभरितोऽहं कवलितकमलासनादिलोकोऽहम् ।
कलुषाकृतिरहितोऽहं कल्मषसुकृतोपलेपरहितोऽहम् ॥ ११८ ॥
खानामगोचरोऽहं खातीतोऽहं खपुष्पभवगोऽहम् ।
खलजनदुरासदोऽहं खंडज्ञानापनोदनपरोऽहम् ॥ ११९ ॥
गलितद्वैतकथोऽहं गेहीभवदखिलमूलहृदयोऽहम् ।
गन्तव्योऽहमनीहैर्गत्यागतिरहितपूर्णबोधोऽहम् ॥ १२० ॥
घनतरविमोहतिमिरप्रकरप्रध्वंसभानुनिकरोऽहम् ।
घटिकावासररजनीवत्सरयुगकल्पकालभेदोऽहम् ॥ १२१ ॥
चरदचरदात्मकोऽहं चतुरमतिश्लाघनीयचरितोऽहम् ।
चपलजनदुर्गमोऽहं चंचलभवजलधिपारदेशोऽहम् ॥ १२२ ॥
छंदस्सिंधुनिगूढज्ञानसुखाह्लादमोदमानोऽहम् ।
छलपदविहितमतीनां छन्नोऽहं शान्तिमार्गगम्योऽहम् ॥ १२३ ॥
जलजासनादिगोचरपंचमहाभूतमूलभूतोऽहम् ।
जगदानंदकरोऽहं जन्मजरामरणरोगरहितोऽहम् ॥ १२४ ॥

झंकृतिहुंकृतिशिंजितबृंहितमुखविविधनादभेदोऽहम् ।
झटितिघटितात्मवेदनदीपपरिस्फुरितहृदयभवनोऽहम् ॥ १२५ ॥
ज्ञानमहं ज्ञेयमहं ज्ञाताऽहं ज्ञानसाधनगणोऽहम् ।
ज्ञातृज्ञानज्ञेयविनाकृतमस्तित्वमात्रमेवाहम् ॥ १२६ ॥
तत्त्वातीतपदोऽहं तनुरहमस्मीतिभावरहितोऽहम् ।
तामसदुरधिगमोऽहं तत्त्वंपदबोधबोध्यहृदयोऽहम् ॥ १२७ ॥
दैवतदैत्यनिशाचरमानवतिर्यङ्महीधरादिरहम् ।
देहेंद्रियरहितोऽहं दक्षिणपूर्वादिदिग्विभागोऽहम ॥ १२८ ॥
धर्माधर्ममयोऽहं धर्माधर्मादिबंधरहितोऽहम् ।
धार्मिकजनसुलभोऽहं धन्योऽहं धातुरादिभूतोऽहम् ॥ १२९ ॥
नामादिविरहितोऽहं नरकस्वर्गापवर्गरहितोऽहम् ।
नादान्तवेदितोऽहं नानागमनिखिलविश्वसारोऽहम् ॥ १३० ॥
परजीवभेदबाधकपरमार्थज्ञानशुद्धचित्तोऽहम् ।
प्रकृतिरहं विकृतिरहं परिणतिरहमस्मि भागधेयानाम् ॥ १३१ ॥
फणधरभूधरवारणविग्रहविधृतप्रपंचसारोऽहम् ।
फालतलोदितलोचनपावकपरिभूतपंचबाणोऽहम् ॥ १३२ ॥
बद्धो भवामि नाहं बंधान्मुक्तस्तथापि नैवाहम् ।
बोध्यो भवामि नाहं बोधोऽहं नैव बोधको नाहम् ॥ १३३ ॥
भक्तिरहं भजनमहं मुक्तिरहं मुक्तियुक्तिरहमेव ।
भूतानुशासनोऽहं भूतभवद्भव्यमूलभूतोऽहम् ॥ १३४ ॥
मान्योऽहमस्मि महतां मंदमतीनाममाननीयोऽहम् ।
मदरागमानमोहितमानसदुर्वासनादुरापोहम् ॥ १३५ ॥
यजनयजमानयाजकयागमयोऽहं यमादिरहितोऽहम् ।
यमवरुणयक्षवासवराक्षसमरुदीशवह्निरूपोऽहम् ॥ १३६ ॥
रक्षाविधानशिक्षावीक्षितलीलावलोकमहिमाऽहम् ।

रजनीदिवसाविरामस्फुरदनुभूतिप्रमाणसिद्धोऽहम् ॥ १३७ ॥
लक्षणलक्ष्यमयोऽहं लाक्षणिकोऽहं लयादिरहितोऽहम् ।
लाभालाभमयोऽहं लब्धव्यानामलभ्यमानोऽहम् ॥ १३८ ॥
वर्णाश्रमरहितोऽहं वर्णमयोऽहं वरेण्यगण्योऽहम् ।
वाचामगोचरोऽहं वचसामर्थेन गम्यमानोऽहम् ॥ १३९ ॥
शमदमविरहितमनसां शास्त्रशतैरप्यगम्यमानोऽहम् ।
शरणमहमेव विदुषां शकलीकृतविविधसंशयगणोऽहम् ॥ १४० ॥
षड्भावविरहितोऽहं षड्गुणरहितोऽहमहितरहितोऽहम् ।
षट्कोशविरहितोऽहं षट्त्रिंशत्तत्त्वजालरहितोऽहम् ॥ १४१ ॥
संवित्सुखात्मकोऽहं समाधिसंकल्पकल्पवृक्षोऽहम् ।
संसारविरहितोऽहं साक्षात्कारोऽहमात्मविद्यायाः ॥ १४२ ॥
हव्यमहं कव्यमहं हेयोपादेयभावशून्योऽहम् ।
हरिरहमस्मि हरोऽहं विधिरहमेवास्मि कारणं तेषाम् ॥ १४३ ॥
क्षालितकलुषभयोऽहं क्षपितभवक्लेशजालहृदयोऽहम् ।
क्षान्ताद्यक्षरसुघटितविविधव्यवहारमूलमहमेव ॥ १४४ ॥
बहुभिः किमेभिरुक्तैरहमेवेदं चराचरं विश्वम् ।
शीकरफेनतरंगाः सिंधोरपराणि न खलु वस्तूनि ॥ १४५ ॥
शरणं न भवति जननी न पिता न सुता न सोदरा नान्ये ।
परमं शरणमिदं स्याच्चरणं मम मूर्ध्नि देशिकन्यस्तम् ॥ १४६ ॥
आस्ते देशिकचरणं निरवधिरास्ते तदीक्षणे करुणा ।
आस्ते किमपि तदुक्तं किमतः परमस्ति जन्मसाफल्यम् ॥ १४७ ॥
कारुण्यसारसान्द्राः कांक्षितवरदानकल्पकविशेषाः ।
श्रीगुरुचरणकटाक्षाः शिशिराः शमयन्ति चित्तसंतापम् ॥ १४८ ॥
कवलितचंचलचेतोगुरुतरमंडूकजातपरितोषा ।
शेते हृदयगुहायां चिरतरमेकैव चिन्मयी भुजगी ॥ १४९ ॥

मयि सुखबोधपयोधौ महति ब्रह्मांडबुद्बुदसहस्त्रम् ।
मायामयेन मरुता भूत्वा भूत्वा पुनरितिरोधत्ते ॥ १५० ॥
गुरुकरुणयैव नावा प्राक्तनभाग्यानुकूलमारुतया ।
दुस्सहदुःखतरंगस्तुंगः संसारसागरस्तीर्णः ॥ १५१ ॥
सति तमसि मोहरूपे विश्वमपश्यं तदेतदित्यखिलम् ।
उदितवति बोधभानौ किमपि न पश्यामि किं न्विदं चित्रम्॥१५२
इत्यात्मबोधलाभं मुहुरनुचिंत्य प्रमोदमानेन ।
प्रारब्धकर्मणोऽन्ते परं पदं प्राप्यते हि कैवल्यम् ॥ १५३ ॥
मोहांधकारहरणं संसारोद्वेलसागरोत्तरणम् ।
स्वात्मनिरूपणमेतत्प्रकरणमंतर्विचिंत्यतां सद्भिः ॥ १५४ ॥

॥ इति स्वात्मनिरूपणं संपूर्णम् ॥

॥ अद्वैतानुभूतिः ॥

अहमानंदसत्यादिलक्षणः केवलः शिवः ॥
सदानंदादिरूपं यत्तेनाहमचलोऽद्वयः ॥ १ ॥
अक्षिदोषाद्यथैकोऽपि द्वयवद्भाति चंद्रमाः ॥
एकोऽप्यात्मा तथा भाति द्वयवन्मायया मृषा ॥ २ ॥
अक्षिदोषविहीनानामेक एव यथा शशी ॥
मायादोषविहीनानामात्मैवैकस्तथा सदा ॥ ३ ॥
द्वित्वं भात्यक्षिदोषेण चंद्रे स्वे मायया जगत् ॥
द्वित्वं मृषा यथा चंद्रे मृषा द्वैतं तथाऽऽत्मनि ॥ ४ ॥
आत्मनः कार्यमाकाशो विनात्मानं न संभवेत् ॥
कार्यस्य पूर्णता सिद्धा किं पुनः पूर्णतात्मनः ॥ ५ ॥
कार्यभूतो यथाकाश एक एव नहि द्विधा ॥
हेतुभूतस्तथात्मायमेक एव विजानतः ॥ ६ ॥
एकोऽपि द्वयवद्भाति यथाकाश उपाधितः ॥ ७ ।
कारणोपाधिचैतन्यं कार्यसंस्थाचितोऽधिकम् ॥
न घटाभ्रान्मृदाकाशः कुत्रचिन्नाधिको भवेत् ॥ ८ ॥
निर्गतोपाधिराकाश एक एव यथा भवेत् ॥
एक एवं तथात्मायं निर्गतोपाधिकः सदा ॥ ९ ॥
आकाशादन्य आकाश आकाशस्य यथा नहि ॥
एकत्वादात्मनो नान्य आत्मा सिध्यति चात्मनः ॥ १० ॥
मेघयोगाद्यथा नीरं करकाकारतामियात् ॥
मायायोगात्तथैवात्मा प्रपंचाकारतामियात् ॥ ११ ॥
वर्षोपल इवाभाति नीरमेवाभ्रयोगतः ॥
वर्षोपलविनाशेन नीरनाशो यथा नहि ॥ १२ ॥

आत्मैवायं तथा भाति मायायोगात्प्रपंचवत् ॥
प्रपंचस्य विनाशेन स्वात्मनाशो नहि क्वचित् ॥ १३ ॥
जलादन्य इवाभाति जलोत्थो बुद्बुदो यथा ॥
तथात्मनः पृथगिव प्रपंचोऽयमनेकधा ॥ १४ ॥
यथा बुद्बुदनाशेन जलनाशो न कर्हिचित् ॥
तथा प्रपंचनाशेन नाशः स्यादात्मनो न हि ॥ १५ ॥
अहिनिर्ल्वयनीजातः शुच्यादिर्नाहिमाप्नुयात् ॥
तथा स्थूलादिसंभूतः शुच्यादिर्नाप्नुयादिमम् ॥ १६ ॥
त्यक्तां त्वचमहिर्यद्वदात्मत्वेन न मन्यते ॥
आत्मत्वेन सदा ज्ञानी त्यक्तदेहत्रयं तथा ॥ १७ ॥
अहिनिर्ल्वयनीनाशादहेर्नाशो यथा नहि ॥
देहत्रयविनाशेन नात्मनाशस्तथा भवेत् ॥ १८ ॥
तक्रादिलवणोपेतमज्ञैर्लवणवद्यथा ॥
आत्मा स्थूलादिसंयुक्तो दृश्यते स्थूलकादिवत् ॥ १९ ॥
अयःकाष्ठादिकं यद्वद्वह्निवद्वह्नियोगतः ॥
भाति स्थूलादिकं सर्वमात्मवत्स्वात्मयोगतः ॥ २० ॥
दाहको नैव दाह्यं स्याद्दाह्यं तद्वन्न दाहकः ॥
नैवात्मायमनात्मा स्यादनात्मायं न चात्मकः ॥ २१ ॥
प्रमेयादित्रयं सार्धं भानुना घटकुड्यवत् ॥
येन भाति स एवाहं प्रमेयादिविलक्षणः ॥ २२ ॥
भानुस्फुरणतो यद्वत्स्फुरतीव घटादिकम् ॥
स्फुरतीव प्रमेयादिरात्मस्फुरणतस्तथा ॥ २३ ॥
पिष्टादिर्गुलसंपर्काद्गुलवत्प्रीतिमान्यथा ॥
आत्मयोगात्प्रमेयादिरात्मवत्प्रीतिमान्भवेत् ॥ २४ ॥
घटनीरान्नपिष्टानामुष्णत्वं वह्नियोगतः ॥

वह्निं विना कथं तेषामुष्णता स्याद्यथा क्वचित् ॥ २५ ॥
भूतभौतिकदेहानां स्फूर्तिता स्वात्मयोगतः ॥
विनात्मानं कथं तेषां स्फूर्तिता स्यात्तथा क्वचित् ॥ २६ ॥
नानाविधेषु कुंभेषु वसत्येकं नभो यथा ॥
नानाविधेषु देहेषु तद्वदेको वसाम्यहम् ॥२७ ॥
नानाविधत्वं कुंभानां न यात्येव यथा नभः ॥
नानाविधत्वं देहानां तद्वदेव न याम्यहम् ॥ २८ ॥
यथा घटेषु नष्टेषु घटाकाशो न नश्यति ॥
तथा देहेषु नष्टेषु नैव नश्यामि सर्वगः ॥ २९ ॥
उत्तमादीनि पुष्पाणि वर्तन्ते सूत्रके यथा ।
उत्तमाद्यास्तथा देहा वर्तन्ते मयि सर्वदा ॥ ३० ॥
यथा न संस्पृशेत्सूत्रं पुष्पाणामुत्तमादिता ।
तथा नैकं सर्वगं मां देहानामुत्तमादिता ॥ ३१ ।
पुष्पेषु तेषु नष्टेषु यद्वत्सूत्रं न नश्यति ।
तथा देहेषु नष्टेषु नैव नश्याम्यहं सदा ॥ ३२ ॥
पर्यंकरज्जुरंध्रेषु नानेवैकापि सूर्यभा ।
एकोऽप्यनेकवद्भाति तथा क्षेत्रेषु सर्वगः ॥ ३३ ॥
रज्जुरंध्रस्थदोषादि सूर्यभां न स्पृशेद्यथा ।
तथा क्षेत्रस्थदोषादि सर्वगं मां न संस्पृशेत् ॥ ३४ ॥
तद्रज्जुरंध्रनाशेषु नैव नश्यति सूर्यभा ।
तथा क्षेत्रविनाशेषु नैव नश्यामि सर्वगः ॥ ३५ ॥
देहो नाहं प्रदृश्यत्वाद्भौतिकत्वान्न चेंद्रियम् ।
प्राणो नाहमनेकत्वान्मनो नाहं चलत्वतः ॥ ३६ ॥
बुद्धिर्नाहं विकारित्वात्तमो नाहं जडत्वतः ।
देहेंद्रियादिकं नाहं विनाशित्वाद्घटादिवत् ॥ ३७ ॥

देहेंद्रियप्राणमनोबुद्ध्यज्ञानानि भासयन् ।
अहंकारं तथा भामि चैतेषामभिमानिनम् ॥ ३८ ॥
सर्वं जगदिदं नाहं विषयत्वादिदं धियः ।
अहं नाहं सुषुप्त्यादौ अहमः साक्षितः सदा ॥ ३९ ॥
सुप्तौ यथा निर्विकारस्तथावस्थाद्वयेऽपि च ॥
द्वयोर्मात्राभियोगेन विकारीव विभाम्यहम् ॥ ४० ॥
उपाधिनीलरक्ताद्यैः स्फटिको नैव लिप्यते ।
तथात्मा कोशजैः सर्वैः कामाद्यैर्नैव लिप्यते ॥ ४१ ॥
फालेन भ्राम्यमाणेन भ्रमतीव यथा मही ॥
अगोऽप्यात्मा विमूढेन चलतीव प्रदृश्यते ॥ ४२ ॥
देहत्रयमिदं नित्यमात्मत्वेनाभिमन्यते ।
यावत्तावदयं मूढो नानायोनिषु जायते ॥ ४३ ॥
निद्रादेहजदुःखादि जाग्रद्देहं न संस्पृशेत् ।
जाग्रद्देहजदुःखादिस्तथात्मानं न संस्पृशेत् ॥ ४४ ॥
जाग्रद्देहवदाभाति निद्रादेहस्तु निद्रया ।
निद्रादेहविनाशेन जाग्रद्देहो न नश्यति ॥ ४५ ॥
तथायमात्मवद्भाति जाग्रद्देहस्तु जागरात् ।
जाग्रद्देहविनाशेन नात्मा नश्यति कर्हिचित् ॥ ४६ ॥
हित्वायं स्वाभिकं देहं जाग्रद्देहमपेक्षते ।
जाग्रद्देहप्रबुद्धोऽयं हित्वाऽऽत्मानं यथा तथा ॥ ४७ ॥
स्वप्नभोगे यथैवेच्छा प्रबुद्धस्य न विद्यते ।
असत्स्वर्गादिके भोगे नैवेच्छा ज्ञानिनस्तथा ॥ ४८ ॥
भोक्त्रा बहिर्यथा भोग्यः सर्पो दृश्यदि कल्पितः ।
रूपशीलादयश्चाऽल्पभोगा भोग्यस्वरूपकाः ॥ ४९ ॥
ज्ञस्य नास्त्येव संसारो यद्वदज्ञस्य कर्मिणः ।

जानतो नैव भीर्यद्वद्रज्जुसर्पमजानतः ॥ ५० ॥
सैंधवस्य घनो यद्वज्जलयोगाज्जलं भवेत् ।
स्वात्मयोगात्तथा बुद्धिरात्मैव ब्रह्मवेदिनः ॥ ५१ ॥
तोयाश्रयेषु सर्वेषु भानुरेकोऽप्यनेकवत् ।
एकोऽप्यात्मा तथा भाति सर्वक्षेत्रेष्वनेकवत् ॥ ५२ ॥
भानोरन्य इवाभाति जलभानुर्जले यथा ।
आत्मनोऽन्य इवाभासो भाति बुद्धौ तथात्मनः ॥ ५३ ॥
बिंबं विना यथा नीरे प्रतिबिंबो भवेत्कथम् ।
विनात्मानं तथा बुद्धौ चिदाभासो भवेत्कथम् ॥ ५४ ॥
प्रतिबिंबचलत्वाद्या यथा बिंबस्य कर्हिचित् ॥
न भवेयुस्तथाऽऽभासकर्तृत्वाद्यास्तु नात्मनः ॥ ५५ ॥
जले शैत्यादिकं यद्वज्जलभानुं न संस्पृशेत् ।
बुद्धेः कर्मादिकं तद्वच्चिदाभासं न संस्पृशेत् ॥ ५६ ॥
बुद्धेः कर्तृत्वभोक्तृत्वदुःखित्वाद्यैस्तु संयुतः ।
चिदाभासो विकारीव शरावस्थांबुभानुवत् ॥ ५७ ॥
शरावस्थोदके नष्टे तत्स्थो भानुर्विनष्टवत् ॥
बुद्धेर्लये तथा सुप्तौ नष्टवत्प्रतिभात्ययम् ॥ ५८ ॥
जलस्थार्कं जलं चोर्मिं भासयन्भाति भास्करः ॥
आत्माभासं धियं बुद्धेः कर्तृत्वादीनयं तथा ॥ ५९ ॥
मेघावभासको भानुर्मेघच्छन्नोऽवभासते ॥
मोहावभासकस्तद्वन्मोहच्छन्नो विभात्ययम् ॥ ६० ॥
भास्यं मेघादिकं भानुर्भासयन्प्रतिभासते ॥
तथा स्थूलादिकं भास्यं भासयन्प्रतिभात्ययम् ॥ ६१ ॥
सर्वप्रकाशको भानुः प्रकाश्यैर्नैव दूष्यते ॥
सर्वप्रकाशको ह्यात्मा सर्वैस्तद्वन्न दूष्यते ॥ ६२ ॥

मुकुरस्थं मुखं यद्वन्मुखवत्प्रथते मृषा ॥
बुद्धिस्थाभासकस्तद्वदात्मवत्प्रथते मृषा ॥ ६३ ॥
मुकुरस्थस्य नाशेन मुखनाशो भवेत्कथम् ॥
बुद्धिस्थाभासनाशेन नाशो नैवात्मनः क्वचित् ॥ ६४ ॥
ताम्रकल्पितदेवादिस्ताम्रादन्य इव स्फुरेत् ॥
प्रतिभास्यादिरूपेण तथात्मोत्थमिदं जगत् ॥ ६५ ॥
ईशजीवात्मवद्भाति यथैकमपि ताम्रकम् ॥
एकोऽप्यात्मा तथैवायमीशजीवादिवन्मृषा ॥ ६६ ॥
यथेश्वरादिनाशेन ताम्रनाशो न विद्यते ॥
तथेश्वरादिनाशेन नाशो नैवात्मनः सदा ॥ ६७ ॥
अध्यस्तो रज्जुसर्पोऽयं सत्यवद्रज्जुसत्तया ॥
तथा जगदिदं भाति सत्यवत्स्वात्मसत्तया ॥ ६८ ॥
अध्यस्ताहेरभावेन रज्जुरेवावशिष्यते ॥
तथा जगदभावेन सदात्मैवावशिष्यते ॥ ६९ ॥
स्फटिके रक्तता यद्वदुपाधेर्नीलतांबरे ॥
यथा जगदिदं भाति तथा सत्यमिवाद्वये ॥ ७० ॥
स्फटिके रक्तता मिथ्या मृषा खे नीलता यथा ॥
तथा जगदिदं मिथ्या एकस्मिन्नद्वये मयि ॥ ७१ ॥
जीवेश्वरादिभावेन भेदं पश्यति मूढधीः ॥
निर्भेदे निर्विशेषेऽस्मिन्कथं भेदो भवेद्ध्रुवम् ॥ ७२ ॥
लिंगस्य धारणादेव शिवोऽयं जीवतां व्रजेत् ॥
लिंगनाशे शिवस्यास्य जीवतावेशता कुतः ॥ ७३ ॥
शिव एव सदा जीवो जीव एव सदा शिवः ॥
वेत्त्यैक्यमनयोर्यस्तु स आत्मज्ञो न चेतरः ॥ ७४ ॥
क्षीरयोगाद्यथा नीरं क्षीरवद्दृश्यते मृषा ॥

आत्मयोगादनात्मायमात्मवद्दृश्यते तथा ॥ ७५ ॥
नीरात्क्षीरं पृथक्कृत्य हंसो भवति नान्यथा ॥
स्थूलादेः संपृथक्कृत्य मुक्तो भवति नान्यथा ॥ ७६ ॥
क्षीरनीरविवेकज्ञो हंस एव न चेतरः ॥
आत्मानात्मविवेकज्ञो यतिरेव न चेतरः ॥ ७७ ॥
अध्यस्तचोरजः स्थाणोर्विकारः स्यान्नहि क्वचित् ॥
नात्मनो निर्विकारस्य विकारो विश्वजस्तथा ॥ ७८ ॥
ज्ञाते स्थाणौ कुतश्चोरश्चोराभावे भयं कुतः ॥
ज्ञाते स्वस्मिन्कुतो विश्वं विश्वाभावे कुतोऽखिलम् ॥ ७९ ॥
गुणवृत्तित्रयं भाति परस्परविलक्षणम् ॥
सत्यात्मलक्षणे यस्मिन्स एवाहं निरंशकः ॥ ८० ॥
देहत्रयमिदं भाति यस्मिन्ब्रह्मणि सत्यवत् ॥
तदेवाहं परं ब्रह्म देहत्रयविलक्षणम् ॥ ८१ ॥
जाग्रदादित्रयं यस्मिन्प्रत्यगात्मनि सत्यवत् ॥
स एवाहं परं ब्रह्म जाग्रदादिविलक्षणः ॥ ८२ ॥
विश्वादिकत्रयं यस्मिन्परमात्मनि सत्यवत् ॥
स एव परमात्माहं विश्वादिकविलक्षणः ॥ ८३ ॥
विराडादित्रयं भाति यस्मिन्साक्षिणि सत्यवत् ॥
स एव सच्चिदानंदलक्षणोऽहं स्वयंप्रभः ॥ ८४ ॥

इति अद्वैतानुभूतिः संपूर्णा ॥

॥ दशश्लोकी ॥

न भूमिर्न तोयं न तेजो न वायु–
र्न खं नेंद्रियं वा न तेषां समूहः ॥
अनैकांतिकत्वात्सुषुप्त्येकसिद्ध–
स्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ १ ॥

न वर्णा न वर्णाश्रमाचारधर्मा
न मे धारणाध्यानयोगादयोऽपि ॥
अनात्माश्रयाहं ममाध्यासहाना–
त्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ २ ॥

न माता पिता वा न देवा न लोका ।
न वेदा न यज्ञा न तीर्थं ब्रुवन्ति ॥
सुषुप्तौ निरस्तातिशून्यात्मकत्वात्
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ ३ ॥

न सांख्यं न शैवं न तत्पांचरात्रं
न जैनं न मीमांसकादेर्मतं वा ।
विशिष्टानुभूत्या विशुद्धात्मकत्वात्
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ ४ ॥

न चोर्ध्वं न चाधो न चांतर्न बाह्यं
न मध्यं न तिर्यङ् न पूर्वाऽपरा दिक् ।
वियद्व्यापकत्वादखंडैकरूप–
स्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ ५ ॥

न शुक्लं न कृष्णं न रक्तं न पीतं
न कुब्जं न पीनं न ह्रस्वं न दीर्घम् ।
अरूपं तथा ज्योतिराकारकत्वात्

तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥६॥
न शास्ता न शास्त्रं न शिष्यो न शिक्षा
न च त्वं न चाहं न चायं प्रपंचः ।
स्वरूपावबोधो विकल्पासहिष्णु-
स्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥७॥
न जाग्रन्न मे स्वप्नको वा सुषुप्ति-
र्न विश्वो न वा तैजसः प्राज्ञको वा ।
अविद्याऽऽत्मकत्वात्त्रयाणां तुरीय-
स्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥८॥
अपि व्यापकत्वाद्धि तत्त्वप्रयोगात्
स्वतस्सिद्धभावादनन्याश्रयत्वात् ।
जगत्तुच्छमेतत्समस्तं तदन्यत्
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥९॥
न चैकं तदन्यद्‌द्वितीयं कुतः स्या-
न्न वा केवलत्वं न चाकेवलत्वम् ।
न शून्यं न चाशून्यमद्वैतकत्वात्
कथं सर्ववेदान्तसिद्धं ब्रवीमि ॥१०॥

इति दशश्लोकी समाप्ता ॥

॥ प्रबोधसुधाकरः ॥

--:ॐ:--

॥ देहनिंदाप्रकरणम् ॥

नित्यानंदैकरसं सच्चिन्मात्रं स्वयंज्योतिः ॥
पुरुषोत्तममजमीशं वन्दे श्रीयादवाधीशम् ॥ १ ॥
यं वर्णयितुं साक्षाच्छ्रुतिरपि मूकेव मौनमाचरति ।
सोऽस्माकं मनुजानां किं वाचां गोचरो भवति ॥ २ ॥
यद्यप्येवं विदितं तथापि परिभाषितो भवेदेव ।
अध्यात्मशास्त्रसारैर्हरिचिंतनकीर्तनाभ्यासैः ॥ ३ ॥
क्लृप्तैर्बहुभिरुपायैरभ्यासज्ञानभक्त्याद्यैः ।
पुंसो विना विरागं मुक्तेरधिकारिता न स्यात् ॥ ४ ॥
वैराग्यमात्मबोधो भक्तिश्चेति त्रयं गदितम् ।
मुक्तेः साधनमादौ तत्र विरागो वितृष्णता प्रोक्ता ॥ ५ ॥
सा चाहंममताभ्यां प्रच्छन्ना सर्वदेहेषु ।
तत्राहंता देहे ममता भार्यादिविषयेषु ॥ ६ ॥
देहः किमात्मकोऽयं कः संबंधोऽस्य वा विषयैः ।
एवं विचार्यमाणेऽहंताममते निवर्तेते ॥ ७ ॥
स्त्रीपुंसोः संयोगात्संपाते शुक्रशोणितयोः ।
प्रविशञ्जीवः शनकैः स्वकर्मणा देहमाधत्ते ॥ ८ ॥
मातृगुरूदरदर्यां कफमूत्रपुरीषपूर्णायाम् ।
जठराग्निज्वालाभिर्नवमासं पच्यते जंतुः ॥ ९ ॥
दैवात्प्रसूतिसमये शिशुस्तिरश्चीनतां यदा याति ।
शस्त्रैर्विखंडय स तदा बहिरिह निष्कास्यतेऽतिबलात् ॥ १० ॥
अथवा यंत्रच्छिद्राद्यदा तु निःसार्यते प्रबलैः ।
प्रसवसमीरैश्च तदा यः क्लेशः सोऽप्यनिर्वाच्यः ॥ ११ ॥

आधिव्याधिवियोगात्मीयविपत्कलहदीर्घदारिद्यैः ।
जन्मानंतरमपि यः क्लेशः किं शक्यते वक्तुम् ॥ १२ ॥
नरपशुविहंगतिर्यग्योनीनां चतुरशीतिलक्षाणाम् ।
कर्मनिबद्धो जीवः परिभ्रमन्यातना भुंक्ते ॥ १३ ॥
चरमस्तत्र नृदेहस्तत्रोज्जन्मान्वयोत्पत्तिः ।
स्वकुलाचारविचारः श्रुतिप्रचारश्च तत्रापि ॥ १४ ॥
आत्मानात्मविवेको नो देहस्य च विनाशिताज्ञानम् ।
एवं सति स्वमायुः प्राज्ञैरपि नीयते मिथ्या ॥ १५ ॥
आयुःक्षणलवमात्रं न लभ्यते हेमकोटिभिः क्वापि ।
तच्चेद्गच्छति सर्वं मृषा ततः काधिका हानिः ॥ १६ ॥
नरदेहातिक्रमणात्प्राप्तौ पश्वादिदेहानाम् ।
स्वतनोरप्यज्ञाने परमार्थस्यात्र का वार्ता ॥ १७ ॥
सततं प्रवाह्यमानैर्वृषभैरश्वैः खरैर्गजैर्महिषैः ।
हा कष्टं क्षुत्क्षामैः श्रांतैर्नो शक्यते वक्तुम् ॥ १८ ॥
रुधिरत्रिधातुमज्जामेदोमांसास्थिसंहतिर्देहः ।
स बहिस्त्वचा पिनद्धस्तस्मान्नो भक्ष्यते काकैः ॥ १९ ॥
नासाग्राद्वदनाद्वा कफं मलं पायुतो विसृजन् ।
स्वयमेवैति जुगुप्सामंतः प्रसृतं च नो वेत्ति ॥ २० ॥
पथि पतितमस्थि दृष्ट्वा स्पर्शभयादन्यमार्गतो याति ।
नो पश्यति निजदेहं चास्थिसहस्रावृतं परितः ॥ २१ ॥
केशावधिनखराग्रादिदमंतः पूतिगंधसंपूर्णम् ।
बहिरपि चागरुचंदनकर्पूराद्यैर्विलेपयति ॥ २२ ॥
यत्नादस्य पिधत्ते स्वाभाविकदोषसंघातम् ।
औपाधिकगुणनिवहं प्रकाशयञ्श्लाघते मूढः ॥ २३ ॥
क्षतमुत्पन्नं देहे यदि न प्रक्षाल्यते त्रिदिनम् ।

तत्रोत्पतन्ति वहवः कृमयो दुर्गंधसंकीर्णाः ॥ २४ ॥
यो देहः सुप्तोऽभूत्सुपुष्पशय्योपशोभिते तल्पे ।
संप्रति स रज्जुकाष्ठैर्नियंत्रितः क्षिप्यते वह्नौ ॥ २५ ॥
सिंहासनोपविष्टं दृष्ट्वा यं मुदमवाप लोकोऽयम् ।
तं कालाकृष्टतनुं विलोक्य नेत्रे निमीलयति ॥ २६ ॥
एवंविधोऽतिमलिनो देहो यत्सत्तया चलति ।
तं विस्मृत्य परेशं वहत्यहंतामनित्येऽस्मिन् ॥ २७ ॥
क्वात्मा सच्चिद्रूपः क्व मांसरुधिरास्थिनिर्मितो देहः ।
इति यो लज्जति धीमानितरशरीरं स किं मनुते ॥ २८ ॥

विषयानिंदाप्रकरणम् ।

मूढः कुरुते विषयजकर्दमसंमार्जनं मिथ्या ॥
दूरदृष्टवृष्टिविरसो देहो गेहं पतत्येव ॥ २९ ॥
भार्या रूपविहीना मनसः क्षोभाय जायते पुंसाम् ॥
अत्यंतं रूपाढ्या सा परपुरुषैर्वशीक्रियते ॥ ३० ॥
यः कश्चित्परपुरुषो मित्रं भृत्योऽथवा भिक्षुः ॥
पश्यति हि साभिलाषं विलक्षणोदाररूपवतीम् ॥ ३१ ॥
यं कंचित्पुरुषवरं स्वभर्तुरतिसुंदरं दृष्ट्वा ॥
मृगयति किं न मृगाक्षी मनसेव परस्त्रियं पुरुषः ॥ ३२ ॥
एवं सुरूपनार्या भर्ता कोपात्प्रतिक्षणं क्षीणः ॥
नो लभते सुखलेशं बलिमिव बलिभुग्बहुष्वेकः ॥ ३३ ॥
वनिता नितांतमज्ञा स्वाज्ञामुल्लंघ्य वर्तते यदि सा ॥
शत्रोरप्यधिकतरा पराभिलाषिण्यसौ किमुत ॥ ३४ ॥
लोको नापुत्रस्यास्तीति श्रुत्यास्य कः प्रभाषितो लोकः ॥
मुक्तिः संसरणं वा तदन्यलोकोऽथवा नाद्यः ॥ ३५ ॥
सर्वेऽपि पुत्रभाजस्तन्मुक्तौ संसृतिर्भवति ॥

श्रवणादयोऽप्युपाया मृषा भवेयुस्तृतीयेऽपि ॥ ३६ ॥
तत्प्राप्त्युपायसत्त्वाद् द्वितीयपक्षेऽप्यपुत्रस्य ॥
पुत्रेष्ट्यादिकयागप्रवृत्तये वेदवादोऽयम् ॥ ३७ ॥
नानाशरीरकष्टैर्धनव्ययैः साध्यते पुत्रः ॥
उत्पन्नमात्रपुत्रे जीवितचिंता गरीयसी तस्य ॥ ३८ ॥
जीवन्नपि किं मूर्खः प्राज्ञः किंवा सुशीलभाग्भविता ॥
जारश्चौरः पिशुनः पतितो द्यूतप्रियः क्रूरः ॥ ३९ ॥
पितृमातृबंधुघाती मनसः खेदाय जायते पुत्रः ॥
चिंतयति तातनिधनं पुत्रो द्रव्याद्यधीशताहेतोः ॥ ४० ॥
सर्वगुणैरुपपन्नः पुत्रः कस्यापि कुत्रचिद्भवति ॥
सोऽल्पायू रुग्णो वा ह्यनपत्यो वा तथापि खेदाय ॥ ४१ ॥
पुत्रात्सद्गतिरिति चेत्तदपि प्रायोऽस्ति युक्त्यसहम् ॥
इत्थं शरीरकष्टैर्दुःखं संप्रार्थ्यते मूढैः ॥ ४२ ॥
पितृमातृबंधुभगिनीपितृव्यजामातृमुख्यानाम् ॥
मार्गस्थानामिव युतिरनेकयोनिभ्रमात्क्षणिका ॥ ४३ ॥
दैवं यावद्विपुलं यावत्प्रचुरः परोपकारश्च ॥
तावत्सर्वे सुहृदो व्यत्ययतः शत्रवः सर्वे ॥ ४४ ॥
अश्नन्ति चेदनुदिनं बंदिन इव वर्णयन्ति संतृप्ताः ॥
तच्चेद् द्वित्रदिनांतरमभिनिंदंतः प्रकुप्यन्ति ॥ ४५ ॥
दुर्भरजठरनिमित्तं समुपार्जयितुं प्रवर्तते चित्तम् ॥
लक्षावधि बहुवित्तं तथाप्यलभ्यं कपर्दिकामात्रम् ॥ ४६ ॥
लब्धश्चेदधिकोऽर्थः पत्न्यादीनां भवेत्स्वार्थैः ॥
नृपचौरतोऽप्यनर्थस्तस्माद्द्रव्योद्यमो व्यर्थः ॥ ४७ ॥
अन्यायमर्थभाजं पश्यति भूतोऽध्वगामिनं चौरः ॥
पिशुनो व्यसनप्राप्तिं दायादानां गणः कलहम् ॥ ४८ ॥

पातकभरैरनेकैरर्थं समुपार्जयन्ति राजानः ॥
अश्वमतंगजहेतोः प्रतिक्षणं नाश्यते सोऽर्थः ॥ ४९ ॥
राज्यांतराभिगमनाद्रणभंगान्मंत्रिभृत्यदोषाद्वा ॥
विषशस्त्रगुप्तघातान्मग्नाश्चिंतार्णवे भूपाः ॥ ५० ॥

मनोनिंदाप्रकरणम् ।

हसति कदाचिद्रौति भ्रांतं सदश दिशो भ्रमति ॥
हृष्टं कदापि रुष्टं शिष्टं दुष्टं च निंदति स्तौति ॥ ५१ ॥
किमपि द्वेष्टि सरोषं ह्यात्मानं श्लाघते कदाचिदपि ॥
चित्तं पिशाचमभवद्राक्षस्या तृष्णया व्याप्तम् ॥ ५२ ॥
दंभाभिमानलोभैः कामक्रोधोरुमत्सरैश्चेतः ॥
आकृष्यते समंताच्छ्वभिरिव पतितास्थिवन्मार्गे ॥ ५३ ॥
तस्माच्छुद्धविरागो मनोऽभिलषितं त्यजेदर्थम् ॥
तदनभिलषितं कुर्यान्निर्व्यापारं ततो भवति ॥ ५४ ॥

विषयनिग्रहप्रकरणम् ।

संसृतिपारावारे ह्यगाधविषयोदकेन संपूर्णे ॥
नृशरीरमंबुतरणं कर्मसमीरैरितस्ततश्चलति ॥ ५५ ॥
छिद्रैर्नवभिरुपेतं जीवो नौकापतिर्महानलसः ॥
छिद्राणामनिरोधाज्जलपरिपूर्णं पतत्यधः सततम् ॥ ॥ ५६ ॥
छिद्राणां तु निरोधात्सुखेन पारं परं याति ॥
तस्मादिंद्रियनिग्रहमृते न कश्चित्तरत्यनृतम् ॥ ५७ ॥
पश्यति परस्य युवतिं सकाममपि तन्मनोरथं कुरुते ॥
ज्ञात्वैव तदप्राप्तिं व्यर्थं मनुजोऽतिपापभाग्भवति ॥ ५८ ॥
पिशुनैः प्रकाममुदितां परस्य निंदां शृणोति कर्णाभ्याम् ॥
तेन परः किं म्रियते व्यर्थं मनुजोऽतिपापभाग्भवति ॥ ५९ ॥
अनृतं परापवादं रसना वदति प्रतिक्षणं तेन ॥

परहानिर्लब्धिः का व्यर्थं मनुजोऽतिपापभाग्भवति ॥ ६० ॥
विषयेंद्रिययोर्योगे निमिषसमयेन यत्सुखं भवति ।
विषये नष्टे दुःखं यावज्जीवं च तत्तयोर्मध्ये ॥ ६१ ॥
हेयमुपादेयं वा प्रविचार्य सुनिश्चितं तस्मात् ।
अल्पसुखस्य त्यागादनल्पदुःखं जहाति सुधीः ॥ ६२ ॥
धीवरदत्तमहामिषमश्नन्वैसारिणो म्रियते ।
तद्वद्विषयान्भुंजन्कालाक्कृष्टो नरः पतति ॥ ६३ ॥
उरगग्रस्तार्धतनुर्भेकोऽश्नातीह मक्षिकाः शतशः ।
एवं गतायुरपि सन्विषयान्समुपार्जयत्यंधः ॥ ६४ ॥

मनोनिग्रहप्रकरणम्

स्वीयोद्गमतोयवहा सागरमुपयाति नीचमार्गेण ।
सा चेदुद्गम एव स्थिरा सती किं न याति वार्धित्वम् ॥ ६५ ॥
एवं मनः स्वहेतुं विचारयत्सुस्थिरं भवेदंतः ।
न बहिर्वोदेति तदा किं नात्मत्वं स्वयं याति ॥ ६६ ॥
वर्षास्वंभःप्रचयात्कूपे गुरुनिर्झरे पयः क्षारम् ।
ग्रीष्मेणैव तु शुष्के माधुर्यं भजति तत्रांभः ॥ ६७ ॥
तद्वद्विषयोद्रिक्तं तमःप्रधानं मनः कलुषम् ।
तस्मिन्विरागशुष्के शनकैराविर्भवेत्सत्त्वम् ॥ ६८ ॥
यं विषयमपि लषित्वा धावति बाह्येंद्रियद्वारा ।
तस्याप्राप्तौ खिद्यति तथा यथा स्वं गतं किंचित् ॥ ६९ ॥
नगनगरदुर्गदुर्गमसरितः परितः परिभ्रमन्नेतः ।
यदि नो लभते विषयं विषयंत्रितमिव खिन्नमायाति ॥ ७० ॥
तुंबीफलं जलांतर्बलादधः क्षिप्तमप्युपैत्यूर्ध्वम् ।
तद्वन्मनः स्वरूपे निहितं यत्नाद्बहिर्याति ॥ ७१ ॥
इह वा पूर्वभवे वा स्वकर्मणैवार्जितं फलं यद्यत् ।

शुभमशुभं वा तत्तद्भोगोऽप्यप्रार्थितो भवति ॥ ७२ ॥
चेतः पशुमशुभपथं प्रधावमानं निराकर्तुम् ।
वैराग्यमेकमुचितं गलकाष्ठं निर्मितं धात्रा ॥ ७३ ॥
निद्रावसरे यत्सुखमेतत्किं विषयजं यस्मात् ।
न हि चेंद्रियप्रदेशावस्थानं चेतसो निद्रा ॥ ७४ ॥
अद्वारतुंगकुड्ये गृहेऽवरुद्धो यथा व्याघ्रः ॥
बहुनिर्गमप्रयत्नैः श्रांतस्तिष्ठति पतञ्श्वसंश्च तथा ॥ ७५ ॥
सर्वेंद्रियावरोधादुद्योगशतैरनिर्गमं वीक्ष्य ।
शांतं तिष्ठति चेतो निरुद्यमत्वं तदा याति ॥ ७६ ॥
प्राणस्पंदनिरोधात्सत्संगाद्वासनात्यागात् ।
हरिचरणभक्तियोगान्मनः स्ववेगं जहाति शनैः ॥ ७७ ॥

वैराग्यप्रकरणम् ।

परगृहगृहिणीपुत्रद्रविणानामागमे विनाशे वा ।
कथितौ हर्षविषादौ किंवा स्यातां क्षणं स्थातुः ॥ ७८ ॥
दैवात्स्थितं गतं वा यं कंचिद्विषयमीड्यमल्पं वा ।
नो तुष्यन्न च सीदन्वीक्ष्य गृहेष्वतिथिवन्निवसेत् ॥ ७९ ॥
ममताभिमानशून्यो विषयेषु पराङ्मुखः पुरुषः ।
तिष्ठन्नपि निजसदने न बाध्यते कर्मभिः क्वापि ॥ ८० ॥
कुत्राप्यरण्यदेशे सुनीलतृणवालुकोपचिते ।
शीतलतरुतलभूमौ सुखं शयानस्य पुरुषस्य ॥ ८१ ॥
तरवः पत्रफलाढ्याः सुगंधशीतानिलाः परितः ।
कलकूजितवरविहगाः सरितो मित्राणि किं न स्युः ॥ ८२ ॥
वैराग्यभाग्यभाजः प्रसन्नमनसो निराशस्य ।
अप्रार्थितफलभोक्तुः पुंसो जन्मनि कृतार्थतेह स्यात् ॥ ८३ ॥
द्रव्यं पल्लवतश्च्युतं यदि भवेत्क्वापि प्रमादात्तदा

शोकायाथ तदर्पितं श्रुतवते तोषाय च श्रेयसे ॥
स्वातंत्र्याद्विषयाः प्रयान्ति यदमी शोकाय ते स्युश्चिरं
संत्यक्ताः स्वयमेव चेत्सुखमयं निःश्रेयसं तन्वते ॥ ८४ ॥
विस्मृत्यात्मनिवासमुत्कटभवाटव्यां चिरं पर्यट-
न्संतापत्रयदीर्घदावदहनज्वालावलीव्याकुलः ॥
वल्गन्फल्गुषु सुप्रदीप्तनयनश्चेतःकुरंगो बला-
दाशापाशवशीकृतोऽपि विषयव्याधैर्मृषा हन्यते ॥ ८५ ॥

आत्मसिद्धिप्रकरणम् ।

उत्पन्नेऽपि विरागे विना प्रबोधं सुखं न स्यात् ।
स भवेद्गुरूपदेशात्तस्माद्गुरुमाश्रयेत्प्रथमम् ॥ ८६ ॥
यद्यपि जलधेरुदकं यद्यपि वा प्रेरकोऽनिलस्तत्र ।
तदपि पिपासाकुलितः प्रतीक्षते चातको मेघम् ॥ ८७ ॥
त्रेधा प्रतीतिरुक्ता शास्त्राद्गुरुतस्तथात्मनस्तत्र ।
शास्त्रप्रतीतिरादौ यद्वन्मधुरो गुडोऽस्तीति ॥ ८८ ॥
अग्रे गुरुप्रतीतिर्दूराद्गुडदर्शनं यद्वत् ॥
आत्मप्रतीतिरस्माद्गुडभक्षणजं सुखं यद्वत् ॥ ८९ ॥
रसगंधरूपशब्दस्पर्शा अन्ये पदार्थाश्च ॥
कस्मादनुभूयन्ते नो देहान्नेंद्रियग्रामात् ॥ ९० ॥
मृतदेहेंद्रियवर्गो यतो न जानाति दाहजं दुःखम् ॥
प्राणश्चेन्निद्रायां तस्करबाधां स किं वेत्ति ॥ ९१ ॥
मनसो यदि वा विषयस्तद्युगपत्किं न जानाति ॥
तस्य पराधीनत्वाद्यतः प्रमादस्य कस्त्राता ॥ ९२ ॥
गाढध्वांतगृहांततः क्षितितले दीपं निधायोज्ज्वलं
पंचच्छिद्रमधोमुखं हि कलशं तस्योपरि स्थापयेत् ॥
तद्बाह्ये परितोऽनुरंध्रममलां वीणां च कस्तूरिकां

सद्रत्नं व्यजनं न्यसेच्च कलशश्छिद्राध्वनिर्गच्छत्ताम् ॥ ९३ ॥
तेजोंऽशेन पृथक्पदार्थनिवहज्ञानं हि यज्जायते
तद्रंध्रैः कलशेन वा किमु मृदो भांडेन तैलेन वा ॥
किं सूत्रेण न चैतदस्ति रुचिरं प्रत्यक्षबाधादतो
दीपज्योतिरिहैकमेव शरणं देहे तथात्मा स्थितः ॥ ९४ ॥

मायासिद्धिप्रकरणम् ।

चिन्मात्रः परमात्मा ह्यपश्यदात्मानमात्मतया ॥
अभवत्सोऽहंनामा तस्मादासीद्भिदो मूलम् ॥ ९५ ॥
द्वेधैव भाति तस्मात्पतिश्च पत्नी च तौ भवेतां वै ॥
तस्मादयमाकाशस्त्रिधैव परिपूर्यते सततम् ॥ ९६ ॥
सोऽयमपीक्षांचक्रे ततो मनुष्या अजायन्त ॥
इत्युपनिषदः प्राहुर्दयितां प्रति याज्ञवल्क्योक्त्या ॥ ९७ ॥
चिरमानंदानुभवात्सुषुप्तिरिव काप्यवस्थाऽभूत् ॥
परमात्मनस्तु तस्मात्स्वप्नवदेवोत्थिता माया ॥ ९८ ॥
सदसद्विलक्षणासौ परमात्मसदाश्रयानादिः ॥
सा च गुणत्रयरूपा सूते सचराचरं विश्वम् ॥ ९९ ॥
माया तावददृश्या दृश्यं कार्यं कथं जनयेत् ॥
तंतुभिरदृश्यरूपैः परोऽत्र दृश्यः कथं भवति ॥ १०० ॥
स्वप्ने सुरतानुभवाच्छुक्रद्रावो यथा शुभे वसने ॥
अनृतं रतं प्रबोधे वसनोपहतिर्भवेत्सत्या ॥ १०१ ॥
स्वप्ने पुरुषः सत्यो योषिदसत्या तयोर्युतिश्च मृषा ॥
शुक्रद्रावः सत्यस्तद्वत्प्रकृतेऽपि संभवति ॥ १०२ ॥
एवमदृश्या माया तत्कार्यं जगदिदं दृश्यम् ॥
माया तावदियं स्याद्या स्वविनाशेन हर्षदा भवति ॥ १०३ ॥
रजनीवातिदुरंता न लक्ष्यतेऽत्र स्वभावोऽस्याः ॥

सौदामिनीव नश्यति मुनिभिः संप्रेक्ष्यमाणैव ॥ १०४ ॥
माया ब्रह्मोपगताऽविद्या जीवाश्रया प्रोक्ता ॥
चिदचिद्ग्रंथिश्चेतस्तदक्षयं ज्ञेयमा मोक्षात् ॥ १०५ ॥
घटमठकुड्यैरावृतमाकाशं तत्तदाह्वयं भवति ॥
तद्वदविद्यावृतमिह चैतन्यं जीव इत्युक्तः ॥ १०६ ॥
ननु कथमावरणं स्यादज्ञानं ब्रह्मणो विशुद्धस्य ॥
सूर्यस्येव तमिस्रं रात्रिभवं स्वप्रकाशस्य ॥ १०७ ॥
दिनकरकिरणोत्पन्नैर्मेघैराच्छाद्यते यथा सूर्यः ॥
न खलु दिनस्य दिनत्वं तैर्विकृतैः सांद्रसंघातैः ॥ १०८ ॥
अज्ञानेन तथात्मा शुद्धोऽपि च्छाद्यते सुचिरम् ॥
न परं तु लोकसिद्धा प्राणिषु तच्चेतनाशक्तिः ॥ १०९ ॥

लिंगदेहादिनिरूपणप्रकरणम् ।

स्थूलशरीरस्यांतर्लिंगशरीरं च तस्यांतः ॥
कारणमस्याप्यंतस्ततो महाकारणं तुर्यम् ॥ ११० ॥
स्थूलं निरूपितं प्रागधुना सूक्ष्मादितो ब्रूमः ॥
अंगुष्ठमात्रः पुरुषः श्रुतिरिति यत्प्राह तत्सूक्ष्मम् ॥ १११ ॥
सूक्ष्माणि महाभूतान्यसवः पंचेंद्रियाणि पंचैव ॥
षोडशमंतःकरणं तत्संघातो हि लिंगतनुः ॥ ११२ ॥
तत्कारणं स्मृतं यत्तस्यांतर्वासनाजालम् ॥
तस्य प्रवृत्तिहेतुर्बुद्ध्याश्रयमत्र तुर्यं स्यात् ॥ ११३ ॥
तत्सारभूतबुद्धौ यत्प्रतिफलितं तु शुद्धचैतन्यम् ॥
जीवः स उक्त आद्यैर्योऽहमिति स्फूर्तिकृद्वपुषि ॥ ११४ ॥
चरतरतरंगसंगात्प्रतिबिंबं भास्करस्य च चलं स्यात् ॥
अस्ति तथा चंचलता चैतन्ये चित्तचांचल्यात् ॥ ११५ ॥
नन्वर्कप्रतिबिंबः सलिलादिषु यः स चावभासयति ॥

किमितरपदार्थनिवहं प्रतिबिंबोऽप्यात्मनस्तद्वत् ॥ ११६ ॥
प्रतिफलितं यत्तेजः सवितुः कांस्यादिपात्रेषु ॥
तदनु प्रविष्टमंतर्गृहमन्यार्थान्प्रकाशयति ॥ ११७ ॥
चित्प्रतिबिंबस्तद्वद्बुद्धिषु यो जीवतां प्राप्तः ॥
नेत्रादींद्रियमार्गैर्बहिरर्थान्सोऽवभासयति ॥ ११८ ॥

अद्वैतप्रकरणम् ।

तदिदं य एवमार्यो वेद ब्रह्माहमस्मीति ॥
स इदं सर्वं च स्यात्तस्य हि देवाश्च नेशते भूत्या ॥ ११९ ॥
येषां स भवत्यात्मा योऽन्यामथ देवतामुपास्ते यः ॥
अहमन्योऽसावन्यश्चेत्थं यो वेद पशुवत्सः ॥ १२० ॥
इत्युपनिषदामुक्तिस्तथा श्रुतिर्भगवदुक्तिश्च ॥
ज्ञानी त्वात्मैवेयं मतिर्ममेत्यत्र युक्तिरपि ॥ १२१ ॥
ऋजु वक्रं वा काष्ठं हुताशदग्धं सदग्नितां याति ॥
तत्किं हस्तग्राह्यं ऋजुवक्राकारसत्त्वेऽपि ॥ १२२ ॥
एवं य आत्मनिष्ठो ह्यात्माकारश्च जायते पुरुषः ।
देहीव दृश्यतेऽसौ परं त्वसौ केवलो ह्यात्मा ॥ १२३ ॥
प्रतिफलति भानुरेकोऽनेकशरावोदकेषु यथा ॥
तद्वदसौ परमात्मा ह्येकोऽनेकेषु देहेषु ॥ १२४ ॥
दैवादेकशरावे भग्ने किं वा विलीयते सूर्यः ॥
प्रतिबिंबचंचलत्वादर्कः किं चंचलो भवति ॥ १२५ ॥
स्वव्यापारं कुरुते यथैकसवितुः प्रकाशेन ॥
तद्वच्चराचरमिदं ह्येकात्मसत्तया चलति ॥ १२६ ॥
येनोदकेन कदलीचंपकजात्यादयः प्रवर्धन्ते ॥
मूलकपलांडुलशुनास्तेनैवैते विभिन्नरसगंधाः ॥ १२७ ॥
एको हि सूत्रधारः काष्ठप्रकृतीरनेकशो युगपत् ॥

स्तंभाग्रपट्टिकायां नर्तयतीह प्रगूढतया ॥ १२८ ॥
गुडखंडशर्कराद्या भिन्नाः स्युर्विकृतयो यथैकेक्षोः ॥
केयूरकंकणाद्या यथैकहेम्नो भिदाश्च पृथक् ॥ १२९ ॥
एवं पृथक्स्वभावं पृथगाकारं पृथग्वृत्ति ॥
जगदुच्चावचमुच्चैरेकेनैवात्मना चलति ॥ १३० ॥
स्कंधधृतसिद्धमन्नं यावन्नाश्नाति मार्गगस्तावत् ॥
स्पर्शभयक्षुत्पीडे तस्मिन्भुक्ते न ते भवतः ॥ १३१ ॥
मानुषमतंगमहिषश्वसूकरादिष्वनुस्यूतम् ॥
यः पश्यति जगदीशं स एव भुंक्तेऽद्वयानंदम् ॥ १३२ ॥

कर्तृत्वभोक्तृत्वप्रकरणम् ।

यद्वत्सूर्येऽभ्युदिते स्वव्यवहारं जनः कुरुते ॥
तं न करोति विवस्वान्न कारयति तद्वदात्मापि ॥ १३३ ॥
लोहे हुतभुग्व्याप्ते लोहांतरताड्यमानेऽपि ॥
तस्यांतर्गतवह्नेः किं स्यान्निर्घातजं दुःखम् ॥ १३५ ॥
निष्ठुरकुठारघातैः काष्ठे संछेद्यमानेऽपि ॥
अंतर्वर्ती वह्निः किं घातैश्छेद्यते तद्वत् ॥ १३५ ॥
तनुसंबंधाज्जातैः सुखदुःखैर्लिप्यते नात्मा ॥
ब्रूते श्रुतिरपि भूयोऽनश्नन्नन्योऽभिचाकशीत्यादि ॥ १३३ ॥
निशि वेश्मनि प्रदीपे दीप्यंति चौरस्तु वित्तमपहरति ॥
ईरयति वारयति वा तं दीपः किं तथात्मापि ॥ १३७ ॥
गेहांते दैववशात्कस्मिंश्चित्समुदिते विपन्ने वा ॥
दीपस्तुष्यत्यथवा खिद्यति किं तद्वदात्मापि ॥ १३८ ॥

स्वप्रकाशताप्रकरणम् ।

रविचंद्रवह्निदीपप्रमुखाः स्वपरप्रकाशाः स्युः ॥
यद्यपि तथाप्यमीभिः प्रकाश्यते क्वापि नैवात्मा ॥ १३९ ॥

चक्षुर्द्वारैव स्यात्परात्मना भानमेतेषाम् ॥
यद्वा तेऽपि पदार्था न ज्ञायन्तेऽथ केवलालोकात् ॥ १४० ॥
तत्राप्यक्षिद्वारा सहायभूतो न चेदात्मा ॥
नो चेत्सत्यालोके पश्यत्यंधः कथं नार्थान् ॥ १४१ ॥
सत्यात्मन्यपि किं नो ज्ञानं तच्चेंद्रियांतरेण स्यात् ॥
अंधे दृक्प्रतिबंधे करसंबंधे पदार्थभानं हि ॥ १४२ ॥
जानाति येन सर्वं केन च तं वा विजानीयात् ॥
इत्युपनिषदामुक्तिर्विध्यत आत्मात्मना तस्मात् ॥ १४३ ॥

नादानुसंधानम् ।

यावत्क्षणं क्षणार्धं स्वरूपपरिचिंतनं क्रियते ॥
तावद्दक्षिणकर्णे त्वनाहतः श्रूयते शब्दः ॥ १४४ ॥
सिद्ध्यारंभस्थिरताविश्रमविश्वासबीजशुद्धीनाम् ॥
उपलक्षणं हि मनसः परमं नादानुसंधानम् ॥ १४५ ॥
भेरीमृदंगशंखाद्याहतनादे मनः क्षणं रमते ॥
किं पुनरनाहतेऽस्मिन्मधुमधुरेऽखंडिते स्वच्छे ॥ १४६ ॥
चित्तं विषयोपरमाद्यथा यथा याति नैश्चल्यम् ॥
वेणोरिव दीर्घतरस्तथा तथा श्रूयते नादः ॥ १४७ ॥
नादाभ्यंतर्वर्ति ज्योतिर्यद्वर्तते हि चिरम् ॥
तत्र मनो लीनं चेन्न पुनः संसारबंधाय ॥ १४८ ॥
परमानंदानुभवात्सुचिरं नादानुसंधानात् ।
श्रेष्ठश्चित्तलयोऽयं सत्स्वन्यलयेष्वनेकेषु ॥ १४९ ॥

मनोलयः ।

संसारतापतप्तं नानायोनिभ्रमात्परिश्रांतम् ।
लब्ध्वा परमानंदं न चलति चेतः कदा क्वापि ॥ १५० ॥
अद्वैतानंदभरात्किमिदं कोऽहं च कस्याहम् ।

इति मंथरतां यातं यदा तदा मूर्छितं चेतः ॥ १५१ ॥
चिरतरमात्मानुभवादात्माकारं प्रजायते चेतः ।
सरिदिव सागरयाता समुद्रभावं प्रयात्युच्चैः ॥ १५२ ॥
आत्मन्यनुप्रविष्टं चित्तं नापेक्षते पुनर्विषयान् ।
क्षीरादुद्धृतमाज्यं यथा पुनः क्षीरतां न यातीह ॥ १५३ ॥
दृष्टौ द्रष्टरि दृश्ये यदनुस्यूतं च भानमात्रं स्यात् ॥
तत्रोपक्षीणं चेच्चित्तं तन्मूर्छितं भवति ॥ १५४ ॥
याति स्वसंमुखत्वं दृङ्मात्रे वा यदा तदा भवति ।
दृश्यद्रष्टृविभेदो ह्यसंमुखेऽस्मिन्न तद्भवति ॥ १५५ ॥
एकस्मिन्दृङ्मात्रे त्रेधा द्रष्ट्रादिकं हि समुदेति ।
त्रिविधे तस्मिँल्लीने दृङ्मात्रं शिष्यते पश्चात् ॥ १५६ ॥
दर्पणतः प्राक्पश्चादस्ति मुखं प्रतिमुखं तदाभाति ।
आदर्शेऽपि च नष्टे मुखमस्ति मुखे तथैवात्मा ॥ १५७ ॥

प्रबोधः ।

माधुर्यं गुडपिंडे यत्तत्तस्यांशकेऽणुमात्रेऽपि ।
एवं न पृथग्भावो गुडत्वमधुरत्वयोरस्ति ॥ १५८ ॥
अथवा न भिन्नभावः कर्पूरामोदयोरेवम् ।
आत्मस्वरूपमनसां पुंसां जगदात्मतां याति ॥ १५९ ॥
यद्भावानुभवः स्यान्निद्रादौ जागरस्यांते ।
अंतः स चेत्स्थिरः स्याल्लभते हि तदाऽद्वयानंदम् ॥ १६० ॥
अतिगंभीरेऽपारे ज्ञानचिदानंदसागरे स्फारे ।
कर्मसमीरणतरला जीवतरंगावलिः स्फुरति ॥ १६१ ॥
खरतरकरैः प्रदीप्तेऽभ्युदिते चैतन्यतिग्मांशौ ।
स्फुरति मृषैव समंतादनेकविधजीवमृगतृष्णा ॥ १६२ ॥
अंतरदृष्टे यस्मिञ्जगदिदमारात्परिस्फुरति ।

दृष्टे यस्मिन्सकृदपि विलीयते क्वाप्यसद्रूपम् ॥ १६३ ॥
बाह्याभ्यंतरपूर्णः परमानंदार्णवे निमग्नो यः ।
चिरमाप्लुत इव कलशो महाह्रदे जह्नुतनयायाः ॥ १६४ ॥
पूर्णात्पूर्णतरे परात्परतरेऽप्यज्ञातपारे हरौ ।
संवित्स्फारसुधार्णवे विरहिते वीचीतरंगादिभिः ।
भास्वत्कोटिविकासितोज्ज्वलदिगाकाशप्रकाशे परे
स्वानंदैकरसे निमग्नमनसां न त्वं न चाहं जगत् ॥ १६५ ॥

द्विधाभक्तिः ।

चित्ते सत्त्वोत्पत्तौ तडिदिव बोधोदयो भवति ।
तर्ह्येव स स्थिरः स्याद्यदि चित्तं शुद्धिमुपयाति ॥ १६६ ॥
शुध्यति हि नांतरात्मा कृष्णपदांभोजभक्तिमृते ।
वसनमिव क्षारोदैर्भक्त्या प्रक्षाल्यते चेतः ॥ १६७ ॥
यद्वत्समलादर्शे सुचिरं भस्मादिना शुद्धे ।
प्रतिफलति वक्त्रमुच्चैः शुद्धे चित्ते तथा ज्ञानम् ॥ १६८ ॥
जानन्तु तत्र बीजं हरिभक्त्या ज्ञानिनो ये स्युः ।
मूर्तं चैवामूर्तं द्वे एव ब्रह्मणो रूपे ॥ १६९ ॥
इत्युपनिषत्तयोर्वा द्वौ भक्तौ भगवदुपदिष्टौ ।
क्लेशादक्लेशाद्वा मुक्तिः स्यादेतयोर्मध्ये ॥ १७० ॥
स्थूला सूक्ष्मा चेति द्वेधा हरिभक्तिरुद्दिष्टा ।
प्रारंभे स्थूला स्यात्सूक्ष्मा तस्याः सकाशाच्च ॥ १७१ ॥
स्वाश्रमधर्माचरणं कृष्णप्रतिमार्चनोत्सवो नित्यम् ।
विविधोपचारकरणैर्हरिदासैः संगमः शश्वत् ॥ १७२ ॥
कृष्णकथासंश्रवणे महोत्सवः सत्यवादश्च ।
परयुवतौ द्रविणे वा परापवादे पराङ्मुखता ॥ १७३॥
ग्राम्यकथासूद्वेगः सुतीर्थगमनेषु तात्पर्यम् ।

यदुपतिकथावियोगे व्यर्थं गतमायुरिति चिंता ॥ १७४ ॥
एवं कुर्वति भक्तिं कृष्णकथानुग्रहोत्पन्ना ।
समुदेति सूक्ष्मभक्तिर्यस्या हरिरंतराविशति ॥ १७५ ॥
स्मृतिसत्पुराणवाक्यैर्यथाश्रुतायां हरेर्मूर्तौ ।
मानसपूजाभ्यासो विजननिवासेऽपि तात्पर्यम् ॥ १७६ ॥
सत्यं समस्तजंतुषु कृष्णस्यावस्थितेर्ज्ञानम् ।
अद्रोहो भूतगणे ततस्तु भूतानुकंपा स्यात् ॥ १७७ ॥
प्रमितयदृच्छालाभे संतुष्टिर्दारपुत्रादौ ।
ममताशून्यत्वमतो निरहंकारत्वमक्रोधः ॥ १७८ ॥
मृदुभाषिता प्रसादो निजनिंदायां स्तुतौ समता ।
सुखदुःखशीतलोष्णद्वंद्वसहिष्णुत्वमापदो न भयम् ॥ १७९ ॥
निद्राहारविहारेष्वनादरः संगराहित्यम् ।
वचने चानवकाशः कृष्णस्मरणेन शाश्वती शांतिः ॥ १८० ॥
केनापि गीयमाने हरिगीते वेणुनादे वा ।
आनंदाविर्भावो युगपत्स्यादष्टसात्त्विकोद्रेकः ॥ १८१ ॥
तस्मिन्ननुभवति मनः प्रगृह्यमाणं परात्मसुखम् ।
स्थिरतां याते तस्मिन्याति मदोन्मत्तदंतिदशाम् ॥ १८२ ॥
जंतुषु भगवद्भावं भगवति भूतानि पश्यति क्रमशः ।
एतादृशी दशा चेत्तदैव हरिदासवर्यः स्यात् ॥ १८३ ॥

ध्यानविधिः ।

यमुनातटनिकटस्थितवृंदावनकानने महारम्ये ॥
कल्पद्रुमतलभूमौ चरणं चरणोपरि स्थाप्य ॥ १८४ ॥
तिष्ठन्तं घननीलं स्वतेजसा भासयंतमिह विश्वम् ।
पीतांबरपरिधानं चंदनकर्पूरलिप्तसर्वांगम् ॥ १८५ ॥
आकर्णपूर्णनेत्रं कुंडलयुगमंडितश्रवणम् ॥

मंदास्मितमुखकमलं सुकौस्तुभोदारमणिहारम् ॥१८६॥
वलयांगुलीयकाद्यानुज्ज्वलयंतं स्वलंकारान् ।
गलविलुलितवनमालं स्वतेजसापास्तकलिकालम् ॥१८७॥
गुंजारवालिकलितं गुंजापुंजान्विते शिरसि ।
भुंजानं सह गोपैः कुंजांतरवर्तिनं हरिं स्मरत ॥१८८॥
मंदारपुष्पवासितमंदानिलसेवितं परानंदम् ॥
मंदाकिनीयुतपदं नमत महानंददं महापुरुषम् ॥१८९॥
सुरभीकृतदिग्वलयं सुरभिशतैरावृतं सदा परितः ।
सुरभीतिक्षपणमहासुरभीमं यादवं नमत ॥१९०॥
कंदर्पकोटिसुभगं वांछितफलदं दयार्णवं कृष्णम् ।
त्यक्त्वा कमन्यविषयं नेत्रयुगं द्रष्टुमुत्सहते ॥१९१॥
पुण्यतमामतिसुरसां मनोभिरामां हरेः कथां त्यक्त्वा ।
श्रोतुं श्रवणद्वंद्वं ग्राम्यं कथमादरं भवति ॥१९२॥
दौर्भाग्यमिंद्रियाणां कृष्णे विषये हि शाश्वतिके ।
क्षणिकेषु पापकरणेष्वपि सज्यन्ते यदन्यविषयेषु ॥१९३॥

सगुणनिर्गुणयोरैक्यम् ।

श्रुतिभिर्महापुराणैः सगुणगुणातीतयोरैक्यम् ।
यत्प्रोक्तं गूढतया तदहं वक्ष्येऽतिविशदार्थम् ॥१९४॥
भूतेष्वंतर्यामी ज्ञानमयः सच्चिदानंदः ।
प्रकृतेः परः परात्मा यदुकुलतिलकः स एवायम् ॥१९५॥
ननु सगुणो दृश्यतनुस्तथैकदेशाधिवासश्च ।
स कथं भवेत्परात्मा प्राकृतवद्रागरोषयुतः ॥१९६॥
इतरे दृश्यपदार्था लक्ष्यन्तेऽनेन चक्षुषा सर्वे ।
भगवाननया दृष्ट्या न लक्ष्यते ज्ञानदृग्गम्यः ॥१९७॥
यद्विश्वरूपदर्शनसमये पार्थाय दत्तवान्भगवान् ।

दिव्यं चक्षुस्तस्माददृश्यता युज्यते नृहरेः ॥१९८॥
साक्षाद्यथैकदेशे वर्तुलमुपलभ्यते रवेर्बिंबम् ॥
विश्वं प्रकाशयति तत्सर्वैः सर्वत्र दृश्यते युगपत् ॥१९९॥
यद्यपि साकारोऽयं तथैकदेशी विभाति यदुनाथः ।
सर्वगतः सर्वात्मा तथाप्ययं सच्चिदानंदः ॥२००॥
एको भगवान्रेमे युगपद्गोपीष्वनेकासु ॥
अथवा विदेहजनकश्रुतदेवभूदेवयोर्हरिर्युगपत् ॥२०१॥
अथवा कृष्णकारां स्वचमूं दुर्योधनोऽपश्यत् ।
तस्माद्व्यापक आत्मा भगवान्हरिरीश्वरः कृष्णः ॥२०२॥
चक्षसि यदा जघान श्रीवत्सः श्रीपतेः स किं द्वेष्यः ।
भक्तानामसुराणामन्येषां वा फलं सदृशम् ॥ २०३ ॥
तस्मान्न कोऽपि शत्रुर्नो मित्रं नाप्युदासीनः ।
नृहरिः सन्मार्गस्थः सफलः शाखीव यदुनाथः ॥२०४॥
लोहशलाकानिवहैः स्पर्शाश्मनि भिद्यमानेऽपि ।
स्वर्णत्वमेति लौहं द्वेषादपि विद्विषां तथा प्राप्तिः ॥२०५॥
नन्वात्मनः सकाशादुत्पन्ना जीवसंततिश्चेयम् ।
जगतः प्रियतर आत्मा तत्प्रकृतेर्नैव संभवति ॥२०६॥
वत्साहरणावसरे पृथग्वयोरूपवासनाभूपान् ।
हरिरजमोहं कर्तुं सवत्सगोपान्विनिर्ममे स्वस्मात् ॥२०७॥
अग्नेर्यथा स्फुलिंगाः क्षुद्रास्तु व्युच्चरन्तीति ।
श्रुत्यर्थं दर्शयितुं स्वतनोरतनोत्स जीवसंदोहम् ॥२०८॥
यमुनातीरनिकुंजे कदाचिदपि वत्सकांश्च चारयति ।
कृष्णे तथार्थगोपेषु च वरगोष्ठिषु चारयत्स्वारात् ॥२०९॥
वत्सं निरीक्ष्य दूराद्गावः स्नेहेन संभ्रांताः ।
तदभिमुखं धावन्त्यः प्रययुर्गोपैश्च दुर्वाराः ॥२१०॥

प्रस्रवभरेण भूयः स्नुतस्तनाः प्राप्य पूर्ववद्वत्सान् ॥
पृथुरसनया लिहन्त्यस्तर्णकवत्यः प्रपाययन्प्रमुदा ॥ २११ ॥
गोपा अपि निजबालान्जगृहुर्मूर्धानमाघ्राय ॥
इत्थमलौकिकलाभस्तेषां तत्र क्षणं ववृधे ॥ २१२ ॥
गोपा वत्साश्चान्या पूर्वं कृष्णात्मका ह्यभवन् ॥
तेनात्मनः प्रियत्वं दर्शितमेतेषु कृष्णेन ॥ २१३ ॥
प्रेयः पुत्राद्वित्तात्प्रेयोऽन्यस्माच्च सर्वस्मात् ॥
अंतरतरं यदात्मेत्युपनिषदः सत्यताभिहिता ॥ २१४ ॥
नन्वुच्चावचभूतेष्वात्मा सम एव वर्ततेऽथ हरिः ॥
दुर्योधनेऽर्जुने वा तरतमभावं कथं नु गतवान्सः ॥ २१५ ॥
बधिरांधपंगुमूका दीर्घाः खर्वाः सरूपाश्च ॥
सर्वे विधिना दृष्टाः सवत्सगोपाश्चतुर्भुजास्तेन ॥ २१६ ॥
भूतसमत्वं नृहरेः समो हि मशकेन नागेन ॥
लोकैः समस्त्रिभिर्वेत्युपनिषदा भाषितः साक्षात् ॥ २१७ ॥
आत्मा तावदभोक्ता तथैव ननु वासुदेवश्चेत् ॥
नानाकैतवयत्नैः पररमणीभिः कथं रमते ॥ २१८ ॥
सुंदरमभिनवरूपं कृष्णं दृष्ट्वा विमोहिता गोप्यः ॥
तमभिलषन्त्यो मनसा कामाद्विरहव्यथां प्रापुः ॥ २१९ ॥
गच्छन्त्यस्तिष्ठन्त्यो गृहकृत्यपराश्च भुंजानाः ॥
कृष्णं विनान्यविषयं समक्षमपि जातु नाविंदन् ॥ २२० ॥
दुःसहविरहभ्रांत्या स्वपतीन्ददृशुस्तरून्नरांश्च पशून् ॥
हरिरयमिति सुप्रीताः सरभसमालिंगयांचक्रुः ॥ २२१ ॥
कापि च कृष्णायन्ती कस्याश्चित्पूतनायन्त्याः ॥
अपिबत्स्तनमिति साक्षाद्व्यासो नारायणः प्राह ॥ २२२ ॥
तस्मान्निजनिजदयितान्कृष्णाकारान्व्रजस्त्रियो वीक्ष्य ॥

स्वपरनृपतिपत्नीनामंतर्यामी हरिः साक्षात् ॥ २२३ ॥
परमार्थतो विचारे गुडतन्मधुरत्वदृष्टांतात् ॥
नश्वरमपि नरदेहं परमात्माकारतां याति ॥ २२४ ॥
किं पुनरनंतशक्तेर्लीलावपुरीश्वरस्येह ॥
कर्माण्यलौकिकानि स्वमायया विदधतो नृहरेः ॥ २२५ ॥
मृद्भक्षणेन कुपितां विकसितवदनां स्वमातरं वक्त्रे ॥
विश्वमदर्शयदखिलं किं पुनरथ विश्वरूपोऽसौ ॥ २२६ ॥

अनुग्रहः ॥

विषविषमस्तनयुगलं पाययितुं पूतना गृहं प्राप्ता ॥
तस्याः पृथुभाग्याया आसीत्कृष्णार्पणो देहः ॥ २२७ ॥
अनयत्पृथुतरशकटं निजनिकटं वा कृतापराधमपि ॥
कंठाश्लेषविशेषादवधीद्बाल्येऽसुरं कृष्णः ॥ २२८ ॥
यमलार्जुनौ तरू उन्मूल्योलूखलगताश्चिरं खिन्नौ ॥
रिंगन्नंगणभूमौ स्वमालयं प्रापयन्नृहरिः ॥ २२९ ॥
नित्यं त्रिदशद्वेषी येन च मृत्योर्वशीकृतः केशी ॥
काकः कोऽपि वराको बकोऽप्यशोकं गतो लोकम् ॥ २३० ॥
गोगोपीगोपानां निकरमहिं पीडयन्तमतिवेगात् ॥
अनघमघासुरमकरोत्पृथुतरसुरगेश्वरं भगवान् ॥ २३१ ॥
पीत्वारण्यहुताशनमसह्यतत्तेजसो हेतोः ॥
दग्धान्मुग्धानखिलाञ्जुगोप गोपान्कृपासिंधुः ॥ २३२ ॥
पातु गोकुलमाकुलमशनितडिद्वर्षणैः कृष्णः ॥
असहाय एकहस्ते गोवर्धनमुद्दधारोच्चैः ॥ २३३ ॥
घासोलोभाकलितं धावद्रजकं शिलातलैर्हत्वा ॥
विस्मृत्य तदपराधं विकुंठवासोऽर्पितस्तस्मै ॥ २३४ ॥
त्रेधा वक्रशरीरामतिलंबोष्ठीं स्खलदपुर्वचनात् ॥

स्रक्चंदनपरितोषात्कुब्जामृज्वाननामकरोत् ॥ २३५ ॥
निहतः पपात हरिणा हरिचरणाग्रेण कुवलयापीडः ॥
तुंगोन्मत्तमतंगः पतंगवद्दीपकस्याग्रे ॥ २३६ ॥
युद्धमिषात्सह रंगे श्रीरंगेनांगसंगमं प्राप्य ॥
मुष्टिकचाणूराख्यौ ययतुर्निःश्रेयसं सपदि ॥ २३७ ॥
देहकृतादपराधाद्वैकुंठोत्कंठितांतरात्मानम् ॥
यदुवरकुलावतंसः कंसं विध्वंसयामास ॥ २३८ ॥
हरिसंदर्शनयोगात्पृथुरणतीर्थे निमज्जते तस्मै ॥
भगवान्तु प्रददाद्यः सद्यश्चैद्याय सायुज्यम् ॥ २३९ ॥
मीनादिभिरवतारैर्निहताः सुरविद्विषो बहवः ॥
नीतास्ते निजरूपं तत्र च मोक्षस्य का वार्ता ॥ २४० ॥
ये यदुनंदननिहतास्ते तु न भूयः पुनर्भवं प्रापुः ॥
तस्मादवताराणामंतर्यामी प्रवर्तकः कृष्णः ॥ २४१ ॥
ब्रह्मांडानि बहूनि पंकजभवान्प्रत्यंडमत्यद्भुता-
न्गोपान्वत्सयुतानदर्शयदजं विष्णूनशेषांश्च यः ॥
शंभुर्यच्चरणोदकं स्वशिरसा धत्ते च मूर्तित्रया-
त्कृष्णो वै पृथगस्ति कोऽप्यविकृतः सच्चिन्मयो नीलिमा ॥ २४२
कृपापात्रं यस्य त्रिपुररिपुरंभोजवसतिः
सुता जह्नोः पूता चरणनखनिर्णेजनजलम् ॥
प्रदानं वा यस्य त्रिभुवनपतित्वं विभुरपि
निदानं सोऽस्माकं जयति कुलदेवो यदुपतिः ॥ २४३ ॥
मायाहस्तेऽर्पयित्वा भरणकृतिकृते मोहमूलोद्भवं मां
मातः कृष्णाभिधाने चिरसमयमुदासीनभावं गतासि ॥
कारुण्यैकाधिवासे सकृदपि वदनं नेक्षसे त्वं मदीयं
तत्सर्वज्ञे न कर्तुं प्रभवसि भवती किं नु मूलस्य शांतिम् ॥ २४४

उदासीनः स्तब्धः सततमगुणः संगरहितो
भवांस्तातः कातः परमिह भवेज्जीवनगतिः ॥
अकस्मादस्माकं यदि न कुरुते स्नेहमथ त-
द्वसस्व स्वीयांतर्विमलजठरेऽस्मिन्पुनरपि ॥ २४५ ॥
लोकाधीशे त्वयीशे किमिति भवभवा वेदना स्वाश्रितानां
संकोचः पंकजानां किमिह समुदिते मंडले चंडरश्मेः ॥
भोगः पूर्वार्जितानां भवति भुवि नृणां कर्मणां चेदवश्यं
तन्मे दृष्टैर्नृपुष्टैर्ननु दनुजनृपैरूर्जितं निर्जितं ते ॥ २४६ ॥
नित्यानंदसुधानिधेरधिगतः सन्नीलमेघः सता-
मौत्कंठ्यप्रबलप्रभंजनभरैराकर्षितो वर्षति ॥
विज्ञानामृतमद्भुतं निजवचो धाराभिरारादिदं
चेतश्चातक चेन्न वांछति मृषाक्रांतोऽसि सुप्तोऽसि किम् २४७
चेतश्चंचलतां विहाय पुरतः संधाय कोटिद्वयं
तत्रैकत्र निधेहि सर्वविषयानन्यत्र च श्रीपतिम् ॥
विश्रांतिर्हितमप्यहो क नु तयोर्मध्ये तदालोच्यतां
युक्त्या वानुभवेन यत्र परमानंदश्च तत्सेव्यताम् ॥ २४८ ॥
पुत्रान्पौत्रमथ स्त्रियोऽन्ययुवतीर्वित्तान्यथोऽन्यद्धनं
भोज्यादिष्वपि तारतम्यवशतो नालं समुत्कंठया ॥
नैतादृग्यदुनायके समुदिते चेतस्यनंते विभौ
सांद्रानंदसुधार्णवे विहरति स्वैरं यतो निर्भयम् ॥ २४९ ॥
काम्योपासनयार्थयन्त्यनुदिनं किंचित्फलं सेप्सितं
किंचित्स्वर्गमथापवर्गमपरैर्योगादियज्ञादिभिः ॥
अस्माकं यदुनंदनांघ्रियुगलध्यानावधानार्थिनां
किं लोकेन दमेन किं नृपतिना स्वर्गापवर्गैश्च किम् ॥ २५० ॥
आश्रितमात्रं पुरुषं स्वाभिमुखं कर्षति श्रीशः ॥

लोहमपि चुंबकाश्मा संमुखमात्रं जडं यद्वत् ॥ २५१ ॥
अयमुत्तमोऽयमधमो जात्या रूपेण संपदा वयसा ॥
श्लाघ्योऽश्लाघ्यो वेत्थं न वेत्ति भगवाननुग्रहावसरे ॥ २५२ ॥
अंतःस्थभावभोक्ता ततोंऽतरात्मा महामेघः ॥
खदिरश्चंपक इव वा प्रवर्षणं किं विचारयति ॥ २५३ ॥
यद्यपि सर्वत्र समस्तथापि नृहरिस्तथाप्येते ॥
भक्ताः परमानंदे रमन्ति सदयावलोकेन ॥ २५४ ॥
सुतरामनन्यशरणाः क्षीराद्याहारमंतरा यद्वत् ॥
केवलया स्नेहदृशा कच्छपतनयाः प्रजीवन्ति ॥ २५५ ॥
यद्यपि गगनं शून्यं तथापि जलदामृतांशुरूपेण ॥
चातकचकोरनाम्नोर्दृढभावात्पूरयत्याशाम् ॥ २५६ ॥
तद्वद्व्रजतां पुंसां दृग्वाङ्मनसामगोचरोऽपि हरिः ॥
कृपया फलत्यकस्मात्सत्यानंदामृतेन विपुलेन ॥ २५७ ॥

इति प्रबोधसुधाकरः समाप्तः ।

॥ प्रश्नोत्तररत्नमालिका ॥

कः खलु नालंक्रियते दृष्टादृष्टार्थसाधनपटीयान् ।
अमुया कंठस्थितया प्रश्नोत्तररत्नमालिकया ॥ १ ॥
भगवन्किमुपादेयं गुरुवचनं हेयमपि च किमकार्यम् ।
को गुरुरधिगततत्त्वः शिष्यहितायोद्यतः सततम् ॥ २ ॥
त्वरितं किं कर्तव्यं विदुषां संसारसंततिच्छेदः ।
किं मोक्षतरोर्बीजं सम्यग्ज्ञानं क्रियासिद्धम् ॥ ३ ॥
कः पथ्यतरो धर्मः कः शुचिरिह यस्य मानसं शुद्धम् ।
कः पंडितो विवेकी किं विषमवधीरणा गुरुषु ॥ ४ ॥
किं संसारे सारं बहुशोऽपि विचिंत्यमानमिदमेव ।
किं मनुजेष्विष्टतमं स्वपरहितायोद्यतं जन्म ॥ ५ ॥
मदिरेव मोहजनकः कः स्नेहः के च दस्यवो विषयाः ।
का भववल्ली तृष्णा को वैरी यस्त्वनुद्योगः ॥ ६ ॥
कस्माद्भयमिह मरणादंधादिह को विशिष्यते रागी ।
कः शूरो यो ललनालोचनबाणैर्न च व्यथितः ॥ ७ ॥
पातुं कर्णांजलिभिः किममृतमिह युज्यते सदुपदेशः ।
किं गुरुताया मूलं यदेतदप्रार्थनं नाम ॥ ८ ॥
किं गहनं स्त्रीचरितं कश्चतुरो यो न खंडितस्तेन ।
किं दुःखमसंतोषः किं लाघवमधमतो याच्ञा ॥ ९ ॥
किं जीवितमनवद्यं किं जाड्यं पाठतोऽप्यनभ्यासः ।
को जागर्ति विवेकी का निद्रा मूढता जंतोः ॥ १० ॥
नलिनीदलगतजलवत्तरलं किं यौवनं धनं चायुः ।
कथय पुनः के शशिनः किरणसमाः सज्जना एव ॥ ११ ॥
को नरकः परवशता किं सौख्यं सर्वसंगविरतिर्या ।

किं सत्यं भूतहितं प्रियं च किं प्राणिनामसवः ॥ १२ ॥
कोऽनर्थफलो मानः का सुखदा साधुजनमैत्री ।
सर्वव्यसनविनाशे को दक्षः सर्वथा त्यागी ॥ १३ ॥
किं मरणं मूर्खत्वं किं चानर्घं यदवसरे दत्तम् ।
आमरणात्किं शल्यं प्रच्छन्नं यत्कृतं पापम् ॥ १४ ॥
कुत्र विधेयो यत्नो विद्याभ्यासे सदौषधे दाने ।
अवधीरणा क्व कार्या खलपरयोषित्परधनेषु ॥ १५ ॥
काहर्निशमनुचिंत्या संसारासारता न तु प्रमदा ।
का प्रेयसी विधेया करुणा दीनेषु सज्जने मैत्री ॥ १६ ॥
कंठगतैरप्यसुभिः कस्य ह्यात्मा न शक्यते जेतुम् ।
मूर्खस्य शंकितस्य च विषादिनो वा कृतघ्नस्य ॥ १७ ॥
कः साधुः सद्वृत्तः कमधममाचक्षते त्वसद्वृत्तम् ।
केन जितं जगदेतत्सत्यतितिक्षावता पुंसा ॥ १८ ॥
कस्मै नमांसि देवाः कुर्वन्ति दयाप्रधानाय ॥
कस्मादुद्वेगः स्यात्संसारारण्यतः सुधियः ॥ १९ ॥
कस्य वशे प्राणिगणः सत्यप्रियभाषिणो विनीतस्य ॥
क्व स्थातव्यं न्याय्ये पथि दृष्टादृष्टलाभाढ्ये ॥ २० ॥
कोऽन्धो योऽकार्यरतः को बधिरो यो हितानि न शृणोति ॥
को मूको यः काले प्रियाणि वक्तुं न जानाति ॥ २१ ॥
किं दानमनाकांक्षं किं मित्रं यो निवारयति पापात् ॥
कोऽलंकारः शीलं किं वाचां मंडनं सत्यम् ॥ २२ ॥
विद्युद्विलसितचपलं किं दुर्जनसंगतिर्युवतयश्च ॥
कुलशीलनिष्प्रकंपाः के कलिकालेऽपि सज्जना एव ॥ २३ ॥
चिंतामणिरिव दुर्लभमिह किं कथयामि तच्चतुर्भद्रम् ॥
किं तद्वदन्ति भूयो विधूततमसो विशेषेण ॥ २४ ॥

दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमान्वितं शौर्यम् ॥
वित्तं त्यागसमेतं दुर्लभमेतच्चतुर्भद्रम् ॥ २५ ॥
किं शोच्यं कार्पण्यं सति विभवे किं प्रशस्तमौदार्यम् ॥
कः पूज्यो विद्वद्भिः स्वभावतः सर्वदा विनीतो यः ॥ २६ ॥
कः कुलकमलदिनेशः सति गुणविभवेऽपि यो नम्रः ॥
कस्य वशे जगदेतत्प्रियहितवचनस्य धर्मनिरतस्य ॥ २७ ॥
विद्वन्मनोहरा का सत्कविता बोधवनिता च ॥
कं न स्पृशति विपत्तिः प्रवृद्धवचनानुवर्तिनं दान्तम् ॥ २८ ॥
कस्मै स्पृहयति कमला त्वनलसचित्ताय नीतिवृत्ताय ॥
त्यजति च कं सहसा द्विजगुरुसुरनिंदाकरं च सालस्यम् ॥ २९ ॥
कुत्र विधेयो वासः सज्जननिकटेऽथवा काश्याम् ॥
कः परिहार्यो देशः पिशुनयुतो लुब्धभूपश्च ॥ ३० ॥
केनाशोच्यः पुरुषः प्रणतकलत्रेण धीरविभवेन ॥
इह भुवने कः शोच्यः सत्यपि विभवे न यो दाता ॥ ३१ ॥
किं लघुताया मूलं प्राकृतपुरुषेषु या याञ्चा ॥
रामादपि कः शूरः स्मरशरनिहतो न यश्चलति ॥ ३२ ॥
किमहर्निशमनुचिंत्यं भगवच्चरणं न संसारः ॥
चक्षुष्मन्तोऽप्यंधाः के स्युर्ये नास्तिका मनुजाः ॥ ३३ ॥
कः पंगुरिह प्रथितो व्रजति न यो वार्धके तीर्थम् ॥
किं तीर्थमपि च मुख्यं चित्तमलं यन्निवर्तयति ॥ ३४ ॥
किं स्मर्तव्यं पुरुषैर्हरिनाम सदा न यावनी भाषा ॥
को हि न वाच्यः सुधिया परदोषश्चानृतं तद्वत् ॥ ३५ ॥
किं संपाद्यं मनुजैर्विद्या वित्तं बलं यशः पुण्यम् ॥
कः सर्वगुणविनाशी लोभः शत्रुश्च कः कामः ॥ ३६ ॥
का च सभा परिहार्या हीना या वृद्धसचिवेन ॥

इह कुत्रावहितः स्यान्मनुजः किल राजसेवायाम् ।। ३७ ।।
प्राणादपि को रम्यः कुलधर्मः साधुसंगश्च ।।
का संरक्ष्या कीर्तिः पतिव्रता नैजबुद्धिश्च ।। ३८ ।।
का कल्पलता लोके सच्छिष्यायार्पिता विद्या ।।
कोऽक्षयवटवृक्षः स्याद्विधिवत्सत्पात्रदत्तदानं यत् ।। ३९ ।।
किं शस्त्रं सर्वेषां युक्तिर्माता च का धेनुः ।।
किं नु बलं यद्धैर्यं को मृत्युर्यदवधानरहितत्वम् ।। ४० ।।
कुत्र विषं दुष्टजने किमिहाशौचं भवेदृणं नृणाम् ।।
किमभयमिह वैराग्यं भयमपि किं वित्तमेव सर्वेषाम् ।। ४१ ।।
का दुर्लभा नराणां हरिभक्तिः पातकं च किं हिंसा ।।
को हि भगवत्प्रियः स्याद्योऽन्यं नोद्वेजयेदनुद्विग्नः ।। ४२ ।।
कस्मात्सिद्धिस्तपसो बुद्धिः क नु भूसुरे कुतो बुद्धिः ।।
वृद्धोपसेवया के वृद्धा ये धर्मतत्त्वज्ञाः ।। ४३ ।।
संभावितस्य मरणादधिकं किं दुर्यशो भवति ।।
लोके सुखी भवेत्को धनवान्धनमपि च किं यतश्चेष्टम् ।। ४४ ।।
सर्वसुखानां बीजं किं पुण्यं दुःखमपि कुतः पापात् ।।
कस्यैश्वर्यं यः किल शंकरमाराधयेद्भक्त्या ।। ४५ ।।
को वर्धते विनीतः को वा हीयेत यो दृप्तः ।।
को न प्रत्येतव्यो ब्रूते यश्चानृतं शश्वत् ।। ४६ ।।
कुत्रानृतेऽप्यपापं यच्चोक्तं धर्मरक्षार्थम् ।।
को धर्मोऽभिमतो यः शिष्टानां निजकुलीनानाम् ।। ४७ ।।
साधुबलं किं दैवं कः साधुः सर्वदा तुष्टः ।।
दैवं किं यत्सुकृतं कः सुकृती श्लाघ्यते च यः सद्भिः ।। ४८ ।।
गृहमेधिनश्च मित्रं किं भार्या को गृही च यो यजते ।।
को यज्ञो यः श्रुत्या विहितः श्रेयस्करो नृणाम् ।। ४९ ।।

कस्य क्रिया हि सफला यः पुनराचारवाञ्शिष्टः ॥
कः शिष्टो यो वेदप्रमाणवान्को हतः क्रियाभ्रष्टः ॥ ५० ॥
को धन्यः संन्यासी को मान्यः पंडितः साधुः ॥
कः सेव्यो यो दाता को दाता योऽर्थितृप्तिमातनुते ॥ ५१ ॥
किं भाग्यं देहवतामारोग्यं कः फली कृषिकृत् ॥
कस्य न पापं जपतः कः पूर्णो यः प्रजावान्स्यात् ॥ ५२ ॥
किं दुष्करं नराणां यन्मनसो निग्रहः सततम् ॥
को ब्रह्मचर्यवान्स्याद्यश्चास्खलितोर्ध्वरेतस्कः ॥ ५३ ॥
का च परदेवतोक्ता चिच्छक्तिः को जगद्भर्ता ॥
सूर्यः सर्वेषां को जीवनहेतुः स पर्जन्यः ॥ ५४ ॥
कः शूरो यो भीतत्राता त्राता च कः स गुरुः ॥
को हि जगद्गुरुरुक्तः शंभुर्ज्ञानं कुतः शिवादेव ॥ ५५ ॥
मुक्तिं लभेत कस्मान्मुकुंदभक्तेर्मुकुंदः कः ॥
यस्तारयेदविद्यां का चाविद्या यदात्मनोऽस्फूर्तिः ॥ ५६ ॥
कस्य न शोको यः स्यादक्रोधः किं सुखं तुष्टिः ॥
को राजा रंजनकृत्कश्च श्वा नीचसेवको यः स्यात् ॥ ५७ ॥
को मायी परमेशः क इंद्रजालायते प्रपंचोऽयम् ॥
कः स्वप्ननिभो जाग्रद्व्यवहारः सत्यमपि च किं ब्रह्म ॥ ५८ ॥
किं मिथ्या यद्विद्यानाश्यं तुच्छं तु शशविषाणादि ॥
का चानिर्वचनीया माया किं कल्पितं द्वैतम् ॥ ५९ ॥
किं पारमार्थिकं स्यादद्वैतं चाज्ञता कुतोऽनादिः ॥
वपुषश्च पोषकं किं प्रारब्धं चान्नदायि किं चायुः ॥ ६० ॥
को ब्राह्मणैरुपास्यो गायत्र्यर्काग्निगोचरः शंभुः ॥
गायत्र्यामादित्ये चाग्नौ शंभौ च किं नु तत्तत्त्वम् ॥ ६१ ॥
प्रत्यक्षदेवता का माता पूज्यो गुरुश्च कस्तातः ॥

कः सर्वदेवतात्मा विद्याकर्मान्वितो विप्रः ॥ ६२ ॥
कश्च कुलक्षयहेतुः संतापः सज्जनेषु योऽकारि ॥
केषाममोघवचनं ये च पुनः सत्यमौनशमशीलाः ॥ ६३ ॥
किं जन्म विषयसंगः किमुत्तरं जन्म पुत्रः स्यात् ॥
कोऽपरिहार्यो मृत्युः कुत्र पदं विन्यसेच्च दृक्पूते ॥ ६४ ॥
पात्रं किमन्नदाने क्षुधितं कोऽर्च्यो हि भगवदवतारः ॥
कश्च भगवान्महेशः शंकरनारायणात्मैकः ॥ ६५ ॥
फलमपि भगवद्भक्तेः किं तल्लोकस्वरूपसाक्षात्त्वम् ॥
मोक्षश्च को ह्यविद्यास्तमयः कः सर्ववेदभूरथ चोम् ॥ ६६ ॥
इत्येषा कंठस्था प्रश्नोत्तररत्नमालिका येषाम् ॥
ते मुक्ताभरणा इव विमलाश्चाभान्ति सत्समाजेषु ॥ ६७ ॥

॥ इति प्रश्नोत्तररत्नमालिका समाप्ता ॥

———

॥ ब्रह्मानुचिंतनम् ॥

अहमेव परं ब्रह्म वासुदेवाख्यमव्ययम् ।
इति स्यान्निश्चितो मुक्तो बद्ध एवान्यथा भवेत् ॥१॥
अहमेव परं ब्रह्म निश्चितं चित्त चिंत्यताम् ।
चिद्रूपत्वादसंगत्वादबाध्यत्वात्प्रयत्नतः ॥२॥
अहमेव परं ब्रह्म न चाहं ब्रह्मणः पृथक् ।
इत्येवं समुपासीत ब्राह्मणो ब्रह्मणि स्थितः ॥३॥
सर्वोपाधिविनिर्मुक्तं चैतन्यं च निरंतरम् ।
तद्ब्रह्माहमिति ज्ञात्वा कथं वर्णाश्रमी भवेत् ॥ ४ ॥
अहं ब्रह्मास्मि यो वेद स सर्वं भवति त्विदम् ।
नाभूत्या ईशते देवास्तेषामात्मा भवेद्धि सः ॥५॥
अन्योऽसावहमन्योऽस्मीत्युपास्ते योऽन्यदेवताम् ।
न स वेद नरो ब्रह्म स देवानां यथा पशुः ॥६॥
अहमात्मा न चान्योऽस्मि ब्रह्मैवाहं न शोकभाक् ।
सच्चिदानंदरूपोऽहं नित्यमुक्तस्वभाववान् ॥७॥
आत्मानं सततं ब्रह्म संभाव्य विहरन्ति ये ।
न तेषां दुष्कृतं किंचिद्दुष्कृतोत्था न चापदः ॥८॥
आत्मानं सततं ब्रह्म संभाव्य विहरेत्सुखम् ।
क्षणं ब्रह्माहमस्मीति यः कुर्यादात्मचिंतनम् ॥९॥
तन्महापातकं हन्ति तमः सूर्योदयो यथा ।
अज्ञानाद्ब्रह्मणो जातमाकाशं बुद्बुदोपमम् ॥१०॥
आकाशाद्वायुरुत्पन्नो वायोस्तेजस्ततः पयः ।
अद्भ्यश्च पृथिवी जाता ततो व्रीहियवादिकम् ॥११॥
पृथिव्यप्सु पयो वह्नौ वह्निर्वायौ नभस्यसौ ।

नभोऽप्यव्याकृते तच्च शुद्धे शुद्धोऽस्म्यहं हरिः ॥१२॥
अहं विष्णुरहं विष्णुरहं विष्णुरहं हरिः ।
कर्तृभोक्त्रादिकं सर्वं तदविद्योत्थमेव च ॥१३॥
अच्युतोऽहमनंतोऽहं गोविंदोऽहमहं हरिः ।
आनंदोऽहमशेषोऽहमजोऽहममृतोऽस्म्यहम् ॥१४॥
नित्योऽहं निर्विकल्पोऽहं निराकारोऽहमव्ययः ।
सच्चिदानंदरूपोऽहं पंचकोशातिगोऽस्म्यहम् ॥ १५ ॥
अकर्ताहमभोक्ताहमसंगः परमेश्वरः ।
सदा मत्संनिधानेन चेष्टते सर्वमिंद्रियम् ॥१६॥
आदिमध्यांतमुक्तोऽहं न बद्धोऽहं कदाचन ।
स्वभावनिर्मलः शुद्धः स एवाहं न संशयः ॥१७॥
ब्रह्मैवाहं न संसारी मुक्तोऽहमिति भावयेत् ।
अशक्नुवन्भावयितुं वाक्यमेतत्सदाऽभ्यसेत् ॥१८॥
यदभ्यासेन तद्भावो भवेद्भ्रमरकीटवत् ।
अत्रापहाय संदेहमभ्यसेत्कृतनिश्चयः ॥ १९ ॥
ध्यानयोगेन मासैकाद्ब्रह्महत्यां व्यपोहति ।
संवत्सरं सदाभ्यासात्सिद्ध्यष्टकमवाप्नुयात् ॥२०॥
यावज्जीवं सदाभ्यासाज्जीवन्मुक्तो भवेद्यतिः ।
नाहं देहो न च प्राणो नेंद्रियाणि तथैव च ॥२१॥
न मनोऽहं न बुद्धिश्च नैव चित्तमहंकृतिः ।
नाहं पृथ्वी न सलिलं न च वह्निस्तथानिलः ॥२२॥
न चाकाशो न शब्दश्च न च स्पर्शस्तथा रसः ।
नाहं गंधो न रूपं च न मायाहं न संसृतिः ॥२३॥
सदा साक्षिस्वरूपत्वाच्छिव एवास्मि केवलः ।
मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ॥२४॥

मयि सर्वं लयं याति तद्ब्रह्मास्म्यहमद्वयम् ।
सर्वज्ञोऽहमनंतोऽहं सर्वेशः सर्वशक्तिमान् ॥२५॥
आनंदः सत्यबोधोऽहमिति ब्रह्मानुचिंतनम् ।
अयं प्रपंचो मिथ्यैव सत्यं ब्रह्माहमव्ययम् ॥२६॥
अत्र प्रमाणं वेदान्ता गुरवोऽनुभवस्तथा ।
ब्रह्मैवाहं न संसारी न चाहं ब्रह्मणः पृथक् ॥२६॥
नाहं देहो न मे देहः केवलोऽहं सनातनः ।
एकमेवाद्वितीयं वै ब्रह्मणो नेह किंचन ॥२८॥
हृदयकमलमध्ये दीपवद्वेदसारं
प्रणवमयमतर्क्यं योगिभिर्ध्यानगम्यम् ।
हरिगुरुशिवयोगं सर्वभूतस्थमेकं
सकृदपि मनसा वै चिंतयेद्यः स मुक्तः ॥२९॥

इति ब्रह्मानुचिंतनं समाप्तम् ।

॥ मोहमुद्गरः ॥

भज गोविंदं भज गोविंदं भज गोविंदं मूढमते ।
प्राप्ते सन्निहिते मरणे न हि न हि रक्षति डुकृञ् करणे ॥ १ ॥
मूढ जहीहि धनागमतृष्णां कुरु सद्बुद्धिं मनसि वितृष्णाम् ।
यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तम् ॥ २ ॥
नारीस्तनभरनाभीदेशं दृष्ट्वा मा गा मोहावेशम् ।
एतन्मांसवसादिविकारं मनसि विचिंतय वारं वारम् ॥ ३ ॥
नलिनीदलगतजलमतितरलं तद्वज्जीवितमतिशयचपलम् ।
विद्धि व्याध्यभिमानग्रस्तं लोकं शोकहतं च समस्तम् ॥ ४ ॥
यावद्वित्तोपार्जनसक्तस्तावन्निजपरिवारो रक्तः ।
पश्चाज्जीवति जर्जरदेहे वार्तां पृच्छति कोऽपि न गेहे ॥ ५ ॥
यावत्पवनो निवसति देहे तावत्पृच्छति कुशलं गेहे ।
गतवति वायौ देहापाये भार्या बिभ्यति तस्मिन्काये ॥ ६ ॥
बालस्तावत्क्रीडासक्तस्तरुणस्तावत्तरुणीसक्तः ।
वृद्धस्तावच्चिंतामग्नः परे ब्रह्मणि कोऽपि न सक्तः ॥ ७ ॥
का ते कांता कस्ते पुत्रः संसारोऽयमतीव विचित्रः ।
कस्य त्वं कः कुत आयातस्तत्त्वं चिंतय यदिदं भ्रातः ॥ ८ ॥
सत्संगत्वे निःसंगत्वं निःसंगत्वे निर्मोहत्वम् ।
निर्मोहत्वे निश्चलितत्वं निश्चलितत्वे जीवन्मुक्तिः ॥ ९ ॥
वयसि गते कः कामविकारः शुष्के नीरे कः कासारः ।
क्षीणे वित्ते कः परिवारो ज्ञाते तत्त्वे कः संसारः ॥ १० ॥
मा कुरु धनजनयौवनगर्वं हरति निमेषात्कालः सर्वम् ।
मायामयमिदमखिलं हित्वा ब्रह्मपदं त्वं प्रविश विदित्वा ॥ ११ ॥
दिनयामिन्यौ सायं प्रातः शिशिरवसंतौ पुनरायातः ।

कालः क्रीडति गच्छत्यायुस्तदपि न मुंचत्याशावायुः ॥ १२ ॥
का ते कांताधनगतचिंता वातुल किं तव नास्ति नियंता ।
त्रिजगति सज्जनसंगतिरेका भवति भवार्णवतरणे नौका ॥ १३ ॥
जटिली मुंडी लुंचितकेशः काषायांबरबहुकृतवेषः ।
पश्यन्नपि च न पश्यति मूढो ह्युदरनिमित्तं बहुकृतवेषः ॥ १४ ॥
अंगं गलितं पलितं मुंडं दशनविहीनं जातं तुंडम् ।
वृद्धो याति गृहीत्वा दंडं तदपि न मुंचत्याशापिंडम् ॥ १५ ॥
अग्रे वह्निः पृष्ठे भानू रात्रौ चुबुकसमर्पितजानुः ।
करतलभिक्षातरुतलवासस्तदपि न मुंचत्याशापाशः ॥ १६ ॥
कुरुते गंगासागरगमनं व्रतपरिपालनमथवा दानम् ।
ज्ञानविहीनः सर्वमतेन मुक्तिं न भजति जन्मशतेन ॥ १७ ॥
सुरमंदिरतरुमूलनिवासः शय्या भूतलमजिनं वासः ।
सर्वपरिग्रहभोगत्यागः कस्य सुखं न करोति विरागः ॥ १८ ॥
योगरतो वा भोगरतो वा संगरतो वा संगविहीनः ।
यस्य ब्रह्मणि रमते चित्तं नंदति नंदति नंदत्येव ॥ १९ ॥
भगवद्गीता किंचिदधीता गंगाजललवकणिका पीता ।
सकृदपि येन मुरारिसमर्चा क्रियते तस्य यमेन न चर्चा ॥ २० ॥
पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् ।
इह संसारे बहुदुस्तारे कृपयापारे पाहि मुरारे ॥ २१ ॥
रथ्याकर्पटविरचितकंथः पुण्यापुण्यविवर्जितपंथः ।
योगी योगनियोजितचित्तो रमते बालोन्मत्तवदेव ॥ २२ ॥
कस्त्वं कोऽहं कुत आयातः का मे जननी को मे तातः !
इति परिभावय सर्वमसारं विश्वं त्यक्त्वा स्वप्नविचारम् ॥ २३ ॥
यि मयि चान्यत्रैको विष्णुर्व्यर्थं कुप्यसि मय्यसहिष्णुः ।
सर्वस्मिन्नपि पश्यात्मानं सर्वत्रोत्सृज भेदाज्ञानम् ॥ २४ ॥

शत्रौ मित्रे पुत्रे बंधौ मा कुरु यत्नं विग्रहसंधौ ।
भव समचित्तः सर्वत्र त्वं वांछस्यचिराद्यदि विष्णुत्वम् ॥ २५ ॥
कामं क्रोधं लोभं मोहं त्यक्त्वात्मानं भावय कोऽहम् ।
आत्मज्ञानविहीना मूढास्ते पच्यन्ते नरकनिगूढाः ॥ २६ ॥
गेयं गीतानामसहस्रं ध्येयं श्रीपतिरूपमजस्रम् ।
नेयं सज्जनसंगे चित्तं देयं दीनजनाय च वित्तम् ॥ २७ ॥
सुखतः क्रियते रामाभोगः पश्चाद्धंत शरीरे रोगः ।
यद्यपि लोके मरणं शरणं तदपि न मुंचति पापाचरणम् ॥ २८ ॥
अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम् ।
पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता रीतिः ॥ २९ ॥
प्राणायामं प्रत्याहारं नित्यानित्यविवेकविचारम् ।
जाप्यसमेतसमाधिविधानं कुर्ववधानं महदवधानम् ॥ ३० ॥
गुरुचरणांबुजनिर्भरभक्तः संसारादचिराद्भव मुक्तः ।
सेंद्रियमानसनियमादेवं द्रक्ष्यसि निजहृदयस्थं देवम् ॥ ३१ ॥

॥ इति मोहमुद्गरः समाप्तः ॥

— — —

॥ योगतारावली ॥

वंदे गुरूणां चरणारविंदे
संदर्शितस्वात्मसुखाववोधे ॥
जनस्य ये जांगलिकायमाने
संसारहालाहलमोहशांत्यै ॥ १ ॥
सदाशिवोक्तानि सपादलक्ष-
लयावधानानि वसन्ति लोके ॥
नादानुसंधानसमाधिमेकं
मन्यामहे मान्यतमं लयानाम् ॥ २ ॥
सरेचपूरैरनिलस्य कुंभैः
सर्वासु नाडीषु विशोधितासु ॥
अनाहताख्यो बहुभिः प्रकारै-
रंतः प्रवर्तेत सदा निनादः ॥ ३ ॥
नादानुसंधान नमोऽस्तु तुभ्यं
त्वां साधनं तत्त्वपदस्य जाने ॥
भवत्प्रसादात्पवनेन साकं
विलीयते विष्णुपदे मनो मे ॥ ४ ॥
जालंधरोड्याणनमूलबंधा-
ञ्जल्पन्ति कंठोदरपायुमूलान् ॥
बंधत्रयेऽस्मिन्परिचीयमाने
बंधः कुतो दारुणकालपाशात् ॥ ५ ॥
ओड्याणजालंधरमूलबंधै-
रुन्निद्रितायामुरगांगनायाम् ॥
प्रत्यङ्मुखत्वात्प्रविशन्सुषुम्नां

गमागमौ मुंचति गंधवाहः ॥ ६ ॥
उत्थापिताधारहुताशनोल्कै-
राकुंचनैः शश्वदपानवायोः ॥
संतापिताच्चंद्रमसः पतंतीं
पीयूषधारां पिबतीह धन्यः ॥ ७ ॥
बंधत्रयाभ्यासविपाकजातां
विवर्जितां रेचकपूरकाभ्याम् ॥
विशोषयन्तीं विषयप्रवाहं
विद्यां भजे केवलकुंभरूपाम् ॥ ८ ॥
अनाहते चेतसि सावधानै-
रभ्यासशूरैरनुभूयमाना ॥
संस्तंभितश्वासमनःप्रचारा
सा जृंभते केवलकुंभकश्रीः॥ ९ ॥
सहस्रशः सन्तु हठेषु कुंभाः
संभाव्यते केवलकुंभ एव ॥
कुंभोत्तमे यत्र तु रेचपूरौ
प्राणस्य न प्राकृतवैकृताख्यौ ॥ १० ॥
त्रिकूटनाम्नि स्तिमितेऽतरंगे
खे स्तंभिते केवलकुंभकेन ॥
प्राणानिलो भानुशशांकनाड्यौ
विहाय सद्यो विलयं प्रयाति ॥ ११ ॥
प्रत्याहृतः केवलकुंभकेन
प्रबुद्धकुंडल्युपभुक्तशेषः
प्राणः प्रतीचीनपथेन मंदं
विलीयते विष्णुपदांतराले ॥ १२ ॥

निरंकुशानां श्वसनोद्गमानां
निरोधनैः केवलकुंभकाख्यैः ॥
उदेति सर्वेन्द्रियवृत्तिशून्यो
मरुल्लयः कोऽपि महामतीनाम् ॥ १३ ॥

न दृष्टिलक्ष्याणि न चित्तबंधो
न देशकालौ न च वायुरोधः ॥
न धारणाध्यानपरिश्रमो वा
समेधमाने सति राजयोगे ॥ १४ ॥

अशेषदृश्योज्झितदृङ्मयाना-
मवस्थितानामिह राजयोगे ॥
न जागरो नापि सुषुप्तिभावो
न जीवितं नो मरणं विचित्रम् ॥ १५ ॥

अहंममत्वाद्वयपहाय सर्वं
श्रीराजयोगे स्थिरमानसानाम् ॥
न द्रष्टृता नास्ति च दृश्यभावः
सा जृंभते केवलसंविदेव ॥ १६ ॥

नेत्रे ययोन्मेषनिमेषशून्ये
वायुर्यया वर्जितरेचपूरः ॥
मनश्च संकल्पविकल्पशून्यं
मनोन्मनी सा मयि संनिधत्ताम् ॥ १७ ॥

चित्तेंद्रियाणां चिरनिग्रहेण
श्वासप्रचारे शमिते यमींद्राः ॥
निवातदीपा इव निश्चलांगा
मनोन्मनीमग्नधियो भवन्ति ॥ १८ ॥

उन्मन्यवस्थाधिगमाय विद्व-

न्नुपायमेकं तव निर्दिशामः ॥

पश्यन्नुदासीनतया प्रपंचं
संकल्पमुन्मूल्य सावधानः ॥ १९ ॥

प्रसह्य संकल्पपरंपराणां
संभेदने संततसावधानम् ॥
आलंबनाशादपचीयमानं
शनैः शनैः शांतिमुपैति चेतः ॥ २० ॥

निश्वासलोपैर्निभृतैः शरीरै-
र्नेत्रांबुजैरर्धनिमीलितैश्च ॥
अविर्भवन्तीममनस्कमुद्रा-
मालोकयामो मुनिपुंगवानाम् ॥ २१ ॥

अमी यमींद्राः सहजामनस्का-
दहंममत्वे शिथिलायमाने
मनोतिगं मारुतवृत्तिशून्यं
गच्छन्ति भावं गगनावशेषम् ॥ २२ ॥

निवर्तयन्तीं निखिलेंद्रियाणि
प्रवर्तयन्तीं परमात्मयोगम् ॥
संविन्मयीं तां सहजामनस्कां
कदा गमिष्यामि गतान्यभावः ॥ २३ ॥

प्रत्यग्विमर्शातिशयेन पुंसां
प्राचीनगंधेषु पलायितेषु ॥
प्रादुर्भवेत्काचिदजाड्यनिद्रा
प्रपंचचिंतां परिवर्जयन्ती ॥ २४ ॥

विच्छिन्नसंकल्पविकल्पमूले
निःशेषनिर्मूलितकर्मजाले ॥

निरंतराभ्यासनितांतभद्रा
सा जृंभते योगिनि योगनिद्रा ॥ २५ ॥
विश्रांतिमासाद्य तुरीयतल्पे
विश्वाद्यवस्थात्रितयोपरिस्थे ॥
संविन्मयीं कामपि सर्वकालं
निद्रां सखे निर्विश निर्विकल्पाम् ॥ २६ ॥
प्रकाशमाने परमात्मभानौ
नश्यत्यविद्यातिमिरे समस्ते ॥
अहो बुधा निर्मलदृष्टयोऽपि
किंचिन्न पश्यन्ति जगत्समग्रम् ॥ २७ ॥
सिद्धिं तथाविधमनोविलयां समाधौ
श्रीशैलशृंगकुहरेषु कदोपलप्स्ये ॥
गात्रं यदा मम लताः परिवेष्टयन्ति
कर्णे यदा विरचयन्ति खगाश्च नीडान् ॥ २८ ॥
विचरतु मतिरेषा निर्विकल्पे समाधौ
कुचकलशयुगे वा कृष्णसारेक्षणानाम् ॥
चतुरजडमते वा सज्जनानां मते वा
मतिकृतगुणदोषा मा विभुं न स्पृशन्ति ॥ २९ ॥

॥ इति योगतारावली संपूर्णा ॥

॥ शतश्लोकी ॥

दृष्टान्तो नैव दृष्टस्त्रिभुवनजठरे सद्गुरोर्ज्ञानदातुः
स्पर्शश्चेत्तत्र कल्प्यः स नयति यदहो स्वणतामश्मसारम् ।
न स्पर्शत्वं तथापि श्रितचरणयुगे सद्गुरुः स्वीयशिष्ये
स्वीयं साम्यं विधत्ते भवति निरुपमस्तेन वाऽलौकिकोऽपि ॥ १
यद्वच्छ्रीखंडवृक्षप्रसृतपरिमलेनाभितोऽन्येऽपि वृक्षाः
शश्वत्सौगंध्यभाजोऽप्यतनुतनुभृतां तापमुन्मूलयन्ति ।
आचार्याल्लब्धबोधा अपि विधिवशतः सन्निधौ संस्थितानां
त्रेधा तापं च पापं सकरुणहृदयाः स्वोक्तिभिः क्षालयन्ति ॥ २ ॥
आत्मानात्मप्रतीतिः प्रथममभिहिता सत्यमिथ्यात्वयोगात्
द्वेधा ब्रह्मप्रतीतिर्निगमनिगदिता स्वानुभूत्योपपत्त्या ।
आद्या देहानुबंधाद्भवति तदपरा सा च सर्वात्मकत्वात्
आदौ ब्रह्माहमस्मीत्यनुभव उदिते खल्विदं ब्रह्म पश्चात् ॥ ३ ॥
आत्मा चिद्वित्सुखात्माऽनुभवपरिचितः सर्वदेहादियंता
सत्येवं मूढबुद्धिर्भजति ननु जनोऽनित्यदेहात्मबुद्धिम् ।
बाह्योऽस्थिस्नायुमज्जापलरुधिरवसाचर्ममेदोयुगन्त-
र्विण्मूत्रश्लेष्मपूर्णं स्वपरवपुरहो संविदित्वाऽपि भूयः ॥ ४ ॥
देहस्त्रीपुत्रमित्रानुचरहयवृषास्तोषहेतुर्ममेत्थं
सर्वे स्वायुर्नयन्ति प्रथितमलममी मांसमीमांसयेह ।
एते जीवन्ति येन व्यवहृतिपटवो येन सौभाग्यभाज-
स्तं प्राणाधीशमंतर्गतममृतममुं नैव मीमांसयन्ति ॥ ५ ॥
कश्चित्कीटः कथंचित्पटुमतिरभितः कंटकानां कुटीरं
कुर्वंस्तेनैव साकं व्यवहृतिविधये चेष्टते यावदायुः ।
तद्वज्जीवोऽपि नानाचरितसमुदितैः कर्मभिः स्थूलदेहं

निर्मायात्रैव तिष्ठन्ननुदिनममुना साकमभ्येति भूमौ ॥ ६ ॥
स्वीकुर्वन्व्याघ्रवेषं स्वजठरभृतये भीषयन्यश्च मुग्धान्
मत्या व्याघ्रोऽहमित्थं स नरपशुमुखान्बाधते किं नु सत्त्वान् ।
मत्वा स्त्रीवेषधारी स्त्र्यहमिति कुरुते किं नटो भर्तुरिच्छां
तद्वच्छारीर आत्मा पृथगनुभवतो देहतो यः स साक्षी ॥ ७ ॥
स्वं बालं रोदमानं चिरतरसमयं शान्तिमानेतुमग्रे
द्राक्षं खार्जूरमाम्रं सुकदलमथवा योजयत्यंबिकाऽस्य ।
तद्वच्चेतोऽतिमूढं बहुजननभवान्मौढ्यसंस्कारयोगात्
बोधोपायैरनेकैरवशमुपनिषद्बोधयामास सम्यक् ॥ ८ ॥
यत्प्रीत्या प्रीतिपात्रं तनुयुवतितनूजार्थमुख्यं स तस्मात्
प्रेयानात्माऽथ शोकास्पदमितरदतः प्रेय एतत्कथं स्यात् ।
भार्याऽऽद्यं जीवितार्थे वितरति च वपुः स्वात्मनः श्रेय इच्छन्
तस्मादात्मानमेव प्रियमधिकमुपासीत विद्वान्न चान्यत् ॥ ९ ॥
यस्माद्यावत्प्रियं स्यादिह हि विषयतस्तावदस्मिन्प्रियत्वं
यावद्दुःखं च यस्माद्भवति खलु ततस्तावदेवाप्रियत्वम् ।
नैकस्मिन्सर्वकालेऽस्त्युभयमपि कदाऽप्यप्रियोऽपि प्रियः स्यात् ॥
प्रेयानप्यप्रियो वा सततमपि ततः प्रेय आत्माख्यवस्तु ॥ १० ॥
श्रेयः प्रेयश्च लोके द्विविधमभिहितं काम्यमात्यंतिकं च
काम्यं दुःखैकबीजं क्षणलवविरसं तच्चिकीर्षन्ति मंदाः ।
ब्रह्मैवात्यंतिकं यन्निरतिशयसुखस्यास्पदं संश्रयन्ते
तत्त्वज्ञास्तच्च काठोपनिषदभिहितं षड्विधायां च वल्ल्याम् ॥ ११ ॥
आत्मांभोधेस्तरंगोऽस्म्यहमिति गमने भावयन्नासनस्थः
संवित्सूत्रानुविद्धो मणिरहमिति वाऽस्मींद्रियार्थप्रतीतौ ।
दृष्टोऽस्म्यात्मावलोकादिति शयनविधौ मग्न आनंदसिंधौ

अंतर्निष्ठो मुमुक्षुः स खलु तनुभृतां यो नयत्येवमायुः ॥१२॥
वैराजव्यष्टिरूपं जगदखिलमिदं नामरूपात्मकं स्या-
दंतःस्थप्राणमुख्यात्प्रचलति च पुनर्वेत्ति सर्वान्पदार्थान् ॥
नायं कर्ता न भोक्ता सवितृवदिति यो ज्ञानविज्ञानपूर्णः
साक्षादित्थं विजानन्व्यवहरति परात्मानुसंधानपूर्वम् ॥ १३ ॥
नैर्वेद्यं ज्ञानगर्भं द्विविधमभिहितं तत्र वैराग्यमाद्यं
प्रायो दुःखावलोकाद्भवति गृहसुहृत्पुत्रवित्तैषणादेः ॥
अन्यज्ज्ञानोपदेशाद्यदुदितविषये वान्तवद्धेयता स्यात्
प्रव्रज्याऽपि द्विधा स्यान्नियमितमनसां देहतो गेहतश्च ॥ १४ ॥
यः कश्चित्सौख्यहेतोस्त्रिजगति यतते नैव दुःखस्य हेतोः
देहेऽहंता तदुत्था स्वविषयममता चेति दुःखास्पदे द्वे ॥
जानन्रोगाभिघाताद्यनुभवति यतोऽनित्यदेहात्मबुद्धि-
र्भार्यापुत्रार्थनाशे विपदमथ परामेति नारातिनाशे ॥ १५ ॥
तिष्ठन्गेहे गृहेशोऽप्यतिथिरिव निजं धाम गंतुं चिकीर्षुः
देहस्थं दुःखसौख्यं न भजति सहसा निर्ममत्वाभिमानः ॥
आयात्रायास्यतीदं जलदपटलवद्यातृ यास्यत्यवश्यं
देहाद्यं सर्वमेव प्रविदितविषयो यश्च तिष्ठत्ययत्नः ॥ १६ ॥
शक्त्या निर्मोकतः स्याद्बहिरहिरिव यः प्रव्रजन्स्वीयगेहात्
छायां मार्गद्रुमोत्थां पथिक इव मनाक् संश्रयेद्देहसंस्थाम् ॥
क्षुत्पर्याप्तं तरुभ्यः पतितफलमयं प्रार्थयेद्भैक्ष्यमन्नं
स्वात्मारामं प्रवेष्टुं स खलु सुखमयं प्रव्रजेद्देहतोऽपि ॥ १७ ॥
कामो बुद्धावुदेति प्रथममिह मनस्युद्दिशत्यर्थजातं
तद्गृह्णातींद्रियास्यैस्तदनाधिगमतः क्रोध आविर्भवेच्च ॥
प्राप्तावर्थस्य संरक्षणमतिरुदितो लोभ एतत्त्रयं स्यात्
सर्वेषां पातहेतुस्तदिह मतिमता त्याज्यमध्यात्मयोगात् ॥ १८ ॥

दानं ब्रह्मार्पणं यत्क्रियत इह नृभिः स्यात्क्षमाऽक्रोधसंज्ञा
श्रद्धाऽऽस्तिक्यं च सत्यं सदिति परमतः सेतुसंज्ञं चतुष्कम् ॥
तत्स्याद्बंधाय जंतोरिति चतुर इमान्दानपूर्वैश्चतुर्भिः
तीर्त्वा श्रेयोऽमृतं च श्रयत इह नरः स्वर्गतिं ज्योतिराप्तिम् ॥१९॥
अन्नं देवातिथिभ्योऽर्पितममृतमिदं चान्यथा मोघमन्नं
यश्चात्मार्थं विधत्ते तदिह निगदितं मृत्युरूपं हि तस्य ॥
लोकेऽसौ केवलाघो भवति तनुभृता केवलादी च यः स्यात्
त्यक्त्वा प्राणाग्निहोत्रं विधिवदनुदिनं योऽश्नुते सोऽपि मर्त्यः ॥२०॥
लोको भोजः स एवार्पयति गृहगतायार्थिनेऽन्नं कृशाय
यस्तस्मै पूर्णमन्नं भवति मखविधौ जायतेऽजातशत्रुः ॥
सख्ये नान्नार्थिने योऽर्पयति न स सखा सेवमानाय नित्यं
संसक्तायान्नमस्माद्विमुख इव परावृत्तिमिच्छेत्कदर्यात् ॥ २१ ॥
स्वाज्ञानज्ञानहेतू जगदुदयलयौ सर्वसाधारणौ स्तः
जीवेश्वास्वर्णगर्भं श्रुतय इति जगुर्दृश्यते स्वप्रबोधे ॥
विश्वं ब्रह्मण्यबोधे जगति पुनरिदं दृश्यते ब्रह्म यद्वत्
शुक्तौ रौप्यं च रौप्येऽधिकरणमथवा दृश्यतेऽन्योन्यमोहात् ॥ २२ ॥
तुच्छत्वान्नासदासीद्गगनकुसुमवद्भेदकं नो सदासीत्
किंत्वाभ्यामन्यदासीद्व्यवहृतिगतिसन्नास लोकस्तदानीम् ॥
किंत्वर्वागेव शुक्तौ रजतवदपरो नो विराड् व्योमपूर्वः ।
शर्मण्यात्मन्यथैतत्कुहकसलिलवत्किं भवेदावरीवः ॥ २३ ॥
बंधो जन्मात्ययात्मा यदि न पुनरभूत्तर्हि मोक्षोऽपि नासीत्
यद्वद्रात्रिर्दिनं वा न भवति तरणौ किंतु दृग्दोष एषः ॥
अप्राणं शुद्धमेकं समभवदथ तन्मायया कर्तृसंज्ञं ।
तस्मादन्यच्च नासीत्परिवृतमजया जीवभूतं तदेव ॥ २४ ॥
प्रागासीद्भावरूपं तम इति तमसा गूढमस्मादतर्क्यं ।

क्षीरांतर्यद्वदंभो जनिरिह जगतो नामरूपात्मकस्य ॥
कामाद्धातुः सिसृक्षोरनुगतजगतः कर्मभिः संप्रवृत्तात् ।
रेतोरूपैर्मनोभिः प्रथममनुगतैः संततैः कार्यमाणैः ॥ २५ ॥
चत्वारोऽस्याः कपर्दा युवतिरथ भवेन्नूतना नित्यमेषा ।
माया वा पेशला स्यादघटितघटनापाटवं याति यस्मात् ॥
स्यादारंभे घृतास्या श्रुतिभववयुनान्येवमाच्छादयन्ती ।
तस्यामेतौ सुपर्णाविव परपुरुषौ तिष्ठतोऽर्थप्रतीत्या ॥ २६ ॥
एकस्तत्रास्त्यसंगस्तदनु तदपरोऽज्ञानसिंधुं प्रविष्टो
विस्मृत्यात्मस्वरूपं स विविधजगदाकारमाभासमैक्षत् ॥
बुद्ध्याऽन्तर्यावदैक्षद्विसृजति तमजा सोऽपि तामेवमेक-
स्तावद्विप्रास्तमेकं कथमपि बहुधा कल्पयन्ति स्ववाग्भिः ॥२७॥
नायाति प्रत्यगात्मा प्रजननसमये नैव यात्यंतकाले ।
यत्सोऽखंडोऽस्ति लैंगं मन इह विशति प्रव्रजत्यूर्ध्वमर्वाक् ॥
तत्कार्श्यं स्थूलतां वा न भजति वपुषः किंतु संस्कारजाते ।
तेजोमात्रा गृहीत्वा व्रजति पुनरिहायाति तैस्तैस्सहैव ॥ २८ ॥
आसीत्पूर्वं सुबंधुर्भूशमवनिसुरो यः पुरोधाः सनाते-
र्ब्राह्मयात्कूटाभिचारात्स खलु मृतिमितस्तन्मनोऽगात्कृतान्तम् ॥
तद्भ्राता श्रौतमंत्रैः पुनरनयादिति प्राह सूक्तेन वेदः
तस्मादात्माभियुक्तं व्रजति ननु मनः कर्हिचिन्नांतरात्मा ॥ २९ ॥
एको निष्कंप आत्मा प्रचलति मनसा धावमानेन तस्मिन् ।
तिष्ठन्नग्रेऽथ पश्चान्न हि तमनुगतं जानते चक्षुराद्याः ॥
यद्वत्पाथस्तरंगः प्रचलति परितो धावमानैस्तदंतः ।
प्राक्पश्चादस्ति तेषां पवनसमुदितैस्तैः प्रशान्तैर्यथावत् ॥ ३० ॥
एकाक्यासीत्स पूर्वं मृगयति विषयानानुपूर्व्याऽन्तरात्मा ।
जाया मे स्यात्प्रजा वा धनमुपकरणं कर्म कुर्वंस्तदर्थम् ॥

क्लेशैः प्राणावशेषैर्महदपि मनुते नान्यदस्माद्वरीय-
स्त्वेकालाभेऽप्यकृत्स्नो मृत इव विरमत्येकहान्याऽकृतार्थः ॥ ३१ ॥
नासीत्पूर्वं न पश्चादतनुदिनकराच्छादको वारिवाहः ।
दृश्यः किं त्वंतराऽसौ स्थगयति स दृशं पश्यतो नार्कबिंबम् ॥
नो चेदेवं विनाऽर्कं जलधरपटलं भासते तर्हि कस्मात् ।
तद्वद्विश्वं विधत्ते दृशमथ न परं भासकं चालकं स्वम् ॥ ३२ ॥
भुंजानः स्वप्नराज्यं ससकलविभवो जागरं प्राप्य भूयः
राज्यभ्रष्टोऽहमित्थं न भजति विषमं तन्मृषा मन्यमानः।
स्वप्ने कुर्वन्नगम्यागमनमुखमघं तेन न प्रत्यवायी
तद्वज्जाग्रद्दशायां व्यवहृतिमखिलां स्वप्नवद्विस्मरेच्चेत् ॥ ३३॥
स्वप्नावस्थाऽनुभूतं शुभमथ विषमं तन्मृषा जागरे स्यात्
जाग्रत्यां स्थूलदेहव्यवहृतिविषयं तन्मृषा स्वापकाले ।
इत्थं मिथ्यात्वसिद्धावनिशमुभयथा सज्यते तत्र मूढः
सत्ये तद्भासकेऽस्मिन्निह हि कुत इदं तन्न विद्मो वयं हि ॥३४॥
जीवन्तं जाग्रतीह स्वजनमथ मृतं स्वप्नकाले निरीक्ष्य
निर्वेदं यात्यकस्मान्मृतममृतममुं वीक्ष्य हर्षं प्रयाति ।
स्मृत्वाऽप्येतस्य जंतोर्निधनमसुयुतिं भाषते तेन साकं
सत्येवं भाति भूयोऽल्पकसमयवशात्सत्यता वा मृषात्वम् ॥३५॥
स्वाप्नस्त्रीसंगसौख्यादपि भृशमसतो या च रेतश्च्युतिः स्यात्
सा दृश्या तद्वदेतत्स्फुरति जगदसत्कारणं सत्यकल्पम् ।
स्वप्ने सत्यः पुमान्स्याद्युवतिरिह मृषैवानयोः संयुतिश्च
प्रातः शुक्रेण वस्त्रोपहतिरिति यतः कल्पनामूलमेतत् ॥३६॥
पश्यत्यारामयस्य प्रतिदिवसममी जंतवः स्वापकाले
पश्यत्येनं न कश्चित्करणगणमृते मायया क्रीडमानम् ।
जाग्रत्यर्थव्रजानामथ च तनुभृतां भासकं चालकं वा

नो जानीते सुषुप्तौ परमसुखमयं कश्चिदाश्चर्यमेतत् ॥३७॥
स्वप्ने मंत्रोपदेशः श्रवणपरिचितः सत्य एष प्रबोधे
स्वप्नादेव प्रसादादभिलषितफलं सत्यतां प्रातरेति ।
सत्यप्राप्तिस्त्वसत्यादपि भवति तथा किंच तत्स्वप्रकाशं
येनेदं भाति सर्वं चरमचरमथोच्चावचं दृश्यजातम् ॥३८॥

मध्यप्राणं सुषुप्तौ स्वजनिमनुविशन्त्यग्निसूर्योदयोऽमी
वागाद्याः प्राणवायुं तदिह निगदिता ग्लानिरेषां न वायोः ।
तेभ्यो दृश्यावभासो भ्रम इति विदितः शुक्तिकारौप्यकल्पः
प्राणायामव्रतं तच्छ्रुतिशिरसि मतं स्वात्मलब्धौ न चान्यत् ॥३९॥

नोऽकस्मादार्द्रमेधः स्पृशति च दहनः किंतु शुष्कं निदाघा-
दार्द्रं चेतोऽनुबंधैः कृतसुकृतमपि स्वोक्तकर्मप्रजार्थैः ।
तद्वज्ज्ञानाग्निरेतत्स्पृशति न सहसा किंतु वैराग्यशुष्कं
तस्माच्छुद्धो विरागः प्रथममभिहितस्तेन विज्ञानसिद्धिः ॥४०॥

यत्किंचिन्नामरूपात्मकमिदमसदेवोदितं भाति भूमौ
येनानेकप्रकारैर्व्यवहरति जगद्येन तेनेश्वरेण ।
तद्वत्प्रच्छादनीयं निभृतरशनया यद्वदेव द्विजिह्व-
स्तेन त्यक्तेन भोज्यं सुखमनतिशयं मा गृधोऽन्यद्धनाद्यम् ॥४१॥

जीवन्मुक्तिर्मुमुक्षोः प्रथममथ ततो मुक्तिरात्यंतिकी च
तेऽभ्यासज्ञानयोगाद्गुरुचरणकृपाऽपांगसंगेन लब्धात् ।
अभ्यासोऽपि द्विधा स्यादधिकरणवशाद्दैहिको मानसश्च
शारीरस्त्वासनाद्यो ह्युपरतिरपरो ज्ञानयोगः पुरोक्तः ॥४२॥

सर्वानुन्मूल्य कामान् हृदि कृतनिलयान्क्षिप्तशंकूनिवोच्चैः
दीर्यद्देहाभिमानस्त्यजति चपलतामात्मदत्तावधानः ।
यात्यूर्ध्वस्थानमुच्चैः कृतसुकृतभरो नाडिकाभिर्विचित्रं

नीलश्वेतारुणाभिः स्रवदमृतभरं गृह्यमाणात्मसौख्यः ॥४३॥
प्रापश्यद्विश्वमात्मेत्ययमिह पुरुषः शोकमोहाद्यतीतः
शुक्रं ब्रह्माध्यगच्छत्सं खलु सकलवित्सर्वसिद्ध्यास्पदं हि ।
विस्मृत्य स्थूलसूक्ष्मप्रभृतिवपुरसौ सर्वसंकल्पशून्यो
जीवन्मुक्तस्तुरीयं पदमधिगतवान्पुण्यपापैर्विहीनः ॥४४॥
यः सत्त्वाकारवृत्तौ प्रतिफलति युवा देहमात्रावृतोऽपि
तद्धर्मैर्बाल्यवार्द्धक्यादिभिरनुपहतः प्राण आविर्बभूव ॥
श्रेयान्साध्यस्तमेतं सुनिपुणमतयः सत्यसंकल्पभाजो
ह्यभ्यासाद्देवयन्तः परिणतमनसा साकमूर्ध्वं नयन्ति ॥ ४५ ॥
प्रायोऽकामोऽस्तकामो निरतिशयसुखायात्मकामस्तदाऽसौ
तत्प्राप्तावाप्तकामः स्थितचरमदशस्तस्य देहावसाने ।
प्राणा नैवोत्क्रमन्ति क्रमविरतिमिताः स्वस्वहेतौ तदानीं
क्वायं जीवो विलीनो लवणमिव जलेऽखंड आत्मैव पश्चात् ॥४६॥
पिंडीभूतं यदंतर्जलनिधिसलिलं याति तत्सैंधवाख्यं
भूयः प्रक्षिप्तमस्मिन्विलयमुपगतं नामरूपे जहाति !
प्राज्ञस्तद्वत्परात्मन्यथ भजति लयं तस्य चेतो हिमांशौ
वागग्नौ चक्षुरर्के पयसि पुनरसृग्रेतसी दिक्षु कर्णौ ॥ ४७ ॥
क्षीरांतर्यद्वदाज्यं मधुरिमविदितं तत्पृथग्भूतमस्मात्
भूतेषु ब्रह्म तद्वद्व्यवहृतिविदितं श्रांतविश्रांतिबीजम् ।
यं लब्ध्वा लाभमन्यं तृणमिव मनुते यत्र नोदेति भीतिः
सान्द्रानंदं यदंतः स्फुरति तदमृतं विद्ध्यतो ह्यन्यदार्तम् ॥ ४८ ॥
ओतः प्रोतश्च तंतुष्विह विततपटश्चित्रवर्णेषु चित्रः
तस्मिन्जिज्ञास्यमाने ननु भवति पटः सूत्रमात्रावशेषः ।
तद्वद्विश्वं विचित्रं नगनगरनरग्रामपश्वादिरूपं
प्रोतं वैराजरूपे स वियति तदपि ब्रह्मणि प्रोतमोतम् ॥ ४९ ॥

रूपं रूपं प्रतीदं प्रतिफलनवशात्प्राप्तिरूप्यं प्रपेदे
ह्येको द्रष्टा द्वितीयो भवति च सलिले सर्वतोऽनंतरूपः ।
इंद्रो मायाभिरास्ते श्रुतिरिति वदति व्यापकं ब्रह्म तस्मात्
जीवत्वं यात्यकस्माद‌तिविमलतरे बिंबितं बुद्ध्युपाधौ ॥ ५० ॥
तज्ज्ञाः पश्यन्ति बुद्ध्या परमबलवतो माययाऽक्तं पतंगं
बुद्धावंतःसमुद्रे प्रतिफलितमरीच्यास्पदं वेधसस्तम् ।
याद‌ग्यावानुपाधिः प्रतिफलति तथा ब्रह्म तस्मिन्यथाऽऽस्यं
प्राप्तादर्शानुरूपं प्रतिफलति यथाऽवस्थितं सत्सदैव ॥ ५१ ॥
एको भानुस्तटस्थः प्रतिफलनवशाद्यस्त्वनेकोदकान्त-
र्नानात्वं यात्युपाधिस्थितिगतिसमतां चापि तद्वत्परात्मा ।
भूतेषूच्चावचेषु प्रतिफलित इवाभाति तावत्स्वभावा-
वच्छिन्नो यः परं तु स्फुटमनुपहतो भाति तावत्स्वभावैः ॥ ५२ ॥
यद्वत्पीयूषरश्मौ दिनकरकिरणैर्बिंबितैरेति सांद्रं
नाशं नैशं तमिस्रं गृहगतमथवा मूर्च्छितैः कांस्यपात्रे ॥
तद्वद्बुद्धौ परात्मद्युतिभिरनुपदं बिंबिताभिः समंता-
द्भासन्ते हींद्रियास्यप्रभृतिभिरनिशं रूपमुख्याः पदार्थाः ॥ ५३ ॥
पूर्णात्मानात्मभेदात्त्रिविधमिह परं बुद्ध्यवच्छिन्नमन्यत्
तत्रैवाभासमात्रं गगनमिव जले त्रिप्रकारं विभाति ।
अंभोऽवच्छिन्नमास्मिन्प्रतिफलितमतः पाथसोऽतर्बहिश्च
पूर्णावच्छिन्नयोगे व्रजति लयमविद्या स्वकार्यैः सहैव ॥ ५४ ॥
दृश्यन्ते दारुनार्यो युगपदगणिताः स्तंभसूत्रप्रयुक्ताः
संगीतं दर्शयन्त्यो व्यवहृतिमपरां लोकसिद्धां च सर्वाम् ॥
सर्वत्रानुप्रविष्टादभिनवविभवाद्यावदर्थानुबंधात्
तद्वत्सूत्रात्मसंज्ञाद्व्यवहरति जगद्भूर्भुवस्स्वर्महान्तम् ॥ ५५ ॥
तत्सत्यं यत्त्रिकालेष्वनुपहतमदः प्राणदिग्व्योममुख्यं

यस्मिन्विश्रान्तमास्ते तदिह निगदितं ब्रह्म सत्यस्य सत्यम् ।
नास्त्यन्यत्किंच यद्वत्परमधिकमतो नाम सत्यस्य सत्यं
सच्च त्यच्चेति मूर्ताद्युपहितमवरं सत्यमस्यापि सत्यम् ॥ ५६ ॥
यत्किंचिद्भात्यसत्यं व्यवहृतिविषये रौप्यसर्पाम्बुमुख्यं
तद्वै सत्याश्रयेणेत्ययमिह नियमः सावधिर्लोकसिद्धः ।
तद्वत्सत्यस्य सत्ये जगदखिलमिदं ब्रह्मणि प्राविरासीत्
मिथ्याभूतं प्रतीतं भवति खलु यतस्तच्च सत्यं वदन्ति ॥ ५७ ॥
यत्राकाशावकाशः कलयति च कलामात्रतां यत्र कालो
यत्रैवाशावसानं बृहदिह हि विराट् पूर्वमर्वागिवास्ते ।
सूत्रं यत्राविरासीन्महदपि महतस्तद्धि पूर्णाच्च पूर्णं
संपूर्णादर्णवादेरपि भवति यथा पूर्णमेकार्णवांभः ॥ ५८ ॥
अंतः सर्वौषधीनां पृथगमितरसैर्गंधवीर्यैर्विपाकै-
रेकं पाथोदपाथः परिणमति यथा तद्वदेवान्तरात्मा ॥
नानाभूतस्वभावैर्वहति वसुमती येन विश्वं पयोदो
वर्षत्युच्चैर्हुताशः पचति दहति वा येन सर्वान्तरोऽसौ ॥ ५९ ॥
भूतेष्वात्मानमात्मन्यनुगतमखिलं भूतजातं प्रपश्येत्
प्रायः पाथस्तरंगान्वयवदथ चिरं सर्वमात्मैव पश्येत् ॥
एकं ब्रह्माद्वितीयं श्रुतिशिरसि मतं नेह नानाऽस्ति किंचित्
मृत्योराप्नोति मृत्युं स इह जगदिदं यस्तु नानेव पश्येत् ॥ ६० ॥
प्राक्पश्चादस्ति कुंभाद्गगनमिदमिति प्रत्यये सत्यपीदं
कुंभोत्पत्तावुदेति प्रलयमुपगते नश्यतीत्यन्यदेशम् ॥
नीते कुंभेन साकं व्रजति भजति वा तत्प्रमाणानुकारौ
इत्थं मिथ्याप्रतीतिः स्फुरति तनुभृतां विश्वतस्तद्वदात्मा ॥ ६१ ॥
यावत्पिंडो गुडस्य स्फुरति मधुरिमैवास्ति सर्वोऽपि तावान्
यावान्कर्पूरपिंडः परिणमति सदामोद एवात्र तावान् ॥

विश्वं यावद्विभाति द्रुमनगनगरारामचैत्याभिरामं
तावच्चैतन्यमेकं प्रविकसति यतोऽन्ते तदात्मावशेषम् ॥ ६२ ॥
वाद्यान्नादानुभूतिर्यदपि तदपि सा नूनमाघातगम्या
वाद्याघातध्वनीनां न पृथगनुभवः किंतु तत्साहचर्यात् ॥
मायोपादानमेतत्सहचरितमिव ब्रह्मणाऽऽभाति तद्वत्
तस्मिन्प्रत्यक्प्रतीते न किमपि विषयीभावमाप्नोति यस्मात् ॥६३॥
दृष्टः साक्षादिदानीमिह खलु जगतामीश्वरः संविदात्मा
विज्ञानस्थाणुरेको गगनवदभितः सर्वभूतान्तरात्मा ।
दृष्टं ब्रह्मातिरिक्तं सकलमिदमसद्रूपमाभासमात्रं
शुद्धं ब्रह्माहमस्मीत्यविरतमधुनाऽत्रैव तिष्ठेदनीहः ॥६४॥
इंद्रेंद्राण्योः प्रकामं सुरतसुखजुषोः स्याद्रतान्तः सुषुप्ति-
स्तस्यामानंदसांद्रं पदमतिगहनं यत्स आनंदकोशः ।
तस्मिन्नो वेद किंचिन्निरतिशयसुखाभ्यंतरे लीयमानो
दुःखी स्याद्बोधितः सन्निति कुशलमतिर्बोधयेन्नैव सुप्तम् ॥६५॥
सर्वे नंदन्ति जीवा अधिगतयशसा गृह्णता चक्षुरादीन्
अंतः सर्वोपकर्त्रा वहिरपि च सुषुप्तौ यथा तुल्यसंस्थाः ।
एतेषां किल्विषस्पृग्जठरभृतिकृते यो बहिर्वृत्तिरास्ते
त्वक्चक्षुः श्रोत्रनासारसनवशमितो याति शोकं च मोहम् ॥६६॥
जाग्रत्यामंतरात्मा विषयसुखकृतेऽनेकयत्नान्विधास्यन्
श्राम्यत्सर्वेंद्रियौघोऽधिगतमपि सुखं विस्मरन्याति निद्राम् ।
विश्रामाय स्वरूपे त्वतितरसुलभं तेन चातींद्रियं हि
सुखं सर्वोत्तमं स्यात्परिणतिविरसादिंद्रियोत्थात्सुखाच्च ॥ ६७ ॥
पक्षावभ्यस्य पक्षी जनयति मरुतं तेन यात्युच्चदेशं
लब्ध्वा वायुं महान्तं श्रममपनयति स्वीयपक्षौ प्रसार्य ।
दुःसंकल्पैर्विकल्पैर्विषयमनु कदर्थीकृतं चित्तमेतत्

खिन्नं विश्रामहेतोः स्वपिति चिरमहो हस्तपादान्प्रसार्य ॥ ६८ ॥
आश्लिष्यात्मानमात्मा न किमपि सहसैवान्तरं वेद बाह्यं
यद्वत्कामी विदेशात्सदनमुपगतो गाढमाश्लिष्य कान्ताम् ।
यात्यस्तं तत्र लोकव्यवहृतिरखिला पुण्यपापानुबंधः
शोको मोहो भयं वा समविषममिदं न स्मरत्येव किंचित् ॥ ६९ ॥
अल्पानल्पप्रपंचप्रलय उपरतिश्चेंद्रियाणां सुखाप्ति–
र्जीवन्मुक्तौ सुषुप्तौ त्रितयमपि समं किंतु तत्रास्ति भेदः ।
प्राक्संस्कारात्प्रसुप्तः पुनरपि च परावृत्तिमेति प्रबुद्धो
नश्यत्संस्कारजातो न स किल पुनरावर्तते यश्च मुक्तः ॥ ७० ॥
आनंदान्यश्च सर्वाननुभवति नृपः सर्वसंपत्समृद्धः
तस्यानंदः स एकः स खलु शतगुणः संप्रदिष्टः पितॄणाम् ।
आदेवब्रह्मलोकं शतशतगुणितास्ते यदंतर्गताः स्युः
ब्रह्मानंदः स एकोऽस्त्यथ विषयसुखान्यस्य मात्रा भवन्ति ॥ ७१ ॥
यत्रानंदाश्च मोदाः प्रमुद इति मुदश्चासते सर्व एते
यत्राप्ताः सर्वकामाः स्युरखिलविरमात्केवलीभाव आस्ते ।
मां तत्रानंदसांद्रे कृधि चिरममृतं सोमपीयूषपूर्णां
धारामिंद्राय देहीत्यपि निगमगिरो ब्रूयुगान्तर्गताय ॥ ७२ ॥
आत्माऽकंपः सुखात्मा स्फुरति तदपरा त्वन्यथैव स्फुरन्ती
स्थैर्यं वा चंचलत्वं मनसि परिणतिं याति तत्रत्यमस्मिन् ।
चांचल्यं दुःखहेतुर्मनस इदमहो यावदिष्टार्थलब्धिः
तस्यां यावत्स्थिरत्वं मनसि विषयजं स्यात्सुखं तावदेव ॥ ७३ ॥
यद्वत्सौख्यं रतान्ते निमिषमिह मनस्येकताने रसे स्यात्
स्थैर्यं यावत्सुषुप्तौ सुखमनतिशयं तावदेवाथ मुक्तौ ।
नित्यानंदः प्रशान्ते हृदि तदिह सुखस्थैर्ययोः साहचर्यं
नित्यानंदस्य मात्रा विषयसुखमिदं युज्यते तेन वक्तुम् ॥ ७४ ॥

श्रान्तं स्वान्तं सबाह्यव्यवहृतिभिरिदं ताः समाकृष्य सर्वा-
स्तत्तत्संस्कारयुक्तं ह्युपरमति परावृत्तमिच्छन्निदानम् ।
स्वप्नान्संस्कारजातप्रजनितविषयान्स्वाप्नदेहेऽनुभूतान्
प्रोज्झयन्तः प्रत्यगात्मप्रवणमिदमगाद्भूरि विश्राममस्मिन् ॥७५॥
स्वप्ने भोगः सुखादेर्भवति ननु कुतः साधने मूर्च्छमाने
स्वाप्नं देहान्तरं तद्व्यवहृतिकुशलं नव्यमुत्पद्यते चेत् ।
तत्सामग्र्या अभावात्कुत इदमुदितं तद्धि सांकल्पिकं चेत्
तत्किं स्वाप्ने रतान्ते वपुषि निपतिते दृश्यते शुक्रमोक्षः ॥ ७६ ॥
भीत्या रोदित्यनेन प्रवदति हसति श्लाघते नूनमस्मात्
स्वप्नेऽप्यंगेऽनुबंधं त्यजति न सहसा मूर्च्छितेऽप्यंतरात्मा ।
पूर्वं ये येऽनुभूतास्तनुयुवतिहयव्याघ्रदेशादयोऽर्था-
स्तत्संस्कारस्वरूपान्सृजति पुनरमून्श्रित्य संस्कारदेहम् ॥ ७७ ॥
संधौ जाग्रत्सुषुप्त्योरनुभवविदिता स्वाप्न्यवस्था द्वितीया
तत्रात्मज्योतिरास्ते पुरुष इह समाकृष्य सर्वेंद्रियाणि ।
संवेश्य स्थूलदेहं समुचितशयने स्वीयभासाऽन्तरात्मा
पश्यन्संस्काररूपानभिमतविषयान्याति कुत्रापि तद्वत् ॥ ७८ ॥
रक्षन्प्राणैः कुलायं निजशयनगतं श्वासमात्रावशेषै-
र्मा भूत्तत्प्रेतकल्पाकृतिकमिति पुनः सारमेयादिभक्ष्यम् ।
स्वप्ने स्वीयप्रभावात्सृजति हयरथान्निम्नगाः पल्वलानि
क्रीडास्थानान्यनेकान्यपि सुहृदबलापुत्रमित्रानुकारान् ॥ ७९ ॥
मातंगव्याघ्रदस्युद्विषदुरगकपीन्कुत्रचित्प्रेयसीभिः
क्रीडन्नास्ते हसन्वा विहरति कुहचिन्मृष्टमश्नाति चान्नम् ।
म्लेच्छत्वं प्राप्तवानस्म्यहमिति कुहचिच्छंकितः स्वीयलोका-
दास्ते व्याघ्रादिभीत्या प्रचलति कुहचिद्रोदिति ग्रस्यमानः ॥ ८० ॥
यो यो दृग्गोचरोऽर्थो भवति स स तदा तद्गतात्मस्वरूपा.

ऽविज्ञानोत्पद्यमानः स्फुरति ननु यथा शुक्तिकाऽज्ञानहेतुः ।
रौप्याभासो मृषैव स्फुरति च किरणज्ञानतोंऽभो भुजंगो
रज्ज्वज्ञानान्निमेषं सुखभयकृदतो दृष्टिसृष्टं किलेदम् ॥ ८१ ॥
मायाऽध्यासाश्रयेण प्रविततमखिलं यन्मया तेन मत्स्था-
न्येतान्येतेषु नाहं यदपि हि रजतं भाति शुक्तौ न रौप्ये ॥
शुक्त्यंशस्तेन भूतान्यपि मयि न वसन्तीति विष्वग्विनेता
प्राहास्माद्दृश्यजातं सकलमपि मृषैवेंद्रजालोपमेयम् ॥ ८२ ॥
हेतुः कर्मैव लोके सुखतदितरयोरेवमज्ञोऽविदित्वा
मित्रं वा शत्रुरित्थं व्यवहरति मृषा याज्ञवल्क्यार्तभागौ ।
यत्कर्मैवोचतुः प्राग्जनकनृपगृहे चक्रतुस्तत्प्रशंसां
वंशोत्तंसो यदूनामिति वदति न कोऽप्यत्र तिष्ठत्यकर्मा ॥८३॥
वृक्षच्छेदे कुठारः प्रभवति यदपि प्राणिनोद्यस्तथाऽपि
प्रायोऽन्नं तृप्तिहेतुस्तदपि निगदितं कारणं भोक्तृयत्नः ।
प्राचीनं कर्म तद्वद्विषमसमफलप्राप्तिहेतुस्तथाऽपि
स्वातंत्र्यं नश्वरेऽस्मिन्न हि खलु घटते प्रेरकोऽस्यान्तरात्मा ॥८४॥
स्मृत्या लोकेषु वर्णाश्रमविहितमदो नित्यकाम्यादि कर्म ।
सर्वं ब्रह्मार्पणं स्यादिति निगमगिरः संगिरन्तेऽतिरम्यम् ॥
यन्नासानेत्रजिह्वाकरचरणशिरःश्रोत्रसन्तर्पणेन ।
तुष्येदंगीव साक्षात्तरुरिव सकलो मूलसंतर्पणेन ॥ ८५ ॥
यः प्रैत्यात्मानभिज्ञः श्रुतिविदपि तथाकर्मकृत्कर्मणोऽस्य ।
नाशः स्यादल्पभोगात्पुनरवतरणे दुःखभोगो महीयान् ॥
आत्माभिज्ञस्य लिप्सोरपि भवति महाञ्शाश्वतः सिद्धिभोगो ।
ह्यात्मा तस्मादुपास्यः खलु तदधिगमे सर्वसौख्यान्यालिप्सोः॥ ८६ ॥
सूर्याद्यैरर्थभानं न हि भवति पुनः केवलैर्नात्र चित्रं ।
सूर्यात्सूर्यप्रतीतिर्न भवति सहसा नापि चन्द्रस्य चन्द्रात् ।

अग्नेरग्नेश्च किन्तु स्फुरति रविमुखं चक्षुषश्चित्प्रयुक्तात्
आत्मज्योतिस्ततोऽयं पुरुष इह महो देवतानां च चित्रम् ॥८७॥
प्राणेनाम्भांसि भूयः पिबति पुनरसावन्नमश्नाति तत्र
तत्पाकं जाठरोऽग्निस्तदुपहितबलो द्राक् शनैर्वा करोति ।
व्यानः सर्वांगनाडीष्वथ नयति रसं प्राणसंतर्पणार्थं
निस्सारं पूतिगंधं त्यजति बहिरयं देहतोऽपानसंज्ञः ॥ ८८ ॥
व्यापारं देहसंस्थः प्रतिवपुरखिलं पंचवृत्त्यात्मकोऽसौ
प्राणः सर्वेंद्रियाणामधिपतिरनिशं सत्तया निर्विवादम् ।
यस्येत्थं चिद्घनस्य स्फुटमिह कुरुते सोऽस्मि सर्वस्य साक्षी
प्राणस्य प्राण एषोऽप्यखिलतनुभृतां चक्षुषश्चक्षुरेषः ॥ ८९ ॥
यं भान्तं चिद्घनैकं क्षितिजलपवनादित्यचंद्रादयो ये
भासा तस्यैव चानु प्रविरलगतयो भान्ति तस्मिन्वसन्ति ।
विद्युत्पुंजोऽग्निसंघोऽप्युडुगणविततिर्भासयेत्किं परेशं
ज्योतिश्शान्तं ह्यनंतं कविमजममरं शाश्वतं जन्मशून्यम् ॥९०॥
तद्ब्रह्मैवाहमस्मीत्यनुभव उदितो यस्य कस्यापि चेद्वै
पुंसः श्रीसद्गुरूणामतुलितकरुणापूर्णपीयूषदृष्ट्या ॥
जीवन्मुक्तः स एव भ्रमविधुरमना निर्गतेऽनाद्युपाधौ
नित्यानंदैकधाम प्रविशति परमं नष्टसंदेहवृत्तिः ॥ ९१ ॥
नो देहो नेंद्रियाणि क्षरमतिचपलं नो मनो नैव बुद्धिः
प्राणो नैवाहमस्मीत्यखिलजडमिदं वस्तुजातं कथं स्याम् ।
नाहंकारो न दारा गृहसुतसुजनक्षेत्रवित्तादि दूरं
साक्षी चित्प्रत्यगात्मा निखिलजगदधिष्ठानभूतः शिवोऽहम् ९२
दृश्यं यद्रूपमेतद्भवति च विशदं नीलपीताद्यनेकं
सर्वस्यैतस्य दृग्वै स्फुरदनुभवतो लोचनं चैकरूपम् ॥

तद्दृश्यं मानसं दृक्परिणतविषयाकारधीवृत्तयोऽपि
दृश्या दृग्रूप एव प्रभुरिह स तथा दृश्यते नैव साक्षी ॥ १३ ॥
रज्ज्वज्ञानाद्भुजंगस्तदुपरि सहसा भाति मंदांधकारे
स्वात्माज्ञानात्तथाऽसौ भृशमसुखमभूदात्मनो जीवभावः ॥
आप्तोक्त्याऽहिभ्रमान्ते स च खलु विदिता रज्जुरेका तथाऽहं
कूटस्थो नैव जीवो निजगुरुवचसा साक्षिभूतः शिवोऽहम् १४
किं ज्योतिस्ते वदस्वाहनि रविरिह मे चंद्रदीपादि रात्रौ
स्यादेवं भानुदीपादिकपरिकलने किं तव ज्योतिरस्ति ॥
चक्षुस्तन्मीलने किं भवति च सुतरां धीर्धियः किं प्रकाशे
तत्रैवाहं ततस्त्वं तदसि परमकं ज्योतिरस्मि प्रभोऽहम् ॥१५॥
कंचित्कालं स्थितः कौ पुनरिह भजते नैव देहादिसंघं
यावत्प्रारब्धभोगं कथमपि स सुखं चेष्टतेऽसंगबुद्ध्या ॥
निर्द्वंद्वो नित्यशुद्धो विगलितममताऽहंकृतिर्नित्यतृप्तो
ब्रह्मानंदस्वरूपः स्थिरमतिरचलो निर्गताशेषमोहः ॥ १६ ॥
जीवात्मब्रह्मभेदं दलयति सहसा यत्प्रकाशैकरूपं
विज्ञानं तच्च बुद्धौ समुदितमतुलं यस्य पुंसः पवित्रम् ॥
माया तेनैव तस्य क्षयमुपगमिता संसृतेः कारणं या
नष्टा सा कार्यकर्त्री पुनरपि भविता नैव विज्ञानमात्रात् ॥१७॥
विश्वं नेति प्रमाणाद्विगलितजगदाकारभानस्त्यजेद्वै
पीत्वा यद्वत्फलांभस्त्यजति च सुतरां तत्फलं सौरभाढ्यम् ॥
सम्यक्सच्चिद्घनैकामृतसुखकवलास्वादपूर्णो ह्यदाऽसौ
ज्ञात्वा निस्सारमेवं जगदखिलमिदं स्वप्रभः शांतचित्तः ॥१८॥
क्षीयन्ते चास्य कर्माण्यपि खलु हृदयग्रंथिरुद्भिद्यते वै
छिद्यन्ते संशया ये जनिमृतिफलदा दृष्टमात्रे परेशे ॥
तस्मिंश्चिन्मात्ररूपे गुणमलरहिते तत्त्वमस्यादिलक्ष्ये

कूटस्थे प्रत्यगात्मन्यखिलविधिमनोऽगोचरे ब्रह्मणीशे ॥९९ ॥
आदौ मध्ये तथाऽन्ते जनिमृतिफलदं कर्ममूलं विशालं
ज्ञात्वा संसारवृक्षं भ्रममदमुदिताशोकताऽनेकपत्रम् ।
कामक्रोधादिशाखं सुतपशुवनिताकन्यकापक्षिसंघं
छित्त्वाऽसंगासिनैनं पटुमतिरभितश्चिंतयेद्वासुदेवम् ॥ १०० ॥
जातं मय्येव सर्वं पुनरपि मयि तत्संस्थितं चैव विश्वं
सर्वं मय्येव याति प्रविलयमिति तद्ब्रह्म चैवाहमस्मि ॥
यस्य स्मृत्या च यज्ञाद्यखिलशुभविधौ सुप्रयातीह कार्यं
न्यूनं संपूर्णतां वै तमहमतिमुदैवाच्युतं संनतोऽस्मि ॥ १०१ ॥

इति शतश्लोकी समाप्ता ॥

———

॥ स्वात्मप्रकाशिका ॥

—:०:—

जगत्कारणमज्ञानमेकमेव चिदन्वितम् ॥
एक एव मनः साक्षी जानात्येवं जगत्त्रयम् ॥ १ ॥
विवेकयुक्तबुद्ध्याहं जानाम्यात्मानमद्वयम् ॥
तथापि बंधमोक्षादिव्यवहारः प्रतीयते ॥ २ ॥
विवर्तोऽपि प्रपंचो मे सत्यवद्भाति सर्वदा ॥
इति संशयपाशेन बद्धोऽहं छिंद्धि संशयम् ॥ ३ ॥
एवं शिष्यवचः श्रुत्वा गुरुराहोत्तरं स्फुटम् ॥
नाज्ञानं नच बुद्धिश्च न जगन्न च साक्षिता ॥ ४ ॥
गंधमोक्षादयः सर्वे कृताः सत्येऽद्वये त्वयि ॥
भातीत्युक्ते जगत्सर्वं सद्रूपं ब्रह्म तद्भवेत् ॥ ५ ॥
सर्पादौ रज्जुसत्तेव ब्रह्मसत्तैव केवलम् ॥
प्रपंचाधाररूपेण वर्तते सज्जगन्न हि ॥ ६ ॥
यथेक्षुमभिसंव्याप्य शर्करा वर्तते तथा ॥
आश्चर्यब्रह्मरूपेण त्वं व्याप्तोऽसि जगत्त्रयम् ॥ ७ ॥
मरुभूमौ जलं सर्वं मरुभूमात्रमेव तत् ॥
जगत्त्रयमिदं सर्वं चिन्मात्रं सुविचारतः ॥ ८ ॥
ब्रह्मादिस्तंवपर्यंताः प्राणिनस्त्वयि कल्पिताः ॥
बुद्बुदादितरंगांता विकाराः सागरे यथा ॥ ९ ॥
तरंगत्वं ध्रुवं सिंधुर्न वांछति यथा तथा ॥
विषयानंदवांछा ते महदानंदरूपतः ॥ १० ॥
पिष्टं व्याप्य गुडं यद्वन्माधुर्यं न हि वांछति ॥
पूर्णानंदो जगद्व्याप्य तदानंदं न वांछति ॥ ११ ॥
दारिद्र्याशा यथा नास्ति संपन्नस्य तथा तव ॥

ब्रह्मानंदनिमग्नस्य विषयाशा न संभवेत् ॥ १२ ॥
विषं दृष्ट्वाऽमृतं दृष्ट्वा विषं त्यजति बुद्धिमान् ॥
आत्मानमपि दृष्ट्वा त्वं त्यजानात्मानमादरात् ॥ १३ ॥
घटावभासको भानुर्घटनाशे न नश्यति ॥
देहावभासकः साक्षी देहनाशे न नश्यति ॥ १४ ॥
निराकारं जगत्सर्वं निर्मलं सच्चिदात्मकम् ॥
द्वैताभावात्कथं कस्माद्भयं पूर्णस्य मे वद ॥ १५ ॥
ब्रह्मादिकं जगत्सर्वं त्वय्यानंदे प्रकल्पितम् ॥
त्वय्येव लीनं जगत्त्वं कथं लीयसे वद ॥ १६ ॥

न हि प्रपंचो न हि भूतजातं
न चेंद्रियं प्राणगणो न देहः ॥
न बुद्धिचित्तं न मनो न कर्ता
ब्रह्मैव सत्यं परमात्मरूपम् ॥ १७ ॥

सर्वं सुखं विद्धि सुदुःखनाशा-
त्सर्वं च सद्रूपमसत्यनाशात् ॥
चिद्रूपमेव प्रतिभानयुक्तं
तस्मादखंडं परमात्मरूपम् ॥ १८ ॥

चिदेव देहस्तु चिदेव लोका-
श्चिदेव भूतानि चिदिंद्रियाणि ॥
कर्ता चिदंतःकरणं चिदेव
चिदेव सत्यं परमार्थरूपम् ॥ १९ ॥

न मे बंधो न मे मुक्तिर्न मे शास्त्रं न मे गुरुः ॥
मायामात्रविलासो हि मायातीतोऽहमद्वयः ॥ २० ॥
राज्यं करोतु विज्ञानी भिक्षामटतु निर्भयः ॥
दोषैर्न लिप्यते शुद्धः पद्मपत्रमिवांभसा ॥ २१ ॥

पुण्यानि पापकर्माणि स्वप्नगानि न जाग्रति ॥
एवं जाग्रत्पुण्यपापकर्माणि न हि मे प्रभोः ॥ २२ ॥
कायः करोतु कर्माणि वृथा वागुच्यतामिह ॥
राज्यं ध्यायतु वा बुद्धिः पूर्णस्य मम का क्षतिः ॥ २३ ॥
प्राणाश्चरन्तु तद्धर्मैः कामैर्वा हन्यतां मनः ॥
आनंदामृतपूर्णस्य मम दुःखं कथं भवेत् ॥ २४ ॥
आनंदांबुधिमग्नोऽसौ देही तत्र न दृश्यते ॥
लवणं जलमध्यस्थं यथा तत्र लयं गतम् ॥ २५ ॥
इंद्रियाणि मनः प्राणा अहंकारः परस्परम् ॥
जाड्यसंगतिमुत्सृज्य मग्ना मयि चिदर्णवे ॥ २६ ॥
आत्मानमंजसा वेद्मि त्वज्ञानं प्रपलायितम् ॥
कर्तृत्वमद्य मे नष्टं कर्तव्यं वापि न क्वचित् ॥२७॥

चिदमृतसुखराशौ चित्तफेनं विलीनं
क्षयमधिगत एव वृत्तिचंचत्तरंगः ।
स्तिमितसुखसमुद्रो निर्विचेष्टः सुपूर्णः
कथमिह मम दुःखं सर्वदैकोऽहमस्मि ॥२८॥

आनंदरूपोऽहमखंडबोधः
परात्परोऽहं घनचित्प्रकाशः ।
मेघा यथा व्योम न च स्पृशन्ति
संसारदुःखानि न मां स्पृशन्ति ॥२९॥

अस्थिमांसपुरीषांत्रचर्मलोमसमन्वितः ।
अन्नादः स्थूलदेहः स्यादतोऽहं शुद्धचिद्घनः ॥३०॥
स्थूलदेहाश्रिता एते स्थूलाद्भिन्नस्य मे न हि ।
लिंगं जडात्मकं नाहं चित्स्वरूपोऽहमद्वयः ॥३१॥
क्षुत्पिपासांध्यबाधिर्यकामक्रोधादयोऽखिलाः ।

लिंगदेहाश्रिता ह्येते नैवालिंगस्य मे विभोः ॥३२॥
अनाद्यज्ञानमेवात्र कारणं देहमुच्यते ।
नाहं कारणदेहोऽपि स्वप्रकाशो निरंजनः ॥३३॥
जडत्वाप्रियमोदत्वधर्माः कारणदेहगाः ।
न सान्ति मम नित्यस्य निर्विकारस्वरूपिणः ॥३४॥
जीवाद्भिन्नः परेशोऽस्ति परेशत्वं कुतस्तव ।
इत्यज्ञजनसंवादो विचारः क्रियतेऽधुना ॥३५॥
अधिष्ठानं चिदाभासो बुद्धिरेतत्त्रयं यदा ।
अज्ञानादेकवद्भाति जीव इत्युच्यते तदा ॥३६॥
अधिष्ठानं न जीवः स्यात्प्रत्येकं निर्विकारतः ।
अवस्तुत्वाच्चिदाभासो नास्ति तस्य च जीवता ॥३७॥
प्रत्येकं जीवता नास्ति बुद्धेरपि जडत्वतः ।
जीव आभासकूटस्थबुद्धित्रयमतो भवेत् ॥३८॥
मायाभासो विशुद्धात्मा त्रयमेतन्महेश्वरः ।
मायाभासोऽप्यवस्तुत्वात्प्रत्येकं नेश्वरो भवेत् ॥३९॥
पूर्णत्वान्निर्विकारत्वाद्विशुद्धत्वान्महेश्वरः ।
जडत्वहेतोर्मायायामीश्वरत्वं नु दुर्घटम् ॥४०॥
तस्मादेतत्त्रयं मिथ्या तदर्थो नेश्वरो भवेत् ।
इति जीवेश्वरौ भातः स्वाज्ञानान्न हि वस्तुतः ॥४१॥
घटाकाशमठाकाशौ महाकाशे प्रकल्पितौ ।
एवं मयि चिदाकाशे जीवेशौ परिकल्पितौ ॥४२॥
मायातत्कार्यविलये नेश्वरत्वं च जीवता ।
ततः शुद्धचिदेवाहं चिद्व्योमनिरुपाधितः ॥४३॥

सत्यचिद्घनमनंतमद्वयं
सर्वदृश्यरहितं निरामयम् ।

यत्पदं विमलमद्वयं शिवं
तत्सदाहमिति मौनमाश्रये ॥४४॥
पूर्णमद्वयमखंडचेतनं
विश्वभेदकलनादिवार्जितम् ।
अद्वितीयपरसंविदंशकं
तत्सदाहमिति मौनमाश्रये ॥४५॥
जन्ममृत्युसुखदुःखवर्जितं
जातिनीतिकुलगोत्रदूरगम् ।
चिद्विवर्तजगतोऽस्य कारणं
तत्सदाहमिति मौनमाश्रये ॥४६॥
उलूकस्य यथा भानावंधकारः प्रतीयते ।
स्वप्रकाशे परानंदे तमो मूढस्य भासते ॥४७॥
यथा दृष्टिनिरोधार्तो सूर्यो नास्तीति मन्यते ।
तथाऽज्ञानावृतो देही ब्रह्म नास्तीति मन्यते ॥४८॥
यथाऽमृतं विषाद्भिन्नं विषदोषैर्न लिप्यते ।
न स्पृशामि जडाद्भिन्नो जडदोषान्प्रकाशयन् ॥४९॥
स्वल्पापि दीपकणिका बहुलं नाशयेत्तमः ।
स्वल्पोऽपि बोधो महतीमविद्यां शमयेत्तथा ॥५०॥
चिद्रूपत्वान्न मे जाड्यं सत्यत्वान्नानृतं मम ।
आनंदत्वान्न मे दुःखमज्ञानाद्भाति तत्त्रयम् ॥५१॥
कालत्रये यथा सर्पो रज्जौ नास्ति तथा मयि ।
अहंकारादि देहांतं जगन्नास्त्यहमद्वयः ॥५२॥
भानौ तमःप्रकाशत्वान्नांगीकुर्वन्ति सज्जनाः ।
तमस्तत्कार्यसाक्षीति भ्रांतबुद्धिरहो मयि ॥५३॥
यथा शीतं जलं वह्निसंबंधादुष्णवद्भवेत् ।

बुद्धितादात्म्यसंबंधात्कर्तृत्वं वस्तुतो न हि ॥५४॥
जलबिंदुभिराकाशं न सिक्तं न च शुष्यति ।
तथा गंगाजलेनायं न शुद्धो नित्यशुद्धतः ॥५५॥
वृक्षोत्पन्नफलैर्वृक्षो यथा तृप्तिं न गच्छति ॥
मय्यध्यस्तान्नपानाद्यैस्तथा तृप्तिर्न विद्यते ॥ ५६ ॥
स्थाणौ प्रकल्पितश्चोरः स स्थाणुत्वं न बाधते ॥
स्वस्मिन्कल्पितजीवश्च स्वं बाधितुमशक्यते ॥ ५७ ॥
अज्ञाने बुद्धिविलये निद्रा सा भण्यते बुधैः ॥
विलीनाज्ञानतत्कार्ये मयि निद्रा कथं भवेत् ॥ ५८ ॥
बुद्धेः पूर्णविकासोऽयं जागरः परिकीर्त्यते ॥
विकारादिविहीनत्वाज्जागरो मे न विद्यते ॥ ५९ ॥
सूक्ष्मनाडीषु संचारो बुद्धेः स्वप्नः प्रजायते ॥
संचारधर्मरहिते स्वप्नो नास्ति तथा मयि ॥ ६० ॥
परिपूर्णस्य नित्यस्य शुद्धस्य ज्योतिषो मम ॥
आगंतुकमलाभावात्किं स्नानेन प्रयोजनम् ॥ ६१ ॥
देशाभावात्क गंतव्यं स्थानाभावात्क वा स्थितिः ॥
पूर्णे मयि स्थानदेशौ कल्पितावहमद्वयः ॥ ६२ ॥
प्राणसंचारसंशोषात्पिपासा जायते खलु ॥
शोषणानर्हचिद्रूपे मय्येषा जायते कथम् ॥ ६३ ॥
नाडीषु पीडयमानासु वाय्वग्निभ्यां भवेत्क्षुधा ॥
तयोः पीडनहेतुत्वात्संविद्रूपे कथं मयि ॥ ६४ ॥
शरीरस्थितिशैथिल्यं श्वेतलोमसमन्वितम् ॥
जरा भवति सा नास्ति निरंशे मयि सर्वगे ॥ ६५ ॥
योषित्क्रीडा सुखस्यांतर्गर्वाढ्यं यौवनं किल ॥
आत्मानंदे परे पूर्णे मयि नास्ति हि यौवनम् ॥ ६६ ॥

मूढबुद्धिपरिख्यातं दुःखानामालयं सदा ॥
बाल्यं कोपनशीलांतं न मे सुखजलांबुधेः ॥ ६७ ॥
एवं तत्त्वविचाराब्धौ निमग्नानां सदा नृणाम् ॥
परमाद्वैतविज्ञानमपरोक्षं न संशयः ॥ ६८ ॥

इति स्वात्मप्रकाशिका समाप्ता ॥

।। सर्ववेदान्तसिद्धान्तसारसंग्रहः ।।

अखंडानंदसंबोधो वंदनाद्यस्य जायते ।
गोविंदं तमहं वंदे चिदानंदतनुं गुरुम् ।। १ ।।
अखंडं सच्चिदानंदमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ।। २ ।।
यदालंबो दरं हन्ति सतां प्रत्यूहसंभवम् ।
तदालंबे दयालंबं लंबोदरपदांबुजम् ।। ३ ।।
वेदान्तशास्त्रसिद्धान्तसारसंग्रह उच्यते ।
प्रेक्षावतां मुमुक्षूणां सुखबोधोपपत्तये ।। ४ ।।
अस्य शास्त्रानुसारित्वादनुबंधचतुष्टयम् ।
यदेव मूलं शास्त्रस्य निर्दिष्टं तदिहोच्यते ।। ५ ।।
अधिकारी च विषयः संबंधश्च प्रयोजनम् ।
शास्त्रारंभफलं प्राहुरनुबंधचतुष्टयम् ।। ६ ।।
चतुर्भिः साधनैः सम्यक्संपन्नो युक्तिदक्षिणः
मेधावी पुरुषो विद्वानधिकार्यत्र संमतः ।। ७ ।।
विषयः शुद्धचैतन्यं जीवब्रह्मैक्यलक्षणम् ।
यत्रैव दृश्यते सर्ववेदान्तानां समन्वयः ।। ८ ।।
एतदैक्यप्रमेयस्य प्रमाणस्यापि च श्रुतेः ।
संबंधः कथ्यते सद्भिर्बोध्यबोधकलक्षणः ।। ९ ।।
ब्रह्मात्मैकत्वविज्ञानं सन्तः प्राहुः प्रयोजनम् ।
येन निःशेषसंसारबंधात्सद्यः प्रमुच्यते ।। १० ।।
प्रयोजनं संप्रवृत्तेः कारणं फललक्षणम् ।
प्रयोजनमनुद्दिश्य न मंदोऽपि प्रवर्तते ।। ११ ।।
साधनचतुष्टयसंपत्तिर्यस्यास्ति धीमतः पुंसः ।

तस्यैवैतत्फलसिद्धिर्नान्यस्य किंचिदूनस्य ॥ १२ ॥
चत्वारि साधनान्यत्र वदन्ति परमर्षयः ।
मुक्तिर्येषां नु सद्भावे नाभावे सिध्यति ध्रुवम् ॥ १३ ॥
आद्यं नित्यानित्यवस्तुविवेकः साधनं मतम् ।
इहामुत्रार्थफलभोगविरागो द्वितीयकम् ॥ १४ ॥
शमादिषट्कसंपत्तिस्तृतीयं साधनं मतम् ।
तुरीयं तु मुमुक्षुत्वं साधनं शास्त्रसंमतम् ॥ १५ ॥
ब्रह्मैव नित्यमन्यत्तु ह्यनित्यमिति वेदनम् ।
सोऽयं नित्यानित्यवस्तुविवेक इति कथ्यते ॥ १६ ॥
मृदादिकारणं नित्यं त्रिषु कालेषु दर्शनात् ।
घटाद्यनित्यं तत्कार्यं यतस्तन्नाश ईक्ष्यते ॥ १७ ॥
तथैवैतज्जगत्सर्वमनित्यं ब्रह्मकार्यतः ।
तत्कारणं परं ब्रह्म भवेन्नित्यं मृदादिवत् ॥ १८ ॥
सर्गं वक्त्यस्य तस्माद्वा एतस्मादित्यपि श्रुतिः ।
सकाशाद्ब्रह्मणस्तस्मादनित्यत्वे न संशयः ॥ १९ ॥
सर्वस्यानित्यत्वे सावयवत्वेन सर्वतःसिद्धे ।
वैकुंठादिषु नित्यत्वमतिर्भ्रम एव मूढबुद्धीनाम् ॥ २० ॥
अनित्यत्वं च नित्यत्वमेवं यच्छ्रुतियुक्तिभिः ।
विवेचनं नित्यानित्यविवेक इति कथ्यते ॥ २१ ॥
ऐहिकामुष्मिकार्थेषु ह्यनित्यत्वेन निश्चयात् ।
नैःस्पृह्यं तुच्छबुद्ध्या यत्तद्वैराग्यमितीर्यते ॥ २२ ॥
नित्यानित्यपदार्थविवेकात्पुरुषस्य जायते सद्यः ।
स्रक्चंदनवनितादौ सर्वत्रानित्यवस्तुनि विरक्तिः ॥ २३ ॥
काकस्य विष्ठावदसह्यबुद्धिर्भोग्येषु सा तीव्रविरक्तिरिष्यते ।

प्रदृश्यते वस्तुनि यत्र दोषो न तत्र पुंसोऽस्ति पुनः प्रवृत्तिः ॥२४॥
विरक्तितीव्रत्वनिदानमाहुर्भोग्येषु दोषेक्षणमेव सन्तः ।
अन्तर्महारोगवतीं विजानन्को नाम वेश्यामपि रूपिणीं व्रजेत् ॥२५॥
अत्रापि चान्यत्र च विद्यमानपदार्थसंमर्शनमेव कार्यम् ।
यथाप्रकारार्थगुणाभिमर्शनं संदर्शयत्येव तदीयदोषम् ॥ २६ ॥
कुक्षौ स्वमातुर्मलमूत्रमध्ये स्थितिं तदा विट्क्रिमिदंशनं च ।
तदीयकौक्षेयकवह्निदाहं विचार्य को वा विरतिं न याति ॥ २७ ॥
स्वकीयविण्मूत्रणिविसर्जनं तच्चोत्तानगत्या शयनं तदा यत् ।
बालग्रहाद्याहतिभाक्च शैशवं विचार्य को वा विरतिं न याति ॥२८॥
स्वीयैः परैस्ताडनमज्ञभावमत्यंतचापल्यमसत्क्रियां च ।
कुमारभावे प्रतिषिद्धवृत्तिं विचार्य को वा विरतिं न याति ॥ २९ ॥
मदोद्धतिं मान्यतिरस्कृतिं च कामातुरत्वं समयातिलंघनम् ।
तां तां युवत्योदितदुष्टचेष्टां विचार्य को वा विरतिं न याति ॥३०॥
विरूपतां सर्वजनादवज्ञां सर्वत्र दैन्यं निजबुद्धिहैन्यम् ।
वृद्धत्वसंभावितदुर्दशां तां विचार्य को वा विरतिं न याति ॥ ३१ ॥
पित्तज्वरार्शःक्षयगुल्मशूलश्लेष्मादिरोगोदिततीव्रदुःखम् ।
दुर्गंधमस्वास्थ्यमनूनचिंतां विचार्य को वा विरतिं न याति ॥ ३२ ॥
यमावलोकोदितभीतिकंपमर्मव्यथोच्छ्वासगतीश्च वेदनाम् ।
प्राणप्रयाणे परिदृश्यमानां विचार्य को वा विरतिं न याति ॥ ३३ ॥
अंगारनद्यां तपने च कुंभीपाकेऽपि वीच्यामसिपत्रकानने ।
दूतैर्यमस्य क्रियमाणबाधां विचार्य को वा विरतिं न याति ॥ ३४ ॥
पुण्यक्षये पुण्यकृतो नभःस्थैर्निपात्यमानाञ्शिथिलीकृतांगान् ।
नक्षत्ररूपेण दिवश्च्युतांस्तान्विचार्य को वा विरतिं न याति ॥३५॥
वाय्वर्कवह्नींद्रमुखान्सुरेंद्रानशोग्रभीत्या ग्रथितांतरंगान् ।

विपक्षलोकैः परिदूयमानान्विचार्य को वा विरतिं न याति ॥३६॥
श्रुत्या निरुक्तं सुखतारतम्यं ब्रह्मांतमारभ्य महीमहेशम् ।
औपाधिकं तत्तु न वास्तवं चेदालोच्य को वा विरतिं न याति ॥३७॥
सालोक्यसामीप्यसरूपतादिभेदस्तु सत्कर्मविशेषसिद्धः ।
न कर्मसिद्धस्य तु नित्यतेति विचार्य को वा विरतिं न याति ॥३८॥
यत्रास्ति लोके गतितारतम्यं उच्चावचत्वान्वितमत्र तत्कृतम् ।
यथेह तद्वत्खलु दुःखमस्तीत्यालोच्य को वा विरतिं न याति ॥३९॥
को नाम लोके पुरुषो विवेकी विनश्वरे तुच्छसुखे गृहादौ ।
कुर्याद्रतिं नित्यमवेक्षमाणो वृथैव मोहान्म्रियमाणजंतून् ॥४०॥
सुखं किमस्त्यत्र विचार्यमाणे गृहेऽपि वा योषिति वा पदार्थे ।
मायातमोऽधीकृतचक्षुषो ये त एव मुह्यन्ति विवेकशून्याः ॥४१॥
अविचारितरमणीयं सर्वमुदुंबरफलोपमं भोग्यम् ।
अज्ञानामुपभोग्यं न तु तज्ज्ञानां योषिति वा पदार्थे ॥४२॥
गतेऽपि तोये सुषिरं कुलीरो हातुं ह्यशक्तो म्रियते विमोहात् ।
यथा तथा गेहसुखानुषक्तो विनाशमायाति नरो भ्रमेण ॥४३॥
कोशक्रिमिस्तंतुभिरात्मदेहमावेष्टय चावेष्टय च गुप्तिमिच्छन् ।
स्वयं विनिर्गन्तुमशक्त एव संस्ततस्तदंते म्रियते च लग्नः ॥४४॥
यथा तथा पुत्रकलत्रमित्रस्नेहानुबंधैर्ग्रथितो गृहस्थः ।
कदापि वा तान्परिमुच्य गेहाद्गन्तुं न शक्तो म्रियते मुधैव ॥४५॥
कारागृहस्यास्य च को विशेषः प्रदृश्यते साधु विचार्यमाणे ।
मुक्तेः प्रतीपत्वमिहापि पुंसः कांतासुखाभ्युत्थितमोहपाशैः ॥४६॥
गृहस्पृहा पादनिबद्धशृंखला कांतासुताशा पट्टुकंठपाशः ।
शीर्षे पतद्भूर्यशनिर्हि साक्षात्प्राणान्तहेतुः प्रबला धनाशा ॥४७॥

आशापाशशतेन पाशितपदो नोत्थातुमेव क्षमः
कामक्रोधमदादिभिः प्रतिभटैः संरक्ष्यमाणोऽनिशम् ।

संमोहावरणेन गोपनवतः संसारकारागृहा-
निर्गन्तुं त्रिविधेषणापरवशः कः शक्नुयाद्रागिषु ॥४८॥
कामांधकारेण निरुद्धदृष्टिर्मुह्यत्यसत्यप्यबलास्वरूपे ।
न ह्यंधदृष्टेरसतः सतो वा सुखत्वदुःखत्वविचारणास्ति ॥४९॥
श्लेष्मोद्गारि मुखं स्रवन्मलवती नासाश्रुमल्लोचनं
स्वेदस्रावि मलाभिपूर्णमभितो दुर्गंधदुष्टं वपुः ।
अन्यद्वक्तुमशक्यमेव मनसा मन्तुं क्वचिन्नार्हति
स्त्रीरूपं कथमीदृशं सुमनसां पात्रीभवेन्नेत्रयोः ॥५०॥
दूरादवेक्ष्याग्निशिखां पतंगो रम्यत्वबुद्ध्या विनिपत्य नश्यति ।
यथा तथा नष्टदृगेष सूक्ष्मं कथं निरीक्षेत विमुक्तिमार्गम् ॥५१॥
कामेन कान्तां परिगृह्य तद्वज्जनोऽप्ययं नश्यति नष्टदृष्टिः ।
मांसास्थिमज्जामलमूत्रपात्रं स्त्रियं स्वयं रम्यतयैव पश्यति ॥५२॥
काम एव यमः साक्षात्कान्ता वैतरणी नदी ।
विवेकिनां मुमुक्षूणां निलयस्तु यमालयः ॥५३॥
यमालये वापि गृहेऽपि नो नृणां तापत्रयक्लेशनिवृत्तिरस्ति ।
किंचित्समालोक्य तु तद्विरामं सुखात्मना पश्यति मूढलोकः ॥५४॥
यमस्य कामस्य च तारतम्यं विचार्यमाणे महदस्ति लोके ।
हितं करोत्यस्य यमोऽप्रियः सन्कामस्त्वनर्थं कुरुते प्रियः सन् ॥५५॥
यमोऽसतामेव करोत्यनर्थं सतां तु सौख्यं कुरुते हितः सन् ।
कामः सतामेव गतिं निरुंधन्करोत्यनर्थं ह्यसतां नु का कथा ॥५६॥
विश्वस्य वृद्धिं स्वयमेव कांक्षन्प्रवर्तकं कामिजनं ससर्ज ।
तेनैव लोकः परिमुह्यमानः प्रवर्धते चंद्रमसेव चाब्धिः ॥५७॥
कामो नाम महाञ्जगद्भ्रमयिता स्थित्वांतरंगे स्वयं
स्त्रीपुंसावितरेतरांगकगुणैर्हासैश्च भावैः स्फुटम् ।
अन्योन्यं परिमोह्य नैजतमसा प्रेमानुबंधेन तौ

बद्ध्वा भ्रामयति प्रपंचरचनां संवर्धयन्ब्रह्महा ॥५८॥
अतोऽतरंगास्थितकामवेगाद्भोग्ये प्रवृत्तिः स्वत एव सिद्धा ।
सर्वस्य जंतोर्ध्रुवमन्यथा चेदबोधितार्थेषु कथं प्रवृत्तिः ॥५९॥
तेनैव सर्वजंतूनां कामना बलवत्तरा ।
जीर्यत्यपि च देहेऽस्मिन्कामना नैव जीर्यते ॥६०॥
अवेक्ष्य विषये दोषं बुद्धियुक्तो विचक्षणः ।
कामपाशेन यो मुक्तः स मुक्तेः पथि गोचरः ॥६१॥
कामस्य विजयोपायं सूक्ष्मं वक्ष्याम्यहं सताम् ।
संकल्पस्य परित्याग उपायः सुलभो मतः ॥६२॥
श्रुते दृष्टेऽपि वा भोग्ये यस्मिन्कस्मिंश्च वस्तुनि ।
समीचीनत्वधीत्यागात्कामो नोदेति कर्हिचित् ॥६३॥
कामस्य बीजं संकल्पः संकल्पादेव जायते !
बीजे नष्टेंऽकुर इव तस्मिन्नष्टे विनश्यति ॥६४॥
न कोऽपि सम्यक्त्वधिया विनैव भोग्यं नरः कामयितुं समर्थः ।
यतस्ततः कामजयेच्छुरेतां सम्यक्त्वबुद्धिं विषये निहन्यात् ॥६५॥
भोग्ये नरः कामजयेच्छुरेतां सुखत्वबुद्धिं विषये निहन्यात् ।
यावत्सुखत्वभ्रमधीः पदार्थे तावन्न जेतुं प्रभवेद्धि कामम् ॥६६॥
संकल्पानुदये हेतुर्यथाभूतार्थदर्शनम् ।
अनर्थचिंतनं चाभ्यां नावकाशोऽस्य विद्यते ॥६७॥
रत्ने यदि शिलाबुद्धिर्जायते वा भयं ततः ।
समीचीनत्वधीर्नैति नोपादेयत्वधीरपि ॥६८॥
यथार्थदर्शनं वस्तुन्यनर्थस्यापि चिंतनम् ।
संकल्पस्यापि कामस्य तद्वधोपाय इष्यते ॥६९॥
धनं भयनिबंधनं सततदुःखसंवर्धनं
प्रचंडतरकर्दनं स्फुटितबंधुसंवर्धनम् ।

विशिष्टगुणबाधनं कृपणधीसमाराधनं
न मुक्तिगतिसाधनं भवति नापि हृच्छोधनम् ॥७०॥
राज्ञो भयं चोरभयं प्रमादाद्भयं तथा ज्ञातिभयं च वस्तुतः ।
धनं भयग्रस्तमनर्थमूलं यतः सतां नैव सुखाय कल्पते ॥७१॥
अर्जने रक्षणे दाने व्यये वापि च वस्तुतः ।
दुःखमेव सदा नृणां न धनं सुखसाधनम् ॥७२॥
सतामपि पदार्थस्य लाभाल्लोभः प्रवर्धते ।
विवेको लुप्यते लोभात्तस्मिँल्लुप्ते विनश्यति ॥७३॥
दहत्यलाभे निःस्वत्वं लाभे लोभो दहत्यमुम् ।
तस्मात्संतापकं वित्तं कस्य सौख्यं प्रयच्छति ॥७४॥
भोगेन मत्तता जंतोर्दानेन पुनरुद्भवः ।
वृथैवोभयथा वित्तं नास्त्येव गतिरन्यथा ॥७५॥
धनेन मदवृद्धिः स्यान्मदेन स्मृतिनाशनम् ।
स्मृतिनाशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥७६॥
सुखयति धनमेवेत्यंतराशापिशाच्या
दृढतरमुपगूढो मूढलोको जडात्मा ।
निवसति तदुपान्ते संततं प्रेक्षमाणो
व्रजति तदपि पश्चात्प्राणमेतस्य हृत्वा ॥७७॥
संपन्नोऽन्धवदेव किंचिदपरं नो वीक्षते चक्षुषा
सद्भिर्वर्जितमार्ग एव चरति प्रोत्सारितो बालिशैः ।
तस्मिन्नेव मुहुः स्खलन्प्रतिपदं गत्वान्धकूपे पत-
त्यस्यांधत्वनिवर्तकौषधमिदं दारिद्र्यमेवांजनम् ॥७८॥
लोभः क्रोधश्च दंभश्च मदो मत्सर एव च ।
वर्धंते वित्तसंप्राप्त्या कथं तच्चित्तशोधनम् ॥७९॥
अलाभाद्द्विगुणं दुःखं वित्तस्य व्ययसंभवे ।

ततोऽपि त्रिगुणं दुःखं दुर्व्यये विदुषामपि ॥८०॥
नित्याहितेन वित्तेन भयचिंतानपायिना ।
चित्तस्वास्थ्यं कुतो जंतोर्गृहस्थेनाहिना यथा ॥ ८१ ॥
कांतारे विजने वने जनपदे सेतौ निरीतौ च वा
चोरैर्वापि तथेतरैर्नरवरैर्युक्तो वियुक्तोऽपि वा ।
निःस्वः स्वस्थतया सुखेन वसति ह्याद्रीयमाणो जनैः
क्लिश्नात्येव धनी सदाकुलमतिर्भीतश्च पुत्रादपि ॥ ८२ ॥
तस्मादनर्थस्य निदानमर्थः पुमर्थसिद्धिर्न भवत्यनेन ।
ततो वनान्ते निवसन्ति सन्तः संन्यस्य सर्वं प्रतिकूलमर्थम् ॥ ८३ ॥
श्रद्धाभक्तिमतीं सतीं गुणवतीं पुत्राञ्छ्रुतान्संमता-
नक्षय्यं वसुधानुभोगविभवैः श्रीसुंदरं मंदिरम् ।
सर्वं नश्वरमित्यवेत्य कवयः श्रुत्युक्तिभिर्युक्तिभिः
संन्यस्यन्त्यपरे तु तत्सुखमिति भ्राम्यन्ति दुःखार्णवे ॥ ८४ ॥
सुखमिति मलराशौ ये रमन्तेऽत्र गेहे
क्रिमय इव कलत्रक्षेत्रपुत्रानुषक्त्या ।
सुरपद इव तेषां नैव मोक्षप्रसंग-
स्त्वपि तु निरयगर्भावासदुःखप्रवाहः ॥ ८५ ॥
येषामाशा निराशा स्याद्दारापत्यधनादिषु ।
तेषां सिध्यति नान्येषां मोक्षाशाभिमुखी गतिः ॥ ८६ ॥
सत्कर्मक्षयपाप्मनां श्रुतिमतां सिद्धात्मनां धीमतां
नित्यानित्यपदार्थशोधनमिदं युक्त्या मुहुः कुर्वताम् ।
तस्मादुत्थमहाविरक्त्यसिमतां मोक्षैककांक्षावतां
धन्यानां सुलभं स्त्रियादिविषयेष्वाशालताच्छेदनम् ॥ ८७ ॥
संसारमृत्योर्बलिनः प्रवेष्टुं द्वाराणि तु त्रीणि महान्ति लोके ।
कान्ता च जिह्वा कनकं च तानि रुणद्धि यस्तस्य भयं न मृत्योः ॥

मुक्तिश्रीनगरस्य दुर्जयतरं द्वारं यदस्यादिमं
तस्य द्वे अररे धनं च युवती ताभ्यां पिनद्धं दृढम् ।
कामाख्यार्गलदारुणा बलवता द्वारं तदेतत्त्रयं
धीरो यस्तु भिनत्ति सोऽर्हति सुखं भोक्तुं विमुक्तिश्रियः॥८९॥
आरूढस्य विवेकाश्वं तीव्रवैराग्यखड्गिनः ।
तितिक्षावर्मयुक्तस्य प्रतियोगी न दृश्यते ॥ ९० ॥
विवेकजां तीव्रविरक्तिमेव, मुक्तेर्निदानं निगदन्ति सन्तः ।
तस्माद्विवेकी विरतिं मुमुक्षुः संपादयेत्तां प्रथमं प्रयत्नात् ॥९१॥
पुमानजातनिर्वेदो देहबंधं जिहासितुम् ।
न हि शक्नोति निर्वेदो बंधभेदो महानसौ ॥ ९२ ॥
वैराग्यरहिता एव यमालय इवालये ।
क्लिश्नन्ति त्रिविधैस्तापैर्मोहिता अपि पंडिताः ॥ ९३ ॥
शमो दमस्तितिक्षोपरतिः श्रद्धा ततः परम् ।
समाधानमिति प्रोक्तं षडेवैते शमादयः ॥ ९४ ॥
एकवृत्त्यैव मनसः स्वलक्ष्ये नियतस्थितिः ।
शम इत्युच्यते सद्भिः शमलक्षणवेदिभिः ॥ ९५ ॥
उत्तमो मध्यमश्चैव जघन्य इति च त्रिधा ।
निरूपितो विपश्चिद्भिः तत्तल्लक्षणवेदिभिः ॥ ९६ ॥
स्वविकारं परित्यज्य वस्तुमात्रतया स्थितिः ।
मनसः सोत्तमा शांतिर्ब्रह्मनिर्वाणलक्षणा ॥ ९७ ॥
प्रत्यक्प्रत्ययसंतानप्रवाहकरणं धियः ।
यदेषा मध्यमा शान्तिः शुद्धसत्त्वैकलक्षणा ॥ ९८ ॥
विषयव्यापृतिं त्यक्त्वा श्रवणैकमनःस्थितिः ।
मनसश्चेतरा शान्तिर्मिश्रसत्त्वैकलक्षणा ॥ ९९ ॥
प्राच्योदीच्यांगसद्भावे शमः सिध्यति नान्यथा ।

तीव्रा विरक्तिः प्राच्यांगमुदीच्यांगं दमादयः ॥ १०० ॥
कामः क्रोधश्च लोभश्च मदो मोहश्च मत्सरः ।
न जिताः षडिमे येन तस्य शान्तिर्न सिध्यति ॥ १०१ ॥
शब्दादिविषयेभ्यो यो विषवन्न निवर्तते ।
तीव्रमोक्षेच्छया भिक्षोस्तस्य शान्तिर्न सिध्यति ॥ १०२ ॥
येन नाराधितो देवो यस्य नो गुर्वनुग्रहः ।
न वश्यं हृदयं यस्य तस्य शान्तिर्न सिध्यति ॥ १०३ ॥
मनःप्रसादसिद्ध्यर्थं साधनं श्रूयतां बुधैः ।
मनःप्रसादो यत्सत्त्वे यदभावे न सिध्यति ॥ १०४ ॥
ब्रह्मचर्यमहिंसा च दया भूतेष्ववक्रता ।
विषयेष्वतिवैतृष्ण्यं शौचं दंभविवर्जनम् ॥ १०५ ॥
सत्यं निर्ममता स्थैर्यमभिमानविसर्जनम्
ईश्वरध्यानपरता ब्रह्मविद्भिः सहस्थितिः ॥ १०६ ॥
ज्ञानशास्त्रैकपरता समता सुखदुःखयोः ।
मानानासक्तिरेकांतशीलता च मुमुक्षुता ॥ १०७ ॥
यस्यैतद्विद्यते सर्वं तस्य चित्तं प्रसीदति ।
न त्वेतद्धर्मशून्यस्य प्रकारांतरकोटिभिः ॥ १०८ ॥
स्मरणं दर्शनं स्त्रीणां गुणकर्मानुकीर्तनम् ।
समीचीनत्वधीस्तासु प्रीतिः संभाषणं मिथः ॥ १०९ ॥
सहवासश्च संसर्गोऽष्टधा मैथुनं विदुः ।
एतद्विलक्षणं ब्रह्मचर्यं चित्तप्रसादकम् ॥ ११० ॥
अहिंसा वाङ्मनःकायैः प्राणिमात्राप्रपीडनम् ।
स्वात्मवत्सर्वभूतेषु कायेन मनसा गिरा ॥ १११ ॥
अनुकंपा दया सैव प्रोक्ता वेदान्तवेदिभिः ।
करणत्रितयेष्वेकरूपतावक्रता मता ॥ ११२ ॥

ब्रह्मादिस्थावरान्तेषु वैराग्यं विषयेष्वनु ।
यथैव काकविष्ठायां वैराग्यं तद्धि निर्मलम् ॥ ११३ ॥
बाह्यमाभ्यंतरं चेति द्विविधं शौचमुच्यते ।
मृज्जलाभ्यां कृतं शौचं बाह्यं शारीरकं स्मृतम् ॥ ११४ ॥
अज्ञानदूरीकरणं मानसं शौचमांतरम् ।
अंतःशौचे स्थिते सम्यग्बाह्यं नावश्यकं नृणाम् ॥ ११५ ॥
ध्यानपूजादिकं लोके द्रष्टर्येव करोति यः ।
पारमार्थिकधीहीनः स दंभाचार उच्यते ॥ ११६ ॥
पुंसस्तथानाचरणमदंभित्वं विदुर्बुधाः ।
यत्स्वेन दृष्टं सम्यक्च श्रुतं तस्यैव भाषणम् ॥ ११७ ॥
सत्यमित्युच्यते ब्रह्म सत्यमित्यभिभाषणम् ।
देहादिषु स्वकीयत्वदृढबुद्धिविसर्जनम् ॥ ११८ ॥
निर्ममत्वं स्मृतं येन कैवल्यं लभते बुधः ।
गुरुवेदान्तवचनैर्निश्चितार्थे दृढस्थितिः ॥ ११९ ॥
तदेकवृत्त्या तत्स्थैर्यं नैश्चल्यं न तु वर्ष्मणः ।
विद्यैश्वर्यतपोरूपकुलवर्णाश्रमादिभिः ॥ १२० ॥
संजाताहंकृतित्यागस्त्वभिमानविसर्जनम् ।
त्रिभिश्च करणैः सम्यग्घित्वा वैषयिकीं क्रियाम् ॥ १२१ ॥
स्वात्मैकचिंतनं यत्तदीश्वरध्यानमीरितम् ।
छायेव सर्वदा वासो ब्रह्मविद्भिः सहस्थितिः ॥१२२॥
यद्यदुक्तं ज्ञानशास्त्रे श्रवणादिकमेषु यः ।
निरतः कर्मधीहीनः ज्ञाननिष्ठः स एव हि ॥१२३॥
धनकांताज्वरादीनां प्राप्तकाले सुखादिभिः ।
विकारहीनतैव स्यात्सुखदुःखसमानता ॥१२४॥
श्रेष्ठं पूज्यं विदित्वा मां मानयन्तु जना भुवि ।

इत्यासक्त्या विहीनत्वं मानानासक्तिरुच्यते ॥१२५॥
सञ्चितनस्य संबाधो विघ्नोऽयं निर्जने ततः।
स्थेयमित्येक एवास्ति चेतसैवैकान्तशीलता ॥१२६॥
संसारबंधनिर्मुक्तिः कदा झटिति मे भवेत्।
इति या सुदृढा बुद्धिरीरिता सा मुमुक्षुता ॥१२७॥
ब्रह्मचर्यादिभिर्धर्मैर्बुद्धेर्दोषनिवृत्तये।
दंडनं दम इत्याहुर्दमशब्दार्थकोविदाः ॥१२८॥
तत्तद्वृत्तिनिरोधेन बाह्येंद्रियविनिग्रहः।
योगिनो दम इत्याहुर्मनसः शांतिसाधनम् ॥१२९॥
इंद्रियेष्विंद्रियार्थेषु प्रवृत्तेषु यदृच्छया।
अनुधावति तान्येव मनो वायुमिवानलः ॥ १३० ॥
इंद्रियेषु निरुद्धेषु त्यक्त्वा वेगं मनः स्वयम्।
सत्त्वभावमुपादत्ते प्रसादस्तेन जायते ॥
प्रसन्ने सति चित्तेऽस्य, मुक्तिः सिध्यति नान्यथा ॥ १३१ ॥
मनः प्रसादस्य निदानमेव निरोधनं यत्सकलेंद्रियाणाम्।
बाह्येंद्रिये साधु निरुध्यमाने बाह्यार्थभोगो मनसो वियुज्यते१३२
तेन स्वदौष्ट्यं परिमुच्य चित्तं शनैः शनैः शान्तिमुपाददाति।
चित्तस्य बाह्यार्थविमोक्षमेव मोक्षं विदुर्मोक्षणलक्षणज्ञाः॥१३३॥
दमं विना साधु मनःप्रसादहेतुं न विद्मः सुकरं मुमुक्षोः।
दमेन चित्तं निजदोषजातं विसृज्य शान्तिं समुपैति शीघ्रम् ॥१३४॥
प्राणायामाद्भवति मनसो निश्चलत्वं प्रसादो
यस्याप्यस्य प्रतिनियतदिग्देशकालाद्यवेक्ष्य।
सम्यग्दृष्ट्या क्वचिदपि तया नो दमो हन्यते त-
त्कुर्याद्धीमान्दममनलसश्चित्तशान्त्यै प्रयत्नात् ॥ १३५ ॥
सर्वेंद्रियाणां गतिनिग्रहेण भोग्येषु दोषाद्यवमर्शनेन।

ईशप्रसादाच्च गुरोः प्रसादाच्छान्तिं समायात्यचिरेण चित्तम् ॥१३६॥
आध्यात्मिकादि यद्दुःखं प्राप्तं प्रारब्धवेगतः ।
अचिंतया तत्सहनं तितिक्षेति निगद्यते ॥ १३७ ॥
रक्षा तितिक्षासदृशी मुमुक्षोर्न विद्यतेऽसौ पविना न भिद्यते ।
यामेव धीराः कवचीव विघ्नान्सर्वांस्तृणीकृत्य जयन्ति मायाम्॥१३८॥
क्षमावतामेव हि योगसिद्धिः स्वाराज्यलक्ष्मीसुखभोगसिद्धिः ।
क्षमाविहीना निपतन्ति विघ्नैर्वातैर्हताः पर्णचया इव द्रुमात् ॥१३९॥
तितिक्षया तपो दानं यज्ञस्तीर्थं व्रतं श्रुतम् ।
भूतिः स्वर्गोऽपवर्गश्च प्राप्यते तत्तदर्थिभिः ॥ १४० ॥
ब्रह्मचर्यमहिंसा च साधूनामप्यगर्हणम् ।
पराक्षेपादिसहनं तितिक्षोरेव सिध्यति ॥ १४१ ॥
साधनेष्वपि सर्वेषु तितिक्षोत्तमसाधनम् ।
यत्र विघ्नाः पलायन्ते दैविका अपि भौतिकाः ॥ १४२ ॥
तितिक्षोरेव विघ्नेभ्यस्त्वनिवर्तितचेतसः ।
सिध्यन्ति सिद्धयः सर्वा अणिमाद्याः समृद्धयः ॥ १४३ ॥
तस्मान्मुमुक्षोरधिका तितिक्षासंपादनीयेप्सितकार्यसिद्ध्यै ।
तीव्रा मुमुक्षा च महत्युपेक्षा चोभे तितिक्षा सहकारि कारणम्॥१४४॥
तत्तत्कालसमागतामयततेः शान्त्यै प्रवृत्तो यदि
स्यात्तत्तत्परिहारकौषधरतस्तच्चिंतने तत्परः ।
तद्भिक्षुः श्रवणादिधर्मरहितो भूत्वा मृतश्चेत्ततः
किं सिद्धं फलमाप्नुयादुभयथा भ्रष्टो भवेत्स्वार्थतः ॥१४५॥
योगमभ्यस्यतो भिक्षोर्योगाच्चलितचेतसः ।
प्राप्य पुण्यकृताँल्लोकानित्यादि प्राह केशवः ॥ १४६ ॥
न तु कृत्वैव संन्यासं तूष्णीमेव मृतस्य हि ।
पुण्यलोकगतिं ब्रूते भगवान्न्यासमात्रतः ॥ १४७ ॥

न च संन्यसनादेव सिद्धिं समधिगच्छति ।
इत्यनुष्ठेयसंत्यागात्सिद्ध्यभावमुवाच च ॥ १४८ ॥
तस्मात्तितिक्षया सोढ्वा तत्तद्दुःखमुपागतम् ।
कुर्याच्छक्त्यनुरूपेण श्रवणादि शनैः शनैः ॥ १४९ ॥
प्रयोजनं तितिक्षायाः साधितायाः प्रयत्नतः ।
प्राप्तदुःखासहिष्णुत्वे न किंचिदपि दृश्यते ॥ १५० ॥
साधनत्वेन दृष्टानां सर्वेषामपि कर्मणाम् ।
विधिना यः परित्यागः स संन्यासः सतां मतः ॥ १५१ ॥
उपरमयति कर्माणीत्युपरतिशब्देन कथ्यते न्यासः ।
न्यासेन हि सर्वेषां श्रुत्या प्रोक्तो विकर्मणां त्यागः ॥ १५२ ॥
कर्मणा साध्यमानस्यानित्यत्वं श्रूयते यतः ।
कर्मणानेन किं नित्यफलेप्सोः परमार्थिनः ॥ १५३ ॥
उत्पाद्यमाप्यं संस्कार्यं विकार्यं परिगण्यते ।
चतुर्विधं कर्मसाध्यं फलं नान्यदितः परम् ॥ १५४ ॥
नैतदन्यतरं ब्रह्म कदा भवितुमर्हति ।
स्वतःसिद्धं सर्वदाप्तं शुद्धं निर्मलमक्रियम् ॥ १५५ ॥
न चास्य कश्चिज्जनितेत्यागमेन निषिध्यते ।
कारणं ब्रह्म तत्तस्माद्ब्रह्म नोत्पाद्यमिष्यते ॥ १५६ ॥
आप्त्राप्ययोस्तु भेदश्चेदाप्त्रा चाप्यमवाप्यते ।
आप्तृस्वरूपमेवैतद्ब्रह्म नाप्यं कदाचन ॥ १५७ ॥
मलिनस्यैव संस्कारो दर्पणादेरिहेष्यते ।
व्योमवन्नित्यशुद्धस्य ब्रह्मणो नैव संस्क्रिया ॥ १५८ ॥
केन दुष्टेन युज्येत वस्तु निर्मलमक्रियम् ।
यद्योगादागतं दोषं संस्कारो विनिवर्तयेत् ॥ १५९ ॥
निर्गुणस्य गुणाधानमपि नैवोपपद्यते ।

केवलो निर्गुणश्चेति नैर्गुण्यं श्रूयते यतः ॥ १६० ॥
सावयवस्य क्षीरादेर्वस्तुनः परिणामिनः ।
येन केन विकारित्वं स्यान्नो निष्कर्मवस्तुनः ॥ १६१ ॥
निष्कलं निष्क्रियं शान्तं निरवद्यं निरंजनम् ।
इत्येव वस्तुनस्तत्त्वं श्रुतियुक्तिव्यवस्थितम् ॥ १६२ ॥
तस्मान्न कर्मसाध्यत्वं ब्रह्मणोऽस्ति कुतश्चन ।
कर्मसाध्यं त्वनित्यं हि ब्रह्म नित्यं सनातनम् ॥ १६३ ॥
देहादिः क्षीयते लोको यथैवं कर्मणा चितः ।
तथैवामुष्मिको लोको संचितः पुण्यकर्मणा ॥ १६४ ॥
कृतकत्वमनित्यत्वे हेतुर्जागर्ति सर्वदा ।
तस्मादनित्ये स्वर्गादौ पंडितः को नु मुह्यति ॥ १६५ ॥
जगद्धेतोस्तु नित्यत्वं सर्वेषामपि संमतम् ।
जगद्धेतुत्वमस्यैव वावदीति श्रुतिर्मुहुः ॥ १६६ ॥
ऐतदात्म्यमिदं सर्वं तत्सत्यमिति च श्रुतिः ।
अस्यैव नित्यतां ब्रूते जगद्धेतोः सतः स्फुटम् ॥ १६७ ॥
न कर्मणा न प्रजया धनेनेति स्वयं श्रुतिः ।
कर्मणो मोक्षहेतुत्वं साक्षादेव निषेधति ॥ १६८ ॥

प्रत्यग्ब्रह्मविचारपूर्वमुभयोरेकत्वबोधाद्विना
कैवल्यं पुरुषस्य सिध्यति परब्रह्मात्मतालक्षणम् ।
न स्नानैरपि कीर्तनैरपि जपैर्नो कृच्छ्रचांद्रायणै-
र्नो वाप्यध्वरयज्ञदाननिगमैर्नो मंत्रतंत्रैरपि ॥ १६९ ॥

ज्ञानादेव तु कैवल्यमिति श्रुत्या निगद्यते ।
ज्ञानस्य मुक्तिहेतुत्वमन्यव्यावृत्तिपूर्वकम् ॥ १७० ॥
विवेकिनो विरक्तस्य ब्रह्मनित्यत्ववेदिनः ।
तद्भावेच्छोरनित्यार्थे तत्सामग्र्ये कुतोऽरतिः ॥ १७१ ॥

तस्मादानित्ये स्वर्गादौ साधनत्वेन चोदितम् ।
नित्यं नैमित्तिकं चापि सर्वं कर्म ससाधनम् ॥ १७२ ॥
मुमुक्षुणा परित्याज्यं ब्रह्मभावमभीप्सुना ।
मुमुक्षोरपि कर्मास्तु श्रवणं चापि साधनम् ॥ १७३ ॥
हस्तवद्द्वय तस्य स्वकार्यं साधयिष्यति ।
यदा विजृंभते दीपो ऋजूकरणकर्मणा ॥१७४॥
तथा श्रवणजो बोधः पुंसो विहितकर्मणा ।
अतः सापेक्षितं ज्ञानमथवापि समुच्चयम् ॥१७५॥
मोक्षस्य साधनामिति वदन्ति ब्रह्मवादिनः ।
मुमुक्षोर्युज्यते त्यागः कथं विहितकर्मणः ॥१७६॥
इति शंका न कर्तव्या मूढवत्पण्डितोत्तमैः ।
कर्मणः फलमन्यत्तु श्रवणस्य फलं पृथक् ॥ १७७ ॥
वैलक्षण्यं च सामग्र्योश्चोभयत्राधिकारिणोः ।
कामी कर्मण्यधिकृतो निष्कामी श्रवणे मतः ॥ १७८ ॥
अर्थी समर्थ इत्यादि लक्षणं कर्मिणो मतम् ।
परीक्ष्य लोकानित्यादि लक्षणं मोक्षकांक्षिणः ॥ १७९ ॥
मोक्षाधिकारी संन्यासी गृहस्थः किल कर्मणि ।
कर्मणः साधनं भार्यास्रुक्स्रुवादिपरिग्रहः ॥ १८० ॥
नैवान्यसाधनापेक्षा शुश्रूषोस्तु गुरुं विना ।
उपर्युपर्यहंकारो वर्धते कर्मणा भृशम् ॥ १८१ ॥
अहंकारस्य विच्छित्तिः श्रवणेन प्रतिक्षणम् ।
प्रवर्तकं कर्मशास्त्रं ज्ञानशास्त्रं निवर्तकम् ॥१८२॥
इत्यादिवैपरीत्यं तत्साधने चाधिकारिणोः ।
द्वयोः परस्परापेक्षा विद्यते न कदाचन ॥१८३॥
सामग्र्योश्चोभयोस्तद्वदुभयत्राधिकारिणोः ।

ऊर्ध्वं नयति विज्ञानमधः प्रापयति क्रिया ॥१८४॥
कथमन्योन्यसापेक्षा कथं वापि समुच्चयः ।
यथाग्नेस्तृणकूटस्य तेजसस्तिमिरस्य च ॥ १८५ ॥
सहयोगो न घटते तथैव ज्ञानकर्मणोः ।
किमुपकुर्याज्ज्ञानस्य कर्मस्वप्रतियोगिनः ॥
यस्य संनिधिमात्रेण स्वयं न स्फूर्तिमृच्छति ॥ १८६ ॥
कोटींधनाद्रिज्वालितोऽपि वह्निरर्कस्य नार्हत्युपकर्तुमीषत् ।
यथा तथा कर्मसहस्रकोटिर्ज्ञानस्य किं नु स्वयमेव लीयते१८७
एककर्त्राश्रयौ हस्तौ कर्मण्यधिकृतावुभौ ।
सहयोगस्तयोर्युक्तो न तथा ज्ञानकर्मणोः ॥ १८८ ॥
कर्त्रा कर्तुमकर्तुं वाप्यन्यथा कर्म शक्यते ।
न तथा वस्तुनो ज्ञानं कर्तृतंत्रं कदाचन ॥ १८९ ॥
यथा वस्तु तथा ज्ञानं प्रमाणेन विजायते ।
नापेक्षते च यत्किंचित्कर्म वा युक्तिकौशलम् ॥ १९० ॥
ज्ञानस्य वस्तुतंत्रत्वे संशयाद्युदयः कथम् ।
अतो न वास्तवं ज्ञानमिति नो शंक्यतां बुधैः ॥ १९१ ॥
प्रमाणासौष्ठवकृतं संशयादि न वास्तवम् ।
श्रुतिप्रमाणसुष्ठुत्वे ज्ञानं भवति वास्तवम् ॥ १९२ ॥
वस्तु तावत्परं ब्रह्म नित्यं सत्यं ध्रुवं विभु ।
श्रुतिप्रमाणे तज्ज्ञानं स्यादेव निरपेक्षकम् ॥ १९३ ॥
रूपज्ञानं यथा सम्यग्दृष्टौ सत्यां भवेत्तथा ।
श्रुतिप्रमाणे सत्येव ज्ञानं भवति वास्तवम् ॥ १९४ ॥
न कर्म यत्किंचिदपेक्षते हि रूपोपलब्धौ पुरुषस्य चक्षुः ।
ज्ञानं तथैव श्रवणादिजन्यं वस्तुप्रकाशे निरपेक्षमेव ॥ १९५ ॥
कर्तृतंत्रं भवेत्कर्म कर्मतंत्रं शुभाशुभम् ।

प्रमाणतंत्रं विज्ञानं मायातंत्रमिदं जगत् ॥ १९६ ॥
विद्यां चाविद्यां चेति सहोक्तिरियमुपकृता सद्भिः ।
सत्कर्मोपासनयोर्न त्वात्मज्ञानकर्मणोः क्वापि ॥ १९७ ॥
नित्यानित्यपदार्थबोधरहितो यश्चोभयत्र स्त्रगा-
द्यर्थानामनुभूतिलग्नहृदयो निर्विण्णबुद्धिर्जनः ।
तस्यैवास्य जडस्य कर्म विहितं श्रुत्या विरज्याभितो
मोक्षेच्छोर्न विधीयते तु परमानंदार्थिनो धीमतः ॥ १९८ ॥
मोक्षेच्छया यदहरेव विरज्यतेऽसौ
न्यासस्तदैव विहितो विदुषो मुमुक्षोः ।
श्रुत्या तयैव परया च ततः सुधीभिः
प्रामाणिकोऽयमिति चेतसि निश्चितव्यः ॥ १९९ ॥
स्वापरोक्षस्य वेदादेः साधनत्वं निषेधति ।
नाहं वेदैर्न तपसेत्यादिना भगवानपि ॥ २०० ॥
प्रवृत्तिश्च निवृत्तिश्च द्वे एते श्रुतिगोचरे ।
प्रवृत्त्या बध्यते जंतुर्निवृत्त्या तु विमुच्यते ॥ २०१ ॥
यन्न स्वबंधोऽभिमतो मूढस्यापि क्वचित्ततः ।
निवृत्तिः कर्मसंन्यासः कर्तव्यो मोक्षकांक्षिभिः ॥ २०२ ॥
न ज्ञानकर्मणोर्यस्मात्सहयोगस्तु युज्यते ।
तस्मात्त्याज्यं प्रयत्नेन कर्म ज्ञानेच्छुना ध्रुवम् ॥ २०३ ॥
इष्टसाधनताबुद्ध्या गृहीतस्यापि वस्तुनः ।
विज्ञाय फल्गुतां पश्चात्कः पुनस्तत्प्रतीक्षते ॥ २०४ ॥
उपरतिशब्दार्थो ह्युपरमणं पूर्वदृष्टवृत्तिभ्यः ।
सोऽयं मुख्यो गौणश्चेति च वृत्त्या द्विरूपतां धत्ते ॥ २०५ ॥
वृत्तेर्दृश्यपरित्यागो मुख्यार्थ इति कथ्यते ।
गौणार्थः कर्मसंन्यासः श्रुतेरंगतया मतः ॥ २०६ ॥

पुंसः प्रधानसिद्ध्यर्थमंगस्याश्रयणं ध्रुवम् ।
कर्तव्यमंगहीनं चेत्प्रधानं नैव सिध्यति ॥ २०७ ॥
संन्यसेत्सुविरक्तः सन्निहामुत्रार्थतः सुखात् ।
अविरक्तस्य संन्यासो निष्फलोऽयाज्ययागवत् ॥ २०८ ॥
संन्यस्य तु यतिः कुर्यान्न पूर्वविषयस्मृतिम् ।
तां तां तत्स्मरणे तस्य जुगुप्सा जायते यतः ॥ २०९ ॥
गुरुवेदान्तवाक्येषु बुद्धिर्या निश्चयात्मिका ।
सत्यमित्येव सा श्रद्धा निदानं मुक्तिसिद्धये ॥ २१० ॥
श्रद्धावतामेव सतां पुमर्थः समीरितः सिध्यति नेतरेषाम् ।
उक्तं सुसूक्ष्मं परमार्थतत्त्वं श्रद्धत्स्व सोम्येति च वक्ति वेदः ॥ २११ ॥
श्रद्धाविहीनस्य तु न प्रवृत्तिः प्रवृत्तिशून्यस्य न साध्यसिद्धिः ।
अश्रद्धयैवाभिहताश्च सर्वे मज्जन्ति संसारमहासमुद्रे ॥ २१२ ॥
देवे च वेदे च गुरौ च मंत्रे तीर्थे महात्मन्यपि भेषजे च ।
श्रद्धा भवत्यस्य यथा यथान्तस्तथा तथा सिद्धिरुदेति पुंसाम् ॥ २१३ ॥
अस्तीत्येवोपलब्धव्यं वस्तुसद्भावनिश्चयात् ।
सद्भावनिश्चयस्तत्र श्रद्धया शास्त्रसिद्धया ॥ २१४ ॥
तस्माच्छ्रद्धा सुसंपाद्या गुरुवेदान्तवाक्ययोः ।
मुमुक्षोः श्रद्दधानस्य फलं सिध्यति नान्यथा ॥ २१५ ॥
यथार्थवादिता पुंसां श्रद्धाजननकारणम् ।
वेदस्येश्वरवाक्यत्वाद्यथार्थत्वे न संशयः ॥ २१६ ॥
मुक्तस्येश्वररूपत्वाद्गुरोर्वागपि तादृशी ।
तस्मात्तद्वाक्ययोः श्रद्धा सतां सिध्यति धीमताम् ॥ २१७ ॥
श्रुत्युक्तार्थावगाहाय विदुषा ज्ञेयवस्तुनि ।
चित्तस्य सम्यगाधानं समाधानमितीर्यते ॥ २१८ ॥
चित्तस्य साध्यैकपरत्वमेव पुमर्थसिद्धेर्नियमेन कारणम् ।

नैवान्यथा सिध्यति साध्यमस्मिन्मनःप्रमादे विफलः प्रयत्नः ॥२१९॥
चित्तं च दृष्टिं करणं तथान्यदेकत्र बध्नाति हि लक्ष्यभेत्ता ।
किंचित्प्रमादे सति लक्ष्यभेत्तुर्बाणप्रयोगो विफलो यथा तथा २२०
सिद्धेश्चित्तसमाधानमसाधारणकारणम् ।
यतस्ततो मुमुक्षूणां भवितव्यं सदामुना ॥ २२१ ॥
अत्यंततीव्रवैराग्यं फललिप्सा महत्तरा ।
तदेतदुभयं विद्यात्समाधानस्य कारणम् ॥ २२२ ॥
बहिरंगं श्रुतिः प्राह ब्रह्मचर्यादिमुक्तये ।
शमादिषट्कमेवैतदंतरंगं विदुर्बुधाः ॥ २२३ ॥
अंतरंगं हि बलवद्बहिरंगाद्यतस्ततः ।
शमादिषट्कं जिज्ञासोरवश्यं भाव्यमांतरम् ॥ २२४ ॥
अंतरंगविहीनस्य कृतश्रवणकोटयः ।
न फलन्ति यथा योद्धुरधीरस्यास्त्रसंपदः ॥ २२५ ॥
ब्रह्मात्मैकत्वविज्ञानाद्यद्विद्वान्मोक्तुमिच्छति ।
संसारपाशबंधं तन्मुमुक्षुत्वं निगद्यते ॥ २२६ ॥
साधनानां तु सर्वेषां मुमुक्षा मूलकारणम् ।
अनिच्छोरप्रवृत्तस्य क्व श्रुतिः क्व नु तत्फलम् ॥ २२७ ॥
तीव्रमध्यममंदातिमंदभेदाश्चतुर्विधाः ।
मुमुक्षा तत्प्रकारोऽपि कीर्त्यते श्रूयतां बुधैः ॥ २२८ ॥
तापैस्त्रिभिर्नित्यमनेकरूपैः, संतप्यमानो क्षुभितांतरात्मा ।
परिग्रहं सर्वमनर्थबुद्ध्या, जहाति सा तीव्रतरा मुमुक्षा ॥ २२९ ॥
तापत्रयं तीव्रमवेक्ष्य वस्तु दृष्ट्वा कलत्रं तनयान्विहातुम् ।
मध्ये द्वयोर्लोडनमात्मनो यत्सैषा मता माध्यमिकी मुमुक्षा ॥२३०॥
मोक्षस्य कालोऽस्ति किमद्य मे त्वरा भुक्त्वैव भोगान्कृतसर्वकार्यः ।
मुक्त्यै यतिष्येऽहमथेति बुद्धिरेषैव मंदा कथिता मुमुक्षा ॥२३१॥

मार्गे प्रयातुर्मणिलाभवन्मे लभेत मोक्षो यदि तर्हि धन्यः ।
इत्याशया मूढधियां मतिर्या सैषातिमन्दाभिमता मुमुक्षा ॥ २३२ ॥
जन्मानेकसहस्रेषु तपसाऽऽराधितेश्वरः ।
तेन निःशेषनिर्धूतहृदयस्थितकल्मषः ॥ २३३ ॥
शास्त्रविद्गुणदोषज्ञो भोग्यमात्रे विनिःस्पृहः ।
नित्यानित्यपदार्थज्ञो मुक्तिकामो दृढव्रतः ॥ २३४ ॥
निष्टप्तमग्निना पात्रमुद्वास्य त्वरया यथा ।
जहाति गेहं तद्वच्च तीव्रमोक्षेच्छया द्विजः ॥ २३५ ॥
स एव सद्यस्तरति संसृतिं गुर्वनुग्रहात् ।
यस्तु तीव्रमुमुक्षुः स्यात्स जीवन्नेव मुच्यते ॥ २३६ ॥
जन्मान्तरे मध्यमस्तु तदन्यस्तु युगान्तरे ।
चतुर्थः कल्पकोट्यां वा नैव बंधाद्विमुच्यते ॥ २३७ ॥
नृजन्म जंतोरतिदुर्लभं विदुस्ततोऽपि पुंस्त्वं च ततो विवेकः ।
लब्ध्वा तदेतत्त्रितयं महात्मा यतेत मुक्त्यै सहसा विरक्तः ॥२३८॥
पुत्रमित्रकलत्रादिसुखं जन्मनि जन्मनि ।
मर्त्यत्वं पुरुषत्वं च विवेकश्च न लभ्यते ॥ २३९ ॥

लब्ध्वा सुदुर्लभतरं नरजन्म जंतु-
स्तत्रापि पौरुषमतः सदसद्विवेकम् ।
संप्राप्य चैहिकसुखाभिरतो यदि स्या-
द्धिक्तस्य जन्म कुमतेः पुरुषाधमस्य ॥ २४० ॥

खादते मोदते नित्यं शुनकः सूकरः खरः ।
तेषामेषां विशेषः को वृत्तिर्येषां तु तैः समा ॥ २४१ ॥
यावन्नाश्रयते रोगो यावन्नाक्रमते जरा ।
यावन्न धीर्विपर्येति यावन्मृत्युं न पश्यति ॥ २४२ ॥
तावदेव नरः स्वस्थः सारग्रहणतत्परः ।

विवेकी प्रयतेताशु भवबंधविमुक्तये ॥ २४३ ॥
देवर्षिपितृमर्त्यर्णबंधमुक्तास्तु कोटिशः ।
भवबंधविमुक्तस्तु यः कश्चिद्ब्रह्मवित्तमः ॥ २४४ ॥
अंतर्बंधेन बद्धस्य किं बहिर्बंधमोचनैः ।
तदंतर्बंधमुक्त्यर्थं क्रियतां कृतिभिः कृतिः ॥ २४५ ॥
कृतिपर्यवसानैव मता तीव्रमुमुक्षुता ।
अन्या तु रंजनामात्रा यत्र नो दृश्यते कृतिः ॥ २४६ ॥

गेहादिसर्वमपहाय लघुत्वबुद्ध्या
सौख्येच्छया स्वपतिनानलमाविविक्षोः ।
कान्ताजनस्य नियता सुदृढा त्वरा या
सैषा फलान्तगमने करणं मुमुक्षोः ॥ २४७ ॥

नित्यानित्यविवेकश्च देहक्षणिकतामतिः ।
मृत्योर्भीतिश्च तापश्च मुमुक्षावृद्धिकारणम् ॥ २४८ ॥
शिरो विवेकस्त्वत्यंतं वैराग्यं वपुरुच्यते ।
शमादयः षडंगानि मोक्षेच्छा प्राण इष्यते ॥ २४९ ॥
ईदृशांगसमायुक्तो जिज्ञासुर्युक्तिकोविदः ।
शूरो मृत्युं निहन्त्येव सम्यग्ज्ञानासिना ध्रुवम् ॥ २५० ॥
उक्तसाधनसंपन्नो जिज्ञासुर्यतिरात्मनः ।
जिज्ञासायै गुरुं गच्छेत्समित्पाणिर्नयोज्ज्वलः ॥ २५१ ॥
श्रोत्रियो ब्रह्मनिष्ठो यः प्रशान्तः समदर्शनः ।
निर्ममो निरहंकारो निर्द्वंद्वो निष्परिग्रहः ॥ २५२ ॥
अनपेक्षः शुचिर्दक्षः करुणामृतसागरः ।
एवंलक्षणसंपन्नः स गुरुर्ब्रह्मवित्तमः ।
उपासाद्यः प्रयत्नेन जिज्ञासोः स्वार्थसिद्धये ॥ २५३ ॥
जन्मानेकशतैः सदाददरयुजा भक्त्या समाराधितो

भक्तैर्वैदिकलक्षणेन विधिना संतुष्ट ईशः स्वयम् ।
साक्षाच्छ्रीगुरुरूपमेत्य कृपया दृग्गोचरः सन्प्रभुः
तत्त्वं साधु विबोध्य तारयति तान्संसारदुःखार्णवात् ॥ २५४ ॥
अविद्याहृदयग्रंथिविमोक्षोऽपि भवेद्यतः ।
तमेव गुरुरित्याहुर्गुरुशब्दार्थवेदिनः ॥ २५५ ॥
शिव एव गुरुः साक्षात् गुरुरेव शिवः स्वयम् ।
उभयोरंतरं किंचिन्न द्रष्टव्यं मुमुक्षुभिः ॥ २५६ ॥
बंधमुक्तं ब्रह्मनिष्ठं कृतकृत्यं भजेद्गुरुम् ।
यस्य प्रसादात्संसारसागरो गोष्पदायते ॥ २५७ ॥
शुश्रूषया सदा भक्त्या प्रणामैर्विनयोक्तिभिः ।
प्रसन्नं गुरुमासाद्य प्रष्टव्यं ज्ञेयमात्मनः ॥ २५८ ॥
भगवन्करुणासिंधो भवसिंधोर्भवांस्तरिः ।
यमाश्रित्याश्रमेणैव परं पारं गता बुधाः ॥ २५९ ॥
जन्मांतरकृतानंतपुण्यकर्मफलोदयः ।
अद्य संनिहितो यस्मात्त्वत्कृपापात्रमस्म्यहम् ॥ २६० ॥
संप्रीतिमक्ष्णोर्वदनप्रसादमानंदमंतःकरणस्य सद्यः ।
विलोकनं ब्रह्मविदस्तनोति छिनत्ति मोहं सुगतिं व्यनक्ति ॥ २६१ ॥
हुताशनानां शशिनामिनानामप्यर्बुदं वापि न यन्निहंतुम् ।
शक्नोति तद्ध्वान्तमनंतमांतरं हन्त्यात्मवेत्ता सकृदीक्षणेन॥ २६२ ॥
दुष्पारे भवसागरे जनिमृतिव्याध्यादिदुःखोत्कटे
घोरे पुत्रकलत्रमित्रबहुलग्राहाकरे भीकरे ।
कर्मोत्तुंगतरंगभंगनिकरैराकृष्यमाणो मुहुः
यातायातगतिभ्रमेण शरणं किंचिन्न पश्याम्यहम् ॥ २६३ ॥
केन वा पुण्यशेषेण तव पादांबुजद्वयम् ।
दृष्टवानास्मि मामार्तं मृत्योस्त्राहि दयादृशा ॥ २६४ ॥

वदन्तमेवं तं शिष्यं दृष्ट्वैव दयया गुरुः ।
दद्यादभयमेतस्मै मा भैष्टेति मुहुर्मुहुः ॥ २६५ ॥
विद्वन्मृत्युभयं जहीहि भवतो नास्त्येव मृत्युः क्वचि-
न्नित्यस्य द्वयवर्जितस्य परमानंदात्मनो ब्रह्मणः ।
भ्रांत्या किंचिदवेक्ष्य भीतमनसा मिथ्या त्वया कथ्यते
मां त्राहीति हि सुप्तवत्प्रलपनं शून्यात्मकं ते मृषा ॥ २६६ ॥
निद्रागाढतमोवृतः किल जनः स्वप्ने भुजंगादिना
ग्रस्तं स्वं समवेक्ष्य यत्प्रलपति त्रासाद्धृतोऽस्मीत्यलम् ।
आप्तेन प्रतिबोधितः करतलेनाताड्य पृष्टः स्वयं
किंचिन्नेति वदत्यमुष्य वचनं स्यात्तत्किमर्थं वद ॥ २६७ ॥
रज्जोस्तु तत्त्वमनवेक्ष्य गृहीतसर्प-
भावः पुमानयमहिर्वसतीति मोहात् ।
आक्रोशति प्रतिबिभेति च कंपते त-
न्मिथ्यैव नात्र भुजगोऽस्ति विचार्यमाणे ॥ २६८ ॥
तद्वत्त्वयाप्यात्मन उक्तमेतज्जन्माप्ययव्याधिजरादिदुःखम्
मृषैव सर्वं भ्रमकल्पितं ते सम्यग्विचार्यात्मनि मुंच भीतिम् ॥ २६९ ॥
भवाननात्मनो धर्मानात्मन्यारोप्य शोचति ।
तदज्ञानकृतं सर्वं भयं त्यक्त्वा सुखी भव ॥ २७० ॥

शिष्यः—

श्रीमद्भिरुक्तं सकलं मृषेति दृष्टान्त एव ह्युपपद्यते तत् ।
दार्ष्टांतिके नैव भवादिदुःखं प्रत्यक्षतः सर्वजनप्रसिद्धम् ॥ २७१ ॥
प्रत्यक्षेणानुभूतार्थः कथं मिथ्यात्वमर्हति ।
चक्षुषो विषयं कुंभं कथं मिथ्या करोम्यहम् ॥ २७२ ॥
विद्यमानस्य मिथ्यात्वं कथं नु घटेत प्रभो ।
प्रत्यक्षं खलु सर्वेषां प्रमाणं प्रस्फुटार्थकम् ॥ २७३ ॥

मर्त्यस्य मम जन्मादिदुःखभाजोऽल्पजीविनः ।
ब्रह्मत्वमपि नित्यत्वं परमानंदता कथम् ॥ २७४ ॥
क आत्मा कस्त्वनात्मा च किमु लक्षणमेतयोः ।
आत्मन्यनात्मधर्माणामारोपः क्रियते कथम् ॥ २७५ ॥
किमज्ञानं तदुत्पन्नभयत्यागोऽपि वा कथम् ।
किमु ज्ञानं तदुत्पन्नसुखप्राप्तिश्च वा कथम् ॥ २७६ ॥
सर्वमेतद्यथापूर्वं करामलकवत्स्फुटम् ।
प्रतिपादय मे स्वामिन् श्रीगुरो करुणानिधे ॥ २७७ ॥

श्रीगुरुः—

धन्यः कृतार्थस्त्वमहो विवेकः शिवप्रसादस्तव विद्यते महान् ।
विसृज्य तु प्राकृतलोकमार्गं ब्रह्मावगन्तुं यतसे यतस्त्वम् ॥ २७८ ॥
शिवप्रसादेन विना न सिद्धिः शिवप्रसादेन विना न बुद्धिः ।
शिवप्रसादेन विना न युक्तिः शिवप्रसादेन विना न मुक्तिः ॥ २७९ ॥
यस्य प्रसादेन विमुक्तसंगाः शुकादयः संसृतिबंधमुक्ताः ।
तस्य प्रसादो बहुजन्मलभ्यो भक्त्यैकगम्यो भवमुक्तिहेतुः ॥ २८० ॥
विवेको जंतूनां प्रभवति जनिष्वेव बहुषु
प्रसादादेवैशाद्बहुसुकृतपाकोदयवशात् ।
यतस्तस्मादेव त्वमपि परमार्थावगमने
कृतारंभः पुंसामिदमिह विवेकस्य तु फलम् ॥ २८१ ॥
मर्त्यत्वसिद्धेरपिपुंस्त्वसिद्धेर्विप्रत्वसिद्धेश्च विवेकसिद्धिः ।
वदन्ति मुख्यं फलमेव मोक्षं व्यर्थं समस्तं यदि चेन्न मोक्षः ॥२८२॥
प्रश्नः समीचीनतरस्तवायं यदात्मतत्त्वावगमे प्रवृत्तिः ।
ततस्तवैतत्सकलं समूलं निवेदयिष्यामि मुदा शृणुष्व ॥ २८३ ॥
मर्त्यत्वं त्वयि कल्पितं भ्रमवशात्तेनैव जन्मादयः
तत्संभावितमेव दुःखमपि ते नो वस्तुतस्तन्मृषा ।

निद्रामोहवशादुपागतसुखं दुःखं च किं नु त्वया
सत्यत्वेन विलोकितं क्वचिदपि ब्रूहि प्रबोधागमे ॥ २८४ ॥
नाशेषलोकैरनुभूयमानः प्रत्यक्षतोऽयं सकलप्रपंचः ।
कथं मृषा स्यादिति शंकनीयं विचारशून्येन विमुह्यता त्वया ॥ २८५ ॥
दिवांधदृष्टेस्तु दिवांधकारः प्रत्यक्षसिद्धोऽपि स किं यथार्थः ।
तद्वद्भ्रमेणावगतः पदार्थो भ्रान्तस्य सत्यः सुमतेर्मृषैव ॥ २८६ ॥
घटोऽयमित्यत्र घटाभिधानः प्रत्यक्षतः कश्चिदुदेति दृष्टेः ।
विचार्यमाणे स तु नास्ति तत्र मृदस्ति तद्भावविलक्षणा सा ॥ २८७ ॥
प्रादेशमात्रः परिदृश्यतेऽर्कः शास्त्रेण संदर्शितलक्षयोजनः ।
मानांतरेण क्वचिदेति बाधां प्रत्यक्षमप्यत्र हि न व्यवस्था ॥ २८८ ॥
तस्मात्त्वयीदं भ्रमतः प्रतीतं मृषैव नो सत्यमवेहि साक्षात् ।
ब्रह्म त्वमेवासि सुखस्वरूपं त्वत्तो न भिन्नं विचिनुष्व बुद्धौ ॥ २८९ ॥
लोकान्तरे वात्र गुहान्तरे वा तीर्थान्तरे कर्मपरंपरांतरे ।
शास्त्रान्तरे नास्त्यनुपश्यतामिह स्वयं परं ब्रह्म विचार्यमाणे ॥ २९० ॥
तत्त्वमात्मस्थमज्ञात्वा मूढः शास्त्रेषु पश्यति ।
गोपः कक्षगतं छागं यथा कूपेषु दुर्मतिः ॥ २९१ ॥
स्वमात्मानं परं मत्वा परमात्मानमन्यथा ।
विमृश्यते पुनः स्वात्मा बहिः कोशेषु पंडितैः ॥ २९२ ॥
विस्मृत्य वस्तुनस्तत्त्वमध्यारोप्य च वस्तुनि ।
अवस्तुतां च तद्धर्मान्मुधा शोचति नान्यथा ॥ २९३ ॥
आत्मानात्मविवेकं ते वक्ष्यामि शृणु सादरम् ।
यस्य श्रवणमात्रेण मुच्यतेऽनात्मबंधनात् ॥ २९४ ॥
इत्युक्त्वाभिमुखीकृत्य शिष्यं करुणया गुरुः ।
अध्यारोपापवादाभ्यां निष्प्रपंचं प्रपंचयन् ॥ २९५ ॥
सम्यक्प्रबोधयत्तत्त्वं शास्त्रदृष्टेन वर्त्मना ।
सर्वेषामुपकाराय तत्प्रकारोऽत्र दर्श्यते ॥ २९६ ॥

वस्तुन्यवस्त्वारोपो यः सोऽध्यारोप इतीर्यते ।
असर्पभूते रज्ज्वादौ सर्पत्वारोपणं यथा ॥ २९७ ॥
वस्तु तावत्परं ब्रह्म सत्यज्ञानादिलक्षणम् ।
इदमारोपितं यत्र भाति खे नीलतादिवत् ॥ २९८ ॥
तत्कारणं यदज्ञानं सकार्यं सद्विलक्षणम् ।
अवस्त्वित्युच्यते सद्भिर्यस्य बाधा प्रदृश्यते ॥ २९९ ॥
अवस्तु तत्प्रमाणैर्यद्बाध्यते शुक्तिरौप्यवत् ।
न बाध्यते यत्तद्वस्तु त्रिषु कालेषु शुक्तिवत् ॥ ३०० ॥
शुक्तेर्बाधा न खल्वस्ति रजतस्य यथा तथा ।
अवस्तुसंज्ञितं यत्तज्जगदध्यासकारणम् ॥ ३०१ ॥
सदसद्भ्यामनिर्वाच्यमज्ञानं त्रिगुणात्मकम् ।
वस्तु तत्त्वावबोधैकबाध्यं तद्भावलक्षणम् ॥ ३०२ ॥
मिथ्यासंबंधतस्तत्र ब्रह्मण्याश्रित्य तिष्ठति ।
मणौ शक्तिर्यथा तद्वन्नैतदाश्रयदूषकम् ॥ ३०३ ॥
सद्भावे लिंगमेतस्य कार्यमेतच्चराचरम् ।
मानं श्रुतिः स्मृतिश्चाज्ञोऽहमित्यनुभवोऽपि च ॥ ३०४ ॥
अज्ञानं प्रकृतिः शक्तिरविद्येति निगद्यते ।
तदेतत्सन्न भवति नासद्वा शुक्तिरौप्यवत् ॥ ३०५ ॥
सतो भिन्नमभिन्नं वा न दीपस्य प्रभा यथा ।
न सावयवमन्यद्वा बीजस्यांकुरवत्क्वचित् ॥ ३०६ ॥
अत एतदनिर्वाच्यमित्येव कवयो विदुः ।
समष्टिव्यष्टिरूपेण द्विधाज्ञानं निगद्यते ॥ ३०७ ॥
नानात्वेन प्रतीतानामज्ञानानामभेदतः ।
एकत्वेन समष्टिः स्याद्भूरुहाणां वनं यथा ॥ ३०८ ॥
इयं समष्टिरुत्कृष्टा सत्त्वांशोत्कर्षतः पुरा ।

मायेति कथ्यते तज्ज्ञैः शुद्धसत्त्वैकलक्षणा ॥ ३०९ ॥
मायोपहितचैतन्यं साभासं सत्त्वबृंहितम् ।
सर्वज्ञत्वादिगुणकं सृष्टिस्थित्यंतकारणम् ॥ ३१० ॥
अव्याकृतं तदव्यक्तमीश इत्यपि गीयते ।
सर्वशक्तिगुणोपेतः सर्वज्ञानावभासकः ॥ ३११ ॥
स्वतंत्रः सत्यसंकल्पः सत्यकामः स ईश्वरः ।
तस्यैतस्य महाविष्णोर्महाशक्तेर्महीयसः ॥ ३१२ ॥
सर्वज्ञत्वेश्वरत्वादिकारणत्वान्मनीषिणः ।
कारणं वपुरित्याहुः समष्टिं सत्त्वबृंहितम् ॥ ३१३ ॥
आनंदप्रचुरत्वेन साधकत्वेन कोशवत् ।
सैषानंदमयः कोश इतीशस्य निगद्यते ॥ ३१४ ॥
सर्वोपरमहेतुत्वात्सुषुप्तिस्थानमिष्यते ।
प्राकृतः प्रलयो यत्र श्राव्यते श्रुतिभिर्मुहुः ॥ ३१५ ॥
अज्ञानं व्यष्टयभिप्रायादनेकत्वेन भिद्यते ।
अज्ञानवृत्तयो नाना तत्तद्गुणविलक्षणाः ॥ ३१६ ॥
वनस्य व्यष्टयभिप्रायाद्भूरुहा इत्यनेकता ।
यथा तथैवाज्ञानस्य व्यष्टितः स्यादनेकता ॥ ३१७ ॥
व्यष्टिर्मलिनसत्त्वैषा रजसा तमसा युता ।
ततो निकृष्टा भवति योपाधिः प्रत्यगात्मनः ॥ ३१८ ॥
चैतन्यं व्यष्टयवच्छिन्नं प्रत्यगात्मेति गीयते ।
साभासं व्यष्ट्युपहितं सत्तादात्म्येन तद्गुणैः ॥ ३१९ ॥
अभिभूतः स एवात्मा जीव इत्यभिधीयते ।
किंचिज्ज्ञत्वानीश्वरत्वसंसारित्वादिधर्मवान् ॥ ३२० ॥
अस्य व्यष्टिरहंकारकारणत्वेन कारणम् ।
वपुस्तत्राभिमान्यात्मा प्राज्ञ इत्युच्यते बुधैः ॥ ३२१ ॥

प्राज्ञत्वमस्यैकाज्ञानभासकत्वेन संमतम् ।
व्यष्टेर्निकृष्टत्वेनास्य नानेकाज्ञानभासकम् ॥ ३२२ ॥
स्वरूपाच्छादकत्वेनाप्यानंदप्रचुरत्वतः ।
कारणं वपुरानंदमयः कोश इतीर्यते ॥ ३२३ ॥
अस्यावस्था सुषुप्तिः स्याद्यत्रानंदः प्रकृष्यते ।
एषोऽहं सुखमस्वाप्सं न तु किंचिदवेदिषम् ॥ ३२४ ॥
इत्यानंदसमुत्कर्षः प्रबुद्धेषु प्रदृश्यते ।
समष्टेरपि च व्यष्टेरुभयोर्वनवृक्षवत् ॥ ३२५ ॥
अभेद एव नो भेदो जात्येकत्वेन वस्तुतः ।
अभेद एव ज्ञातव्यस्तथेशप्राज्ञयोरपि ॥ ३२६ ॥
सत्युपाध्योरभिन्नत्वे क्व भेदस्तद्विशिष्टयोः ।
एकीभावे तरंगाब्ध्योः को भेदः प्रतिबिंबयोः ॥ ३२७ ॥
अज्ञानतदवच्छिन्नाभासयोरुभयोरपि ।
आधारं शुद्धचैतन्यं यत्तत्तुर्यमितीर्यते ॥ ३२८ ॥
एतदेवाविविक्तं सदुपाधिभ्यां च तद्गुणैः ।
महावाक्यस्य वाच्यार्थो विविक्तं लक्ष्य इष्यते ॥ ३२९ ॥
अनंतशक्तिसंपन्नो मायोपाधिक ईश्वरः ।
ईक्षामात्रेण सृजति विश्वमेतच्चराचरम् ॥ ३३० ॥
अद्वितीयस्वमात्रोऽसौ निरुपादान ईश्वरः ।
स्वयमेव कथं सर्वं सृजतीति न शंक्यताम् ॥ ३३१ ॥
निमित्तमप्युपादानं स्वयमेव भवन्प्रभुः ।
चराचरात्मकं विश्वं सृजत्यवति लुंपति ॥ ३३२ ॥
स्वप्राधान्येन जगतो निमित्तमपि कारणम् ।
उपादानं ततोपाधिप्राधान्येन भवत्ययम् ॥ ३३३ ॥
यथा लूता निमित्तं च स्वप्रधानतया भवेत् ।

स्वशरीरप्रधानत्वेनोपादानं तथेश्वरः ॥ ३३४ ॥
तमःप्रधानप्रकृतिविशिष्टात्परमात्मनः ।
अभूत्सकाशादाकाशमाकाशाद्वायुरुच्यते ॥ ३३५ ॥
वायोरग्निस्तथैवाग्नेरापोऽद्भ्यः पृथिवी क्रमात् ।
शक्तेस्तमःप्रधानत्वं तत्कार्ये जाड्यदर्शनात् ॥ ३३६ ॥
आरंभन्ते कार्यगुणान्ये कारणगुणा हि ते ।
एतानि सूक्ष्मभूतानि भूतमात्रा अपि क्रमात् ॥ ३३७ ॥
एतेभ्यः सूक्ष्मभूतेभ्यः सूक्ष्मदेहा भवन्त्यपि ।
स्थूलान्यपि च भूतानि चान्योन्यांशविमेलनात् ॥ ३३८ ॥
अपंचीकृतभूतेभ्यो जातं सप्तदशांगकम् ।
संसारकारणं लिंगमात्मनो भोगसाधनम् ॥ ३३९ ॥
श्रोत्रादिपंचकं चैव वागादीनां च पंचकम् ।
प्राणादिपंचकं बुद्धिमनसी लिंगमुच्यते ॥ ३४० ॥
श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि पंच जातानि ।
आकाशादीनां सत्त्वांशेभ्यो धींद्रियाण्यनुक्रमतः ॥ ३४१ ॥
आकाशादिगताः पंच सात्त्विकांशाः परस्परम् ।
मिलित्वैवान्तःकरणमभवत्सर्वकारणम् ॥ ३४२ ॥
प्रकाशकत्वादेतेषां सात्त्विकांशत्वमिष्यते ।
प्रकाशकत्वं सत्त्वस्य स्वच्छत्वेन यतस्ततः ॥ ३४३ ॥
तदंतःकरणं वृत्तिभेदेन स्याच्चतुर्विधम् ।
मनो बुद्धिरहंकारचित्तं चेति तदुच्यते ॥ ३४४ ॥
संकल्पान्मन इत्याहुर्बुद्धिरर्थस्य निश्चयात् ।
अभिमानादहंकारश्चित्तमर्थस्य चिंतनात् ॥ ३४५ ॥
मनस्यपि च बुद्धौ च चित्ताहंकारयोः क्रमात् ।
अंतर्भावोऽत्र बोद्धव्यो लिंगलक्षणसिद्धये ॥ ३४६ ॥

चिंतनं च मनोधर्मः संकल्पादिर्यथा तथा ।
अंतर्भावो मनस्यैव सम्यक्चित्तस्य सिध्यति ॥ ३४७ ॥
देहादावहमित्येव भावो दृढतरो धियः ।
दृश्यतेऽहंकृतेस्तस्मादंतर्भावोऽत्र युज्यते ॥ ३४८ ॥
तस्मादेव तु बुद्धेः कर्तृत्वं तदितरस्य करणत्वम् ।
सिध्यत्यात्मन उभयाद्विद्यात्संसारकारणं मोहात् ॥ ३४९ ॥
विज्ञानमयकोशः स्याद्बुद्धिर्ज्ञानेंद्रियैः सह ।
विज्ञानप्रचुरत्वेनाप्याच्छादकतयात्मनः ॥ ३५० ॥
विज्ञानमयकोशोऽयमिति विद्वद्भिरुच्यते ।
अयं महानहंकारवृत्तिमान्कर्तृलक्षणः ।
सर्वसंसारनिर्वोढा विज्ञानमयशब्दभाक् ॥ ३५१ ॥
अहं ममेत्येव सदाभिमानं देहेंद्रियादौ कुरुते गृहादौ ।
जीवाभिमानः पुरुषोऽयमेव कर्ता च भोक्ता च सुखी च दुःखी ॥ ३५२ ॥
स्ववासनाप्रेरित एव नित्यं करोति कर्मोभयलक्षणं च ।
भुंक्ते तदुत्पन्नफलं विशिष्टं सुखं च दुःखं च परत्र चात्र ॥ ३५३ ॥
नानायोनिसहस्रेषु जायमानो मुहुर्मुहुः ।
म्रियमाणो भ्रमत्येष जीवः संसारमंडले ॥ ३५४ ॥
मनो मनोमयः कोशो भवेज्ज्ञानेंद्रियैः सह ।
प्राचुर्यं मनसो यत्र दृश्यतेऽसौ मनोमयः ॥ ३५५ ॥
चिंताविषादहर्षाद्याः कामाद्या अस्य वृत्तयः ।
मनुते मनसैवैष फलं कामयते बहिः ।
यतते कुरुते भुंक्ते तन्मनः सर्वकारणम् ॥ ३५६ ॥
मनो ह्यमुष्य प्रणवस्य हेतुरंतर्बहिश्चार्थमलेन वेत्ति ।
शृणोति जिघ्रत्यमुनैव चेक्षते वक्ति स्पृशत्यत्ति करोति सर्वम् ॥ ३५७ ॥
बंधश्च मोक्षो मनसैव पुंसामर्थोऽप्यनर्थोऽप्यमुनैव सिध्यति ।

शुद्धेन मोक्षो मलिनेन बंधो विवेकतोऽर्थोऽप्यविवेकतोऽन्यः ॥३५८॥
रजस्तमोभ्यां मलिनं त्वशुद्धमज्ञानजं सत्त्वगुणेन रिक्तम् ।
मनस्तमोदोषसमन्वितत्वाज्जडत्वमोहालसताप्रमादैः ।
तिरस्कृतं सन्न तु वेत्ति वास्तवं पदार्थतत्त्वं ह्युपलभ्यमानम् ॥३५९॥
रजोदोषैर्युक्तं यदि भवति विक्षेपकगुणैः
प्रतीपैः कामाद्यैरनिशमभिभूतं व्यथयति ।
कथंचित्सूक्ष्मार्थावगतिमदपि भ्राम्यति भृशं
मनोदीपो यद्वत्प्रबलमरुता ध्वस्तमहिमा ॥ ३६० ॥
ततो मुमुक्षुर्भवबंधमुक्त्यै रजस्तमोभ्यां च तदीयकार्यैः ।
वियोज्य चित्तं परिशुद्धसत्त्वं प्रियं प्रयत्नेन सदैव कुर्यात् ॥ ३६१ ॥
गर्भावासजनिप्रणाशनजराव्याध्यादिषु प्राणिनां
यद्दुःखं परिदृश्यते च नरके तच्चिंतयित्वा मुहुः ।
दोषानेव विलोक्य सर्वविषयेष्वाशां विमुच्याभित-
श्चित्तग्रंथिविमोचनाय सुमतिः सत्त्वं समालंबताम् ॥ ३६२ ॥
यमेषु निरतो यस्तु नियमेषु च यत्नतः ।
विवेकिनस्तस्य चित्तं प्रसादमधिगच्छति ॥ ३६३ ॥
आसुरीं संपदं त्यक्त्वा भजेद्यो दैवसंपदम् ।
मोक्षैककांक्षया नित्यं तस्य चित्तं प्रसीदति ॥ ३६४ ॥
परद्रव्यपरद्रोहपरनिंदापरस्त्रियः ।
नालंबते मनो यस्य तस्य चित्तं प्रसीदति ॥ ३६५ ॥
आत्मवत्सर्वभूतेषु यः समत्वेन पश्यति ।
सुखं दुःखं विवेकेन तस्य चित्तं प्रसीदति ॥ ३६६ ॥
अत्यंतं श्रद्धया भक्त्या गुरुमीश्वरमात्मनि ।
यो भजत्यनिशं क्षांतस्तस्य चित्तं प्रसीदति ॥ ३६७ ॥
शिष्टान्नमीशार्चनमार्यसेवां तीर्थाटनं स्वाश्रमधर्मनिष्ठाम् ।

यमानुषक्ति नियमानुवृत्तिं चित्तप्रसादाय वदन्ति तज्ज्ञाः ॥ ३६८ ॥

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनाम् ।
पूतिपर्युषितादीनां त्यागः सत्त्वाय कल्पते ॥ ३६९ ॥

श्रुत्या सत्त्वपुराणानां सेवया सत्त्ववस्तुनः ।
अनुवृत्त्या च साधूनां सत्त्ववृत्तिः प्रजायते ॥ ३७० ॥

यस्य चित्तं निर्विषयं हृदयं यस्य शीतलम् ।
तस्य मित्रं जगत्सर्वं तस्य मुक्तिः करस्थिता ॥ ३७१ ॥

हितपरिमितभोजी नित्यमेकान्तसेवी
सकृदुचितहितोक्तिः स्वल्पनिद्राविहारः ।
अनुनियमनशीलो यो भजत्युक्तकाले
स लभत इह शीघ्रं साधु चित्तप्रसादम् ॥ ३७२ ॥

चित्तप्रसादेन विनावगन्तुं बंधं न शक्नोति परात्मतत्त्वम् ।
तत्त्वावगत्या तु विना विमुक्तिर्न सिध्यति ब्रह्मसहस्रकोटिषु ॥३७३॥

मनःप्रसादः पुरुषस्य बंधो मनःप्रसादो भवबंधमुक्तिः ।
मनःप्रसादाधिगमाय तस्मान्मनोनिरासं विदधीत विद्वान् ॥ ३७४ ॥

पंचानामेव भूतानां रजोंशेभ्योऽभवन्क्रमात् ।
वाक्पाणिपादपायूपस्थानि कर्मेंद्रियाण्यनु ॥ ३७५ ॥

समस्तेभ्यो रजोंशेभ्यो व्योमादीनां क्रियात्मकाः ।
प्राणादयः समुत्पन्नाः पंचाप्यांतरवायवः ॥ ३७६ ॥

प्राणः प्राग्गमनेन स्यादपानोऽवाग्गमनेन च ।
व्यानस्तु विष्वग्गमनादुत्क्रान्त्योदान इष्यते ॥ ३७७ ॥

अशितान्नरसादीनां समीकरणधर्मतः ।
समान इत्यभिप्रेतो वायुर्यस्तेषु पंचमः ॥ ३७८ ॥

क्रियैव दिश्यते प्रायः प्राणकर्मेंद्रियेष्वलम् ।
ततस्तेषां रजोंशेभ्यो जनिरंगीकृता बुधैः ॥ ३७९ ॥

राजसीं तु क्रियाशक्तिं तमःशक्तिं जडात्मिकाम् ।
प्रकाशरूपिणीं सत्त्वशक्तिं प्राहुर्महर्षयः ॥ ३८० ॥
एते प्राणादयः पंच पंचकर्मेंद्रियैः सह ।
भवेत्प्राणमयः कोशः स्थूलो येनैव चेष्टते ॥ ३८१ ॥
यद्यन्निष्पाद्यते कर्म पुण्यं वा पापमेव वा ।
वागादिभिश्च वपुषा तत्प्राणमयकर्तृकम् ॥ ३८२ ॥
वायुनोच्चालितो वृक्षो नानारूपेण चेष्टते ।
तस्मिन्विनिश्चले सोऽपि निश्चलः स्याद्यथा तथा ॥ ३८३ ॥
प्राणकर्मेंद्रियैर्देहः प्रेर्यमाणः प्रवर्तते ।
नानाक्रियासु सर्वत्र विहिताविहितादिषु ॥ ३८४ ॥
कोशत्रयं मिलित्वैतद्वपुः स्यात्सूक्ष्ममात्मनः ।
अति सूक्ष्मतया लीनस्यात्मनो गमकत्वतः ॥ ३८५ ॥
लिंगमित्युच्यते स्थूलापेक्षया सूक्ष्ममिष्यते ।
सर्वं लिंगवपुर्जातमेकधीविषयत्वतः ॥ ३८६ ॥
समष्टिः स्यात्तरुगणः सामान्येन वनं यथा ।
एतत्समष्ट्युपहितं चैतन्यं सफलं जगुः ॥ ३८७ ॥
हिरण्यगर्भः सूत्रात्मा प्राण इत्यपि पंडिताः ।
हिरण्मये बुद्धिगर्भे प्रचकास्ति हिरण्यवत् ॥ ३८८ ॥
हिरण्यगर्भ इत्यस्य व्यपदेशस्ततो मतः ।
समस्तलिंगदेहेषु सूत्रवन्मणिपंक्तिषु ।
व्याप्य स्थितत्वात्सूत्रात्मा प्राणनात्प्राण उच्यते ॥ ३८९ ॥
नैकधीविषयत्वेन लिंगं व्यष्टिर्भवत्यथ ।
यदेतद्व्यष्ट्युपहितं चिदाभाससमन्वितम् ॥ ३९० ॥
चैतन्यं तैजस इति निगदन्ति मनीषिणः ।
तेजोमयान्तःकरणोपाधित्वेनैव तैजसः ॥ ३९१ ॥

स्थूलात्सूक्ष्मतया व्यष्टिरस्य सूक्ष्मवपुर्मतम् ।
अस्य जागरसंस्कारमयत्वाद्वपुरुच्यते ॥ ३९२ ॥
स्वप्ने जागरकालीनवासनापरिकल्पितान् ।
तैजसो विषयान्भुंक्ते सूक्ष्मार्थान्सूक्ष्मवृत्तिभिः ॥ ३९३ ॥
समष्टेरपि च व्यष्टेः सामान्येनैव पूर्ववत् ।
अभेद एव ज्ञातव्यो जात्यैकत्वे कुतो भिदा ॥ ३९४ ॥
द्वयोरुपाध्योरेकत्वे तयोरप्यभिमानिनोः ।
सूत्रात्मनस्तैजसस्याप्यभेदः पूर्ववन्मतः ॥ ३९५ ॥
एवं सूक्ष्मप्रपंचस्य प्रकारः शास्त्रसंमतः ।
अथ स्थूलप्रपंचस्य प्रकारः कथ्यते शृणु ॥ ३९६ ॥
तान्येव सूक्ष्मभूतानि व्योमादीनि परस्परम् ।
पंचीकृतानि स्थूलानि भवन्ति शृणु तत्क्रमम् ॥ ३९७ ॥
खादीनां भूतमेकैकं सममेव द्विधा द्विधा ।
विभज्य भागं तत्राद्यं त्यक्त्वा भागं द्वितीयकम् ॥ ३९८
चतुर्धा सुविभज्याथ तमेकैकं विनिक्षिपेत् ।
चतुर्णां प्रथमे भागे क्रमेण स्वार्धमंतरा ॥ ३९९ ॥
ततो व्योमादिभूतानां भागाः पंच भवन्ति ते ।
स्वस्वार्धभागेनान्येभ्यः प्राप्तं भागचतुष्टयम् ॥ ४०० ॥
संयोज्य स्थूलतां यान्ति व्योमादीनि यथाक्रमम् ।
अमुष्य पंचीकरणस्याप्रामाण्यं न शंक्यताम् ॥ ४०१ ॥
उपलक्षणमस्यापि तत्त्रिवृत्करणश्रुतिः ।
पंचानामपि भूतानां श्रूयतेऽन्यत्र संभवः ॥ ४०२ ॥
ततः प्रामाणिकं पंचीकरणं मन्यतां बुधैः ।
प्रत्यक्षादिविरोधः स्यादन्यथा क्रियते यदि ॥ ४०३ ॥
आकाशवाय्वोर्धर्मस्तु वह्न्यादावुपलभ्यते ।

यथा तथाकाशवाय्वोर्नाग्न्यादेर्धर्म ईक्ष्यते ॥ ४०४ ॥
अतोऽप्रामाणिकमिति न किंचिदपि चिंत्यताम् ।
खांशव्याप्तिश्च खव्याप्तिर्विद्यते पावकादिषु ॥ ४०५ ॥
तेनोपलभ्यते शब्दः कारणस्यातिरेकतः ।
तथा नभस्वतो धर्मोऽप्यग्न्यादावुपलभ्यते ॥ ४०६ ॥
न तथा विद्यते व्याप्तिर्वह्न्यादेः खनभस्वतोः ।
सूक्ष्मत्वादंशकव्याप्तेस्तद्धर्मो नोपलभ्यते ॥ ४०७ ॥
कारणस्यानुरूपेण कार्यं सर्वत्र दृश्यते ।
तस्मात्प्रामाण्यमेष्टव्यं बुधैः पंचीकृतेरपि ॥ ४०८ ॥
अनेनोद्भूतगुणकं भूतं वक्ष्येऽवधारय ।
शब्दैकगुणमाकाशं शब्दस्पर्शगुणोऽनिलः ॥ ४०९ ॥
तेजःशब्दस्पर्शरूपैर्गुणवत्कारणं क्रमात् ।
आपश्चतुर्गुणः शब्दस्पर्शरूपरसैः क्रमात् ॥ ४१० ॥
एतैश्चतुर्भिर्गंधेन सह पंचगुणा मही ।
आकाशांशतया श्रोत्र शब्दं गृह्णाति तद्गुणम् ॥ ४११ ॥
त्वङ्मारुतांशकतया स्पर्शं गृह्णाति तद्गुणम् ।
तेजोंशकतया चक्षू रूपं गृह्णाति तद्गुणम् ॥ ४१२ ॥
अबंशकतया जिह्वा रसं गृह्णाति तद्गुणम् ।
भूम्यंशकतया घ्राणं गंधं गृह्णाति तद्गुणम् ॥ ४१३ ॥
करोति खांशकतया वाक्शब्दोच्चारणक्रियाम् ।
वाय्वंशकतया पादौ गमनादिक्रियापरौ ॥ ४१४ ॥
तेजोंशकतया पाणी वह्न्याद्यर्चनतत्परौ ।
जलांशकतयोपस्थो रेतोमूत्रविसर्गकृत् ॥ ४१५ ॥
भूम्यंशकतया पायुः कठिनं मलमुत्सृजेत् ।
श्रोत्रस्य दैवतं दिक्स्यात्त्वचो वायुर्दृशो रविः ॥ ४१६ ॥

जिह्वाया वरुणो दैवं घ्राणस्य त्वश्विनावुभौ ।
वाचोऽग्निर्हस्तयोरिंद्रः पादयोस्तु त्रिविक्रमः ॥ ४१७ ॥
पायोर्मृत्युरुपस्थस्य त्वधिदैवं प्रजापतिः ।
मनसो दैवतं चंद्रो बुद्धेर्दैवं बृहस्पतिः ॥ ४१८ ॥
रुद्रस्त्वहंकृतेर्दैवं क्षेत्रज्ञश्चित्तदैवतम् ।
दिगाद्या देवताः सर्वाः खादिसत्त्वांशसंभवाः ॥ ४१९ ॥
संमिता इंद्रियस्थानेष्विंद्रियाणां समंततः ।
निगृह्णन्त्यनुगृह्णन्ति प्राणिकर्मानुरूपतः ॥ ४२० ॥
शरीरकरणग्रामा प्राणाहमधिदेवताः ।
पंचैते हेतवः प्रोक्ता निष्पत्तौ सर्वकर्मणाम् ॥ ४२१ ॥
कर्मानुरूपेण गुणोदयो भवेद्गुणानुरूपेण मनःप्रवृत्तिः ।
मनोनुवृत्तैरुभयात्मकेंद्रियैर्निवर्त्यते पुण्यमपुण्यमत्र ॥ ४२२ ॥

करोति विज्ञानमयोऽभिमानं
कर्ताहमेवेति तदात्मना स्थितः ।
आत्मा तु साक्षी न करोति किंचि-
न्न कारयत्येव तटस्थवत्सदा ॥ ४२३ ॥

द्रष्टा श्रोता वक्ता कर्ता भोक्ता भवत्यहंकारः ।
स्वयमेतद्विकृतीनां साक्षी निर्लेप एवात्मा ॥ ४२४ ॥
आत्मनः साक्षिमात्रत्वं न कर्तृत्वं न भोक्तृता ।
रविवत्प्राणिभिर्लोके क्रियमाणेषु कर्मसु ॥ ४२५ ॥
न ह्यर्कः कुरुते कर्म न कारयति जंतवः ।
स्वस्वभावानुरोधेन वर्तन्ते स्वस्वकर्मसु ॥ ४२६ ॥
तथैव प्रत्यगात्मापि रविवन्निष्क्रियात्मना ।
उदासीनतयैवास्ते देहादीनां प्रवृत्तिषु ॥ ४२७ ॥
अज्ञात्वैवं परं तत्त्वं मायामोहितचेतसः ।

स्वात्मन्यारोपयन्त्येतत्कर्तृत्वाद्यन्यगोचरम् ॥ ४२८ ॥

आत्मस्वरूपमविचार्य विमूढबुद्धि-
रारोपयत्यखिलमेतदनात्मकार्यम् ।
स्वात्मन्यसंगचितिनिष्क्रिय एव चंद्रे
दूरस्थमेघकृतधावनवद्भ्रमेण ॥ ४२९ ॥

आत्मानात्मविवेकं स्फुटतरमग्रे निवेदयिष्यामः ।
इममाकर्णय विद्वञ्जगदुत्पत्तिप्रकारमावृत्त्या ॥ ४३० ॥

पंचीकृतेभ्यः खादिभ्यो भूतेभ्यस्त्वीक्षयेशितुः ।
समुत्पन्नमिदं स्थूलं ब्रह्मांडं सचराचरम् ॥ ४३१ ॥

व्रीह्याद्योषधयः सर्वा वायुतेजोंबुभूमयः ।
सर्वेषामप्यभूदन्नं चतुर्विधशरीरिणाम् ॥ ४३२ ॥

केचिन्मारुतभोजनाः खलु परे चंद्रार्कतेजोशनाः
केचित्तोयकणाशिनोऽपरिमिताः केचित्तु मृद्भक्षकाः ।
केचित्पर्णशिलातृणादनपराः केचित्तु मांसाशिनः
केचिद्व्रीहियवान्नभोजनपरा जीवन्त्यमी जंतवः ॥ ४३३ ॥

जरायुजांडजस्वेदजोद्भिज्जाद्याश्चतुर्विधाः।
स्वस्वकर्मानुरूपेण जातास्तिष्ठन्ति जंतवः ॥ ४३४ ॥

यत्र जाता जरायुभ्यस्ते नराद्या जरायुजाः ।
अंडजास्ते स्युरंडेभ्यो जाता ये विहगादयः ॥ ४३५ ॥

स्वेदाज्जाताः स्वेदजास्ते यूका लूक्षादयोऽपि च ।
भूमिमुद्भिद्य ये जाता उद्भिज्जास्ते द्रुमादयः ॥ ४३६ ॥

इदं स्थूलवपुर्जातं भौतिकं च चतुर्विधम् ।
सामान्येन समष्टिः स्यादेकधीविषयत्वतः ॥ ४३७ ॥

एतत्समष्टयवच्छिन्नं चैतन्यं फलसंयुतम् ।
प्राहुर्वैश्वानर इति विराडिति च वैदिकाः ॥ ४३८ ॥

वैश्वानरो विश्वनरेष्वात्मत्वेनाभिमानतः ।
विराट्स्याद्विविधत्वेन स्वयमेव विराजनात् ॥ ४३९ ॥
चतुर्विधं भूतजातं तत्तज्जातिविशेषतः ।
नैकधीविषयत्वेन पूर्ववद्व्यष्टिरिष्यते ॥ ४४० ॥
साभासं व्यष्ट्युपहितं तत्तादात्म्यमुपागतम् ।
चैतन्यं विश्व इत्याहुर्वेदान्तनयकोविदाः ॥ ४४१ ॥
विश्वोऽस्मिन्स्थूलदेहेऽत्र स्वाभिमानेन तिष्ठति ।
यतस्ततो विश्व इति नाम्ना सार्थो भवत्ययम् ॥ ४४२ ॥
व्यष्टिरेषास्य विश्वस्य भवति स्थूलविग्रहः ।
उच्यतेऽन्नविकारित्वात्कोशोऽन्नमय इत्ययम् ॥ ४४३ ॥
देहोऽयं पितृभुक्तान्नविकाराच्छुक्लशोणितात् ।
जातः प्रवर्धतेऽन्नेन तदभावे विनश्यति ॥ ४४४ ॥
तस्मादन्नविकारित्वेनायमन्नमयो मतः ।
आच्छादकत्वादेतस्याप्यसेः कोशवदात्मनः ॥ ४४५ ॥
आत्मनः स्थूलभोगानामेतदायतनं विदुः ।
शब्दादिविषयान्भुंक्ते स्थूलान्स्थूलात्मनि स्थितः ॥ ४४६ ॥
वहिरात्मा ततः स्थूलभोगायतनमुच्यते ।
इंद्रियैरुपनीतानां शब्दादीनामयं स्वयम् ।
देहेंद्रियमनोयुक्तो भोक्तेत्याहुर्मनीषिणः ॥ ४४७ ॥
एकादशद्वारवतीह देहे सौधे महाराज इवाक्षवर्गैः ।
संसेव्यमानो विषयोपभोगानुपाधिसंस्थो बुभुजेऽयमात्मा ॥ ४४८ ॥
ज्ञानेंद्रियाणि निजदैवतचोदितानि
कर्मेंद्रियाण्यपि तथा मनआदिकानि ।
स्वस्वप्रयोजनविधौ नियतानि सन्ति
यत्नेन किंकरजना इव तं भजन्ते ॥ ४४९ ॥

यत्रोपभुंक्ते विषयान्स्थूलानेष महामतिः ।
अहं ममेति सैषास्यावस्था जाग्रदितीर्यते ॥ ४५० ॥
एतत्समष्टिव्यष्ट्योश्चोभयोरप्यभिमानिनोः ।
तद्विश्ववैश्वानरयोरभेदः पूर्ववन्मतः ॥ ४५१ ॥
स्थूलसूक्ष्मकारणाख्याः प्रपंचा ये निरूपिताः ।
ते सर्वेऽपि मिलित्वैकः प्रपंचोऽपि महान्भवेत् ॥ ४५२ ॥
महाप्रपंचावच्छिन्नं विश्वप्राज्ञादिलक्षणम् ।
विराडादीशपर्यंतं चैतन्यं चैकमेव तत् ॥ ४५३ ॥
यदनाद्यंतमव्यक्तं चैतन्यमजमक्षरम् ।
महाप्रपंचेन सहाविविक्तं सदयोऽग्निवत् ॥ ४५४ ॥
तत्सर्वं खल्विदं ब्रह्मेत्यस्य वाक्यस्य पंडितैः ।
वाच्यार्थ इति निर्णीतं विविक्तं लक्ष्य इत्यपि ॥ ४५५ ॥
स्थूलाद्यज्ञानपर्यंतं कार्यकारणलक्षणम् ।
दृश्यं सर्वमनात्मेति विजानीहि विचक्षण ॥ ४५६ ॥
अंतःकरणतद्वृत्तिद्रष्टृ नित्यमविक्रियम् ।
चैतन्यं यत्तदात्मेति बुद्ध्या बुध्यस्व सूक्ष्मया ॥ ४५७ ॥
एष प्रत्यक्स्वप्रकाशो निरंशोऽसंगः शुद्धः सर्वदैकस्वभावः ।
नित्याखंडानंदरूपो निरीहः साक्षी चेता केवलो निर्गुणश्च ॥४५८॥
नैव प्रत्यग्जायते वर्धते नो किंचिन्नापक्षीयते नैव नाशम् ।
आत्मा नित्यः शाश्वतोऽयं पुराणो नासौ हन्यो हन्यमाने शरीरे॥४५९
जन्मास्तित्वविवृद्धयः परिणतिश्चापक्षतिर्नाशनं
दृश्यस्यैव भवन्ति षड्विकृतयो नानाविधा व्याधयः ।
स्थूलत्वादि च नीलताद्यपि मितिर्वर्णाश्रमादिप्रथा
दृश्यन्ते वपुषो न चात्मन इमे तद्विक्रियासाक्षिणः ॥ ४६० ॥
अस्मिन्नात्मन्यनात्मत्वमनात्मन्यात्मतां पुनः ।

विपरीततयाध्यस्य संसरन्ति विमोहतः ॥ ४६१ ॥

भ्रान्त्या मनुष्योऽहमहं द्विजोऽहं
तज्ज्ञोऽहमज्ञोऽहमतीव पापी ।
भ्रष्टोऽस्मि शिष्टोऽस्मि सुखी च दुःखी-
त्येवं विमुह्यात्मनि कल्पयन्ति ॥ ४६२ ॥

अनात्मनो जन्मजरामृतिक्षुधा-
तृष्णासुखक्लेशभयादिधर्मान् ।
विपर्ययेण ह्यतथाविधेऽस्मि-
न्नारोपयन्त्यात्मनि बुद्धिदोषात् ॥ ४६३ ॥

भ्रांत्या यत्र यदध्यासस्तत्कृतेन गुणेन वा ।
दोषेणाप्यणुमात्रेण स न संबध्यते क्वचित् ॥ ४६४ ॥

किं मरुन्मृगतृष्णांबुपूरेणार्द्रत्वमृच्छति ।
दृष्टिसंस्थितपीतेन शंखः पीतायते किमु ॥ ४६५ ॥

शिष्यः—

प्रत्यगात्मन्यविषयेऽनात्माध्यासः कथं प्रभो ॥ ४६६ ॥

पुरो दृष्टे हि विषयेऽध्यस्यन्ति विषयान्तरम् ।
तद्दृष्टं शुक्तिरज्ज्वादौ सादृश्याद्यनुबंधतः ॥ ४६७ ॥

परत्र पूर्वदृष्टस्यावभासः स्मृतिलक्षणः ।
अध्यासः स कथं स्वामिन् भवेदात्मन्यगोचरे ॥ ४६८ ॥

नानुभूतः कदाप्यात्माननुभूतस्य वस्तुनः ।
सादृश्यं सिध्यति कथमनात्मनि विलक्षणे ॥ ४६९ ॥

अनात्मन्यात्मताध्यासः कथमेष समागतः ।
निवृत्तिः कथमेतस्य केनोपायेन सिध्यति ॥ ४७० ॥

उपाधियोग उभयोः सम एवेशजीवयोः ।
जीवस्यैव कथं बंधो नेश्वरस्यास्ति तत्कथम् ॥ ४७१ ॥

एतत्सर्वं दयादृष्ट्या करामलकवत्स्फुटम् ।
प्रतिपादय सर्वज्ञ श्रीगुरो करुणानिधे ॥ ४७२ ॥

श्रीगुरुः—

न सावयव एकस्य नात्मा विषय इष्यते ।
अस्यास्मत्प्रत्ययार्थत्वादपरोक्षाच्च सर्वशः ॥ ४७३ ॥
प्रसिद्धिरात्मनोऽस्त्येव न कस्यापि च दृश्यते ।
प्रत्ययो नाहमस्मीति न ह्यस्ति प्रत्यगात्मनि ॥ ४७४ ॥
न कस्यापि स्वसद्भावे प्रमाणमभिकांक्ष्यते ।
प्रमाणानां च प्रामाण्यं यन्मूलं किं तु बोधयेत् ॥ ४७५ ॥
मायाकार्यैस्तिरोभूतो नैष आत्मानुभूयते ।
मेघवृंदैर्यथा भानुस्तथायमहमादिभिः ॥ ४७६ ॥
पुरस्थ एव विषये वस्तुन्यध्यस्यतामिति ।
नियमो न कृतः सद्भिर्भ्रान्तिरेवात्र कारणम् ॥ ४७७ ॥
दृगाद्यविषये व्योम्नि नीलतादि यथाऽबुधाः ।
अध्यस्यन्ति तथैवास्मिन्नात्मन्यपि मतिभ्रमात् ॥ ४७८ ॥
अनात्मन्यात्मताध्यासे न सादृश्यमपेक्षते ।
पीतोऽयं शंख इत्यादौ सादृश्यं किमपेक्षितम् ॥ ४७९ ॥
निरुपाधिभ्रमेष्वस्मिन्नैवापेक्षा प्रदृश्यते ।
सोपाधिष्वेव तद्दृष्टं रज्जुसर्पभ्रमादिषु ॥ ४८० ॥
तथापि किंचिद्वक्ष्यामि सादृश्यं शृणु तत्परः ।
अत्यंतनिर्मलः सूक्ष्म आत्मायमतिभास्वरः ॥ ४८१ ॥
बुद्धिस्तथैव सत्त्वात्मा साभासा भास्वराऽमला ।
सांनिध्यादात्मवद्भाति सूर्यवत्स्फटिको यथा ॥ ४८२ ॥
आत्माभासं ततो बुद्धिर्बुद्ध्याभासं ततो मनः ।
अक्षाणि मनआभासान्यक्षाभासमिदं वपुः ॥४८३॥

अत एवात्मबुद्धिर्देहाक्षादावनात्मनि ।
मूढानां प्रतिबिंबादौ बालानामिव दृश्यते ।
सादृश्यं विद्यते बुद्धावात्मनोऽध्यासकारणम् ॥ ४८४ ॥
अनात्मन्यहमित्येव योऽयमध्यास ईरितः ।
स्यादुत्तरोत्तराध्यासे पूर्वपूर्वस्तु कारणम् ॥ ४८५ ॥
सुप्तिमूर्छोत्थितेष्वेव दृष्टः संसारलक्षणः ।
अनादिरेषाविद्यातः संस्कारोऽपि च तादृशः ॥ ४८६ ॥
अध्यासबाधागमनस्य कारणं शृणु प्रवक्ष्यामि समाहितात्मा ।
यस्मादिदं प्राप्तमनर्थजातं जन्माप्ययव्याधिजरादिदुःखम् ॥ ४८७
आत्मोपाधेरविद्याया अस्ति शक्तिद्वयं महत् ।
विक्षेप आवृतिश्चेति याभ्यां संसार आत्मनः ॥ ४८८ ॥
आवृतिस्तमसः शक्तिस्तद्ध्यावरणकारणम् ।
मूलाविद्येति सा प्रोक्ता यया संमोहितं जगत् ॥ ४८९ ॥
विवेकवानप्यतियौक्तिकोऽपि श्रुतात्मतत्त्वोऽपि च पंडितोऽपि ।
शक्त्या यथा संवृतबोधदृष्टिरात्मानमात्मस्थमिमं न वेद ॥ ४९० ॥
विक्षेपनाम्नी रजसस्तु शक्तिः प्रवृत्तिहेतुः पुरुषस्य नित्यम् ।
स्थूलादिलिंगान्तमशेषमेतद्यया सदात्मन्यसदेव सूयते ॥ ४९१ ॥
निद्रा यथा पुरुषमप्रमत्तं समावृणोतीयमपि प्रतीचम् ।
तथावृणोत्यावृतिशक्तिरंतर्विक्षेपशक्तिं परिजृंभयन्ती ॥ ४९२ ॥
शक्त्या महत्यावरणाभिधानया समावृते सत्यमलस्वरूपे ।
पुमाननात्मन्यहमेष एवेत्यात्मत्वबुद्धिं विदधाति मोहात् ॥ ४९३ ॥
यथा प्रसुप्तिप्रतिभासदेहे स्वात्मत्वधीरेष तथा ह्यनात्मनः ।
जन्माप्ययक्षुद्भयतृट्श्रमादीनारोपयत्यात्मनि तस्य धर्मान् ॥ ४९४
विक्षेपशक्त्या परिचोद्यमानः करोति कर्माण्युभयात्मकानि ।
भुंजान एतत्फलमप्युपात्तं परिभ्रमत्येव भवांबुराशौ ॥ ४९५ ॥

अध्यासदोषात्समुपागतोऽयं संसारबंधः प्रबलप्रतीचः ।
यद्योगतः क्लिश्यति गर्भवासजन्माप्ययक्लेशभयैरजस्त्रम् ॥४९६॥
अध्यासो नाम खल्वेष वस्तुनो योऽन्यथाग्रहः ।
स्वाभाविकभ्रान्तिमूलं संसृतेरादिकारणम् ॥ ४९७ ॥
सर्वानर्थस्य तद्बीजं योऽन्यथाग्रह आत्मनः ।
ततः संसारसंपातः संततक्लेशलक्षणः ॥ ४९८ ॥
अध्यासादेव संसारो नष्टेऽध्यासे न दृश्यते ।
तदेतदुभयं स्पष्टं पश्य त्वं बद्धमुक्तयोः ॥ ४९९ ॥
बद्धं प्रवृत्तितो विद्धि मुक्तं विद्धि निवृत्तितः ।
प्रवृत्तिरेव संसारो निवृत्तिर्मुक्तिरिष्यते ॥ ५०० ॥
आत्मनः सोऽयमध्यासो मिथ्याज्ञानपुरःसरः ।
असत्कल्पोऽपि संसारं तनुते रज्जुसर्पवत् ॥ ५०१ ॥
उपाधियोगसाम्येऽपि जीववत्परमात्मनः ।
उपाधिभेदान्नो बंधस्तत्कार्यमपि किंचन ॥ ५०२ ॥
अस्योपाधिः शुद्धसत्त्वप्रधाना माया यत्र त्वस्य नास्त्यल्पभावः ।
सत्त्वस्यैवोत्कृष्टता तेन बंधो नो विक्षेपरतत्कृतो लेशमात्रः ॥५०३
सर्वज्ञोऽप्रतिबद्धबोधविभवस्तेनैव देवः स्वयं
मायां स्वामवलंब्य निश्चलतया स्वच्छंदवृत्तिः प्रभुः ।
सृष्टिस्थित्यदनप्रवेशयमनव्यापारमात्रेच्छया
कुर्वन्क्रीडति तद्रजस्तम उभे संस्तभ्य शक्त्या स्वया ॥५०४॥
तस्मादावृतिविक्षेपौ किंचित्कर्तुं न शक्नुतः ।
स्वयमेव स्वतंत्रोऽसौ तत्प्रवृत्तिनिरोधयोः ॥ ५०५ ॥
तमेव सा धीकर्मेति श्रुतिर्वक्ति महेशितुः ।
निग्रहानुग्रहे शक्तिरावृतिक्षेपयोर्यतः ॥ ५०६ ॥
राजसस्तमसश्चैव प्राबल्यं सत्त्वहानतः ।

जीवोपाधौ तथा जीवे तत्कार्यं बलवत्तरम् ॥ ५०७ ॥
तेन बंधोऽस्य जीवस्य संसारोऽपि च तत्कृतः ।
संप्राप्तः सर्वदा यत्र दुःखं भूयः स ईक्षते ॥ ५०८ ॥
एतस्य संसृतेर्हेतुरध्यासोऽर्थविपर्ययः ।
अध्यासमूलमज्ञानमाहुरावृतिलक्षणम् ॥ ५०९ ॥
अज्ञानस्य निवृत्तिस्तु ज्ञानेनैव न कर्मणा ।
अविरोधितया कर्म नैवाज्ञानस्य बाधकम् ॥ ५१० ॥
कर्मणा जायते जंतुः कर्मणैव प्रलीयते ।
कर्मणः कार्यमेवैषा जन्ममृत्युपरंपरा ॥ ५११ ॥
नैतस्मात्कर्मणः कार्यमन्यदास्ति विलक्षणम् ।
अज्ञानकार्यं तत्कर्म यतोऽज्ञानेन वर्धते ॥ ५१२ ॥
यद्येन वर्धते तेन नाशस्तस्य न सिध्यति ।
येन यस्य सहावस्था निरोधाय न कल्पते ॥ ५१३ ॥
नाशकत्वं तदुभयोः को नु कल्पयितुं क्षमः ।
सर्वं कर्माविरोध्येत्र सदाऽज्ञानस्य सर्वदा ॥ ५१४ ॥
ततोऽज्ञानस्य विच्छित्तिः कर्मणा नैव सिध्यति ।
यस्य प्रध्वस्तजनको यत्संयोगोऽस्ति तत्क्षणे ॥ ५१५ ॥
तयोरेव विरोधित्वं युक्तं भिन्नस्वभावयोः ।
तमःप्रकाशयोर्यद्वत्परस्परविरोधिता ॥ ५१६ ॥
अज्ञानज्ञानयोस्तद्वदुभयोरेव दृश्यते ।
न ज्ञानेन विना नाशस्तस्य केनापि सिध्यति ॥ ५१७ ॥
तस्मादज्ञानविच्छित्त्यै ज्ञानं संपादयेत्सुधीः ।
आत्मानात्मविवेकेन ज्ञानं सिध्यति नान्यथा ॥ ५१८ ॥
युक्त्याऽऽत्मानात्मनोस्तस्मात्करणीयं विवेचनम् ।
अनात्मन्यात्मताबुद्धिग्रंथिर्येन विदीर्यते ॥ ५१९ ॥

आत्मानात्मविवेकार्थं विवादोऽयं निरूप्यते ।
येनात्मानात्मनोस्तत्त्वं विविक्तं प्रस्फुटायते ॥ ५२० ॥
मूढा अश्रुतवेदान्ताः स्वयं पंडितमानिनः ।
ईशप्रसादरहिताः सद्गुरोश्च बहिर्मुखाः ॥ ५२१ ॥
विवदन्ति प्रकारं तं शृणु वक्ष्यामि सादरम् ।
अत्यंतपामरः कश्चित्पुत्र आत्मेति मन्यते ॥ ५२२ ॥
आत्मनीव स्वपुत्रेऽपि प्रबलप्रीतिदर्शनात् ।
पुत्रे तु पुष्टे पुष्टोऽहं नष्टे नष्टोऽहमित्यतः ॥ ५२३ ॥
अनुभूतिबलाच्चापि युक्तितोऽपि श्रुतेरपि ।
आत्मा वै पुत्रनामासीत्येवं च वदति श्रुतिः ॥ ५२४ ॥
दीपाद्दीपो यथा तद्वत्पितुः पुत्रः प्रजायते ।
पितुर्गुणानां तनये बीजांकुरवदीक्षणात् ॥ ५२५ ॥
अतोऽयं पुत्र आत्मेति मन्यते भ्रांतिमत्तमः ।
तन्मतं दूषयत्यन्यः पुत्र आत्मा कथं त्विति ॥ ५२६ ॥
प्रीतिमात्रात्कथं पुत्र आत्मा भवितुमर्हति ।
अन्यत्रापीक्ष्यते प्रीतिः क्षेत्रपात्रधनादिषु ॥ ५२७ ॥
पुत्राद्विशिष्टा देहेऽस्मिन्प्राणिनां प्रीतिरिष्यते ।
प्रदीप्ते भवने पुत्रं त्यक्त्वा जंतुः पलायते ॥ ५२८ ॥
तं विक्रीणाति देहार्थं प्रतिकूलं निहन्ति च ।
तस्मादात्मा तु तनयो न भवेच्च कदाचन ॥ ५२९ ॥
गुणरूपादिसादृश्यं दीपवन्न सुते पितुः ।
अव्यंगाज्जायते व्यंगः सगुणादपि दुर्गुणः ॥ ५३० ॥
आभासमात्रास्ताः सर्वा युक्तयोऽप्युक्तयोऽपि च ।
पुत्रस्य पितृवद्देहे सर्वकार्येषु वस्तुषु ॥ ५३१ ॥
स्वामित्वद्योतनायास्मिन्नात्मत्वमुपचर्यते ।

श्रुत्या तु मुख्यया वृत्त्या पुत्र आत्मेति नोच्यते ॥५३२॥
औपचारिकमात्मत्वं पुत्रे तस्मान्न मुख्यतः ।
अहंपदप्रत्ययार्थो देह एव न चेतरः ॥ ५३३ ॥
प्रत्यक्षः सर्वजंतूनां देहोऽहमिति निश्चयः ।
एष पुरुषोऽन्नरसमय इत्यपि च श्रुतिः ॥ ५३४ ॥
पुरुषत्वं वदत्यस्य स्वात्मा हि पुरुषस्ततः ।
आत्मायं देह एवेति चार्वाकेण विनिश्चितम् ॥ ५३५ ॥
तन्मतं दूषयत्यन्योऽसहमानः पृथग्जनः ।
देह आत्मा कथं नु स्यात्परतंत्रो ह्यचेतनः ॥ ५३६ ॥
इंद्रियैश्चाल्यमानोऽयं चेष्टते न स्वतः क्वचित् ।
आश्रयश्चक्षुरादीनां गृहवद्गृहमेधिनाम् ॥ ५३७ ॥
बाल्यादिनानावस्थावाञ्शुक्लशोणितसंभवः ।
अतः कदापि देहस्य नात्मत्वमुपपद्यते ॥ ५३८ ॥
बधिरोऽहं च काणोऽहं मूक इत्यनुभूतितः ।
इंद्रियाणि भवन्त्यात्मा येषामस्त्यर्थवेदनम् ॥ ५३९ ॥
इंद्रियाणां चेतनत्वं देहे प्राणाः प्रजापतिम् ।
एतमेत्येत्यूचुरिति श्रुत्यैव प्रतिपाद्यते ॥ ५४० ॥
यतस्तस्मादिंद्रियाणां युक्तमात्मत्वमित्यमुम् ।
निश्चयं दूषयत्यन्योऽसहमानः पृथग्जनः ॥ ५४१ ॥
इंद्रियाणि कथं त्वात्मा करणानि कुठारवत् ।
करणस्य कुठारादेश्चेतनत्वं न हीक्ष्यते ॥ ५४२ ॥
श्रुत्याधिदेवतामेव इंद्रियेषूपचर्यते ।
न तु साक्षादिंद्रियाणां चेतनत्वमुदीर्यते ॥ ५४३ ॥
अचेतनस्य दीपादेरर्थाभासकता यथा ।
तथैव चक्षुरादीनां जडानामपि सिध्यति ॥ ५४४ ॥

इंद्रियाणां चेष्टयिता प्राणोऽयं पंचवृत्तिकः ।
सर्वावस्थास्ववस्थावान्सोऽयमात्मत्वमर्हति !
अहं क्षुधावांस्तृष्णावानित्याद्यनुभवादपि ॥ ५४५ ॥
श्रुत्यान्योऽतर आत्मा प्राणमय इतीर्यते यस्मात् ।
तस्मात्प्राणस्यात्मत्वं युक्तं नो करणसंज्ञानां क्वापि ॥ ५४६ ॥
इति निश्चयमेतस्य दूषयत्यपरो जडः ।
भवत्यात्मा कथं प्राणो वायुरेवैष आंतरः ॥ ५४७ ॥
बहिर्यात्यन्तरायाति भस्त्रिकावायुवन्मुहुः ।
न हितं वाहितं वा स्वमन्यद्वा वेद किंचन ॥ ५४८ ॥
जडस्वभावश्चपलः कर्मयुक्तश्च सर्वदा ।
प्राणस्य भानं मनसि स्थिते सुप्ते न दृश्यते ॥ ५४९ ॥
मनस्तु सर्वं जानाति सर्ववेदनकारणम् ।
यत्तस्मान्मन एवात्मा प्राणस्तु न कदाचन ॥ ५५० ॥
संकल्पवानहं चिंतावानहं च विकल्पवान् ।
इत्याद्यनुभवादन्योऽन्तर आत्मा मनोमयः ॥ ५५१ ॥
इत्यादिश्रुतिसद्भावाद्युक्ता मनस आत्मता ।
इति निश्चयमेतस्य दूषयत्यपरो जडः ॥ ५५२ ॥
कथं मनस आत्मत्वं करणस्य दृगादिवत् ।
कर्तृप्रयोज्यं करणं न स्वयं तु प्रवर्तते ॥ ५५३ ॥
करणप्रयोक्ता यः कर्ता तस्यैवात्मत्वमर्हति ।
आत्मा स्वतंत्रः पुरुषो न प्रयोज्यः कदाचन ॥ ५५४ ॥
अहं कर्तास्म्यहं भोक्ता सुखीत्यनुभवादपि ।
बुद्धिरात्मा भवत्येव बुद्धिधर्मो ह्यहंकृतिः ॥ ५५५ ॥
अन्योऽतर आत्मा विज्ञानमय इति वदति निगमः ।
मनसोऽपि च भिन्नं विज्ञानमयं कर्तृरूपमात्मानम् ॥ ५५६ ॥

विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च ।
इत्यस्य कर्तृता श्रुत्या मुखतः प्रतिपाद्यते ।
तस्माद्युक्तात्मता बुद्धेरिति बौद्धेन निश्चितम् ॥ ५५७ ॥
प्राभाकरस्तार्किकश्च तावुभावप्यमर्षया ।
तन्निश्चयं दूषयतो बुद्धिरात्मा कथं न्विति ॥ ५५८ ॥
बुद्धेरज्ञानकार्यत्वाद्विनाशित्वात्प्रतिक्षणम् ।
बुद्ध्यादीनां च सर्वेषामज्ञाने लयदर्शनात् ॥ ५५९ ॥
अज्ञोऽहमित्यनुभवादास्त्रीबालादिगोचरात् ।
भवत्यज्ञानमेवात्मा न तु बुद्धिः कदाचन ॥ ५६० ॥
विज्ञानमयादन्यं त्वानंदमयं परं तथात्मानम् ।
अन्योऽतर आत्माऽऽनंदमय इति वदति वेदोऽपि ॥ ५६१ ॥
दुःखप्रत्ययशून्यत्वादानंदमयता मता ।
अज्ञाने सकलं सुप्तौ बुद्ध्यादि प्रविलीयते ॥ ५६२ ॥
दुःखिनोऽपि सुषुप्तौ त्वानंदमयता ततः ।
सुप्तौ किंचिन्न जानामीत्यनुभूतिश्च दृश्यते ॥ ५६३ ॥
यत एवमतो युक्ता ह्यज्ञानस्यात्मता ध्रुवम् ।
इति तन्निश्चयं भाट्टा दूषयन्ति स्वयुक्तिभिः ॥ ५६४ ॥
कथमज्ञानमेवात्मा ज्ञानं चाप्युपलभ्यते ।
ज्ञानाभावे कथं विद्युरज्ञोऽहमिति चाज्ञताम् ।
अस्वाप्सं सुखमेवाहं न जानाम्यत्र किंचन ॥ ५६५ ॥
इत्यज्ञानमपि ज्ञानं प्रबुद्धेषु प्रदृश्यते ।
प्रज्ञानघन एवानंदमय इत्यपि श्रुतिः ॥ ५६६ ॥
प्रब्रवीत्युभयात्मत्वमात्मनः स्वयमेव सा ।
आत्मातश्चिज्जडतनुः खद्योत इव संमतः ॥ ५६७ ॥
न केवलाज्ञानमयो घटकुड्यादिवज्जडः ।

इति निश्चयमेतेषां दूषयत्यपरो जडः ॥ ५६८ ॥
ज्ञानाज्ञानमयस्त्वात्मा कथं भवितुमर्हति ।
परस्परविरुद्धत्वात्तेजस्तिमिरवत्तयोः ॥ ५६९ ॥
सामानाधिकरण्यं वा संयोगो वा समाश्रयः ।
तमःप्रकाशवज्ज्ञानाज्ञानयोर्न हि सिध्यति ॥ ५७० ॥
अज्ञानमपि विज्ञानं बुद्धिर्वापि च तद्गुणाः ।
सुषुप्तौ नोपलभ्यन्ते यत्किंचिदपि वापरम् ॥ ५७१ ॥
मात्रादिलक्षणं किं नु शून्यमेवोपलभ्यते ।
सुषुप्तौ नान्यदस्त्येव नाहमप्यासमित्यनु ॥ ५७२ ॥
सुप्तोत्थितजनैः सर्वैः शून्यमेवानुस्मर्यते ।
यत्ततः शून्यमेवात्मा न ज्ञानाज्ञानलक्षणः ॥ ५७३ ॥
वेदेनाप्यसदेवेदमग्र आसीदिति स्फुटम् ।
निरुच्यते यतस्तस्माच्छून्यस्यैवात्मता मता ॥ ५७४ ॥
असन्नेव घटः पूर्वं जायमानः प्रदृश्यते ।
न हि कुंभः पुरैवांतः स्थित्वोदेति बहिर्मुखः ॥ ५७५ ॥
यत्तस्मादसतः सर्वं सदिदं समजायत ।
ततः सर्वात्मना शून्यस्यैवात्मत्वं समर्हति ॥ ५७६ ॥
इत्येवं पंडितंमन्यैः परस्परविरोधिभिः ।
तत्तन्मतानुरूपाल्पश्रुतियुक्त्यनुभूतिभिः ॥ ५७७ ॥
निर्णीतमतजातानि खंडितान्येव पंडितैः ।
श्रुतिभिश्चाप्यनुभवैर्बाधकैः प्रतिवादिनाम् ॥ ५७८ ॥
यतस्तस्मात्तु पुत्रादेः शून्यान्तस्य विशेषतः ।
सुसाधितमनात्मत्वं श्रुतियुक्त्यनुभूतिभिः ॥ ५७९ ॥
न हि प्रमाणांतरबाधितस्य याथार्थ्यमंगीक्रियते महद्भिः ।
पुत्रादिशून्यान्तमनात्मतत्त्वमित्येव विस्पष्टमतः सुजातम् ॥ ५८० ॥

शिष्यः—

सुषुप्तिकाले सकले विलीने शून्यं विना नान्यदिहोपलभ्यते ।
शून्यं त्वनात्मा न ततः परः कोऽप्यात्माभिधानस्त्वनुभूयतेऽर्थः ॥५८१॥
यद्यस्ति चात्मा किमु नोपलभ्यते सुप्तौ यथा तिष्ठति किं प्रमाणम् ।
किंलक्षणोऽसौ स कथं न बाध्यते प्रबाध्यमानेष्वहमादिषु स्वयम्॥५८२

एतत्संशयजातं मे हृदयग्रंथिलक्षणम् ।
छिंद्धि युक्तिमहाखड्गधारया कृपया गुरो ॥ ५८३ ॥

श्रीगुरुः—

अतिसूक्ष्मतरः प्रश्नस्तवायं सदृशो मतः ।
सूक्ष्मार्थदर्शनं सूक्ष्मबुद्धिष्वेव प्रदृश्यते ॥ ५८४ ॥
शृणु वक्ष्यामि सकलं यद्यत्पृष्टं त्वयाधुना ।
रहस्यं परमं सूक्ष्मं ज्ञातव्यं च मुमुक्षुभिः ॥ ५८५ ॥
बुद्ध्यादि सकलं सुप्तावनुलीनं स्वकारणे ।
अव्यक्ते वटवद्बीजे तिष्ठत्यविकृतात्मना ॥ ५८६ ॥
तिष्ठत्येव स्वरूपेण न तु शून्यायते जगत् ।
क्वचिदंकुररूपेण क्वचिद्बीजात्मना वटः ।
कार्यकारणरूपेण यथा तिष्ठत्यदस्तथा ॥ ५८७ ॥
अव्याकृतात्मनावस्थां जगतो वदति श्रुतिः ।
सुषुप्त्यादिषु तद्वेदं तर्ह्यव्याकृतमित्यसौ ॥ ५८८ ॥
इममर्थमविज्ञाय निर्णीतं श्रुतियुक्तिभिः ।
जगतो दर्शनं शून्यमिति प्राहुरतद्विदः ॥ ५८९ ॥
नासतः सत उत्पत्तिः श्रूयते न च दृश्यते ।
उदेति नरशृंगात्किं खपुष्पात्किं भविष्यति ॥ ५९० ॥
प्रभवति न हि कुंभोऽविद्यमानो मृदश्चे-
त्प्रभवतु सिकताया वाथवा वारिणो वा ।

न हि भवति च ताभ्यां सर्वथा कापि तस्मा-
द्यत उदयति योऽर्थोऽस्त्यत्र तस्य स्वभावः ॥ ५९१ ॥
अन्यथा विपरीतं स्यात्कार्यकारणलक्षणम् ।
नियतं सर्वशास्त्रेषु सर्वलोकेषु सर्वतः ॥ ५९२ ॥
कथमसतः सज्जायेतेति श्रुत्या निषिध्यते तस्मात् ।
असतः सज्जननं नो घटते मिथ्यैव शून्यशब्दार्थः ॥५९३॥
अव्यक्तशब्दिते प्राज्ञे सत्यात्मन्यत्र जाग्रति ।
कथं सिध्यति शून्यत्वं तस्य भ्रान्तशिरोमणे ॥ ५९४ ॥
सुषुप्तौ शून्यमेवेति केन पुंसा तवेरितम् ।
हेतुनानुमितं केन कथं ज्ञानं त्वयोच्यताम् ॥ ५९५ ॥
इति पृष्टो मूढतमो वदिष्यति किमुत्तरम् ।
नैवानुरूपकं लिंगं वक्ता वा नास्ति कश्चन ।
सुषुप्तिस्थितशून्यस्य बोद्धा को न्वात्मनः परः ॥ ५९६ ॥
स्वेनानुभूतं स्वयमेव वक्ति स्वसुप्तिकाले स्थितशून्यभावम् ।
तत्र स्वसत्तामनवेक्ष्य मूढः स्वस्यापि शून्यत्वमयं ब्रवीति ॥ ५९७ ॥
अवेद्यमानः स्वयमन्यलोकैः सौषुप्तिकं धर्ममवैति साक्षात् ।
बुद्ध्याद्यभावस्य च योऽत्र बोद्धा स एष आत्मा खलु निर्विकारः ॥
यस्येदं सकलं विभाति महसा तस्य स्वयंज्योतिषः
सूर्यस्येव किमस्ति भासकमिह प्रज्ञादि सर्वं जडम् ।
न ह्यर्कस्य विभासकं क्षितितले दृष्टं तथैवात्मनो
नान्यः कोऽप्यनुभासकोऽनुभविता नातः परः कश्चन ॥५९९॥
येनानुभूयते सर्वं जाग्रत्स्वप्नसुषुप्तिषु ।
विज्ञातारमिमं को नु कथं वेदितुमर्हति ॥ ६०० ॥
सर्वस्य दाहको वह्निर्वह्नेर्नान्योऽस्ति दाहकः ।
यथा तथात्मनो ज्ञातुर्ज्ञाता कोऽपि न दृश्यते ॥ ६०१ ॥

उपलभ्येत केनायं ह्युपलब्धा स्वयं ततः ।
उपलब्ध्यंतराभावान्नायमात्मोपलभ्यते ॥ ६०२ ॥
बुद्ध्यादिवेद्यविलयादयमेक एव
सुप्तौ न पश्यति शृणोति न वेत्ति किंचित् ।
सौषुप्तिकस्य तमसः स्वयमेव साक्षी
भूत्वात्र तिष्ठति सुखेन च निर्विकल्पः ॥ ६०३ ॥
सुषुप्तावात्मसद्भावे प्रमाणं पंडितोत्तमाः ।
विदुः स्वप्रत्यभिज्ञानमाबालवृद्धसंमतम् ॥ ६०४ ॥
प्रत्यभिज्ञायमानत्वाल्लिंगमात्रानुमापकम् ।
स्मर्यमाणस्य सद्भावः सुखमस्वाप्सामित्ययम् ॥ ६०५ ॥
पुरानुभूतो नो चेत्तु स्मृतेरनुदयो भवेत् ।
इत्यादितर्कयुक्तिश्च सद्भावे मानमात्मनः ॥ ६०६ ॥
यत्रात्मनोऽकामयितृत्वबुद्धिः स्वप्नानपेक्षापि च तत्सुषुप्तम् ।
इत्यात्मसद्भाव उदीर्यतेऽत्र श्रुत्यापि तस्माच्छ्रुतिरत्र मानम् ॥ ६०७ ॥
अकामयितृता स्वप्नादर्शनं घटते कथम् ।
अविद्यमानस्य तत आत्मास्तित्वं प्रतीयते ॥ ६०८ ॥
एतैः प्रमाणैरस्तीति ज्ञातः साक्षितया बुधैः ।
आत्मायं केवलः शुद्धः सच्चिदानंदलक्षणः ॥ ६०९ ॥
सत्त्वचित्त्वानंदतादिलक्षणं प्रत्यगात्मनः ।
कालत्रयेऽप्यबाध्यत्वं सत्यं नित्यस्वरूपतः ॥ ६१० ॥
शुद्धचैतन्यरूपत्वं चित्त्वं ज्ञानस्वरूपतः ।
अखंडसुखरूपत्वादानंदत्वमितीर्यते ॥ ६११ ॥
अनुस्यूतात्मनः सत्ता जाग्रत्स्वप्नसुषुप्तिषु ।
अहमस्मीत्यतो नित्यो भवत्यात्मायमव्ययः ॥ ६१२ ॥
सर्वदाप्यासमित्येवाभिन्नप्रत्यय ईक्ष्यते ।

कदापि नासमित्यस्मादात्मनो नित्यता मता ।। ६१३ ।।

आयातासु गतासु शैशवमुखावस्थासु जाग्रन्मुखा-
स्वन्यास्वप्यखिलासु वृत्तिषु धियो दुष्टास्वदुष्टास्वपि ।
गंगाभंगपरंपरासु जलवत्सत्तानुवृत्तात्मन-
स्तिष्ठत्येव सदा स्थिराहमहमित्येकात्मता साक्षिणः ।। ६१४ ।।

प्रतिपदमहमादयो विभिन्नाः
क्षणपरिणामितया विकारिणस्ते ।
न परिणतिरमुष्य निष्कलत्वा-
दयमविकार्यत एव नित्य आत्मा ।। ६१५ ।।

यः स्वप्नमद्राक्षमहं सुखं यो-
ऽस्वाप्सं स एवास्म्यथ जागरूकः ।
इत्येवमच्छिन्नतयानुभूयते
सत्तात्मनो नास्ति हि संशयोऽत्र ।। ६१६ ।।

श्रुत्युक्ताः षोडशकलाश्चिदाभासस्य नात्मनः ।
निष्कलत्वान्नास्य लयस्तस्मान्नित्यत्वमात्मनः ।। ६१७ ।।

जडप्रकाशकः सूर्यः प्रकाशात्मैव नो जडः ।
बुद्ध्यादिभासकस्तस्माच्चित्स्वरूपस्तथा मतः ।। ६१८ ।।

कुड्यादेस्तु जडस्य नैव घटते भानं स्वतः सर्वदा
सूर्यादिप्रभया विना क्वचिदपि प्रत्यक्षमेतत्तथा ।
बुद्ध्यादेरपि न स्वतोऽस्त्यणुरपि स्फूर्तिर्विनैवात्मना
सोऽयं केवलचिन्मयश्रुतिमतो भानुर्यथा रुङ्मयः ।। ६१९ ।।

स्वभासने वान्यपदार्थभासने नार्कः प्रकाशांतरमीप्सदिच्छति ।
स्वबोधने वाप्यहमादिबोधने तथैव चिद्धातुरयं परात्मा ।। ६२० ।।

अन्यप्रकाशं न किमप्यपेक्ष्य यतोऽयमाभाति निजात्मनैव ।
ततः स्वयंज्योतिरयं चिदात्मा न ह्यात्मभाने परदीप्त्यपेक्षा ।। ६२१ ।।

यं न प्रकाशयति किंचिदिनोऽपि चंद्रः
नो विद्युतः किमुत वह्निरयं मिताभः ।
यं भान्तमेतमनुभाति जगत्समस्तं
सोऽयं स्वयं स्फुरति सर्वदशासु चात्मा ।। ६२२ ।।

आत्मनः सुखरूपत्वादानंदत्वं स्वलक्षणम् ।
परप्रेमास्पदत्वेन सुखरूपत्वमात्मनः ॥ ६२३ ॥

सुखहेतुषु सर्वेषां प्रीतिः सावधिरीक्ष्यते ।
कदापि नावधिः प्रीतेः स्वात्मनि प्राणिनां क्वचित् ॥ ६२४ ॥

क्षीणेंद्रियस्य जीर्णस्य संप्राप्तोत्क्रमणस्य वा ।
अस्ति जीवितुमेवाशा स्वात्मा प्रियतमो यतः ॥ ६२५ ॥

आत्मातः परमप्रेमास्पदः सर्वशरीरिणाम् ।
यस्य शेषतया सर्वमुपादेयत्वमृच्छति ॥ ६२६ ॥

एष एव प्रियतमः पुत्रादपि धनादपि ।
अन्यस्मादपि सर्वस्मादात्मायं परमान्तरः ॥ ६२७ ॥

प्रियत्वेन मतं यत्तु तत्सदा नाप्रियं नृणाम् ।
विपत्तावपि संपत्तौ यथात्मा न तथापरः ॥ ६२८ ॥

आत्मा खलु प्रियतमोऽसुभृतां यदर्था
भार्यात्मजाप्तगृहवित्तसुखाः पदार्थाः ।
वाणिज्यकर्षणगवावनराजसेवा-
भैषज्यकप्रभृतयो विविधाः क्रियाश्च ॥ ६२९ ॥

प्रवृत्तिश्च निवृत्तिश्च यच्च यावच्च चेष्टितम् ।
आत्मार्थमेव नान्यार्थं नातः प्रियतमः परः ॥ ६३० ॥

तस्मादात्मा केवलानंदरूपो यः सर्वस्माद्वस्तुनः प्रेष्ठ उक्तः ।
यो वा अस्मान्मन्यतेऽन्यं प्रियं यं सोऽयं तस्माच्छोकमेवानुभुंक्ते ॥६३१॥

शिष्यः—

अपरः क्रियते प्रश्नो मयायं क्षम्यतां प्रभो ।
अज्ञवागपराधाय कल्पते न महात्मनाम् ॥ ६३२ ॥
आत्मान्यः सुखमन्यच्च नात्मनः सुखरूपता ।
आत्मनः सुखमाशास्यं यतते सकलो जनः ॥ ६३३ ॥
आत्मनः सुखरूपत्वे प्रयत्नः किमु देहिनाम् ।
एष मे संशयः स्वामिन् कृपयैव निरस्यताम् ॥ ६३४ ॥

श्रीगुरुः—

आनंदरूपमात्मानमज्ञात्वैव पृथग्जनः ।
बहिःसुखाय यतते न तु कश्चिद्विदन्बुधः ॥ ६३५ ॥
अज्ञात्वैव हि निक्षेपं भिक्षामटति दुर्मतिः ।
स्ववेश्मनि निधिं ज्ञात्वा को नु भिक्षामटेत्सुधीः ॥ ६३६ ॥

स्थूलं च सूक्ष्मं च वपुः स्वभावतो
दुःखात्मकं स्वात्मतया गृहीत्वा ।
विस्मृत्य च स्वं सुखरूपमात्मनः
दुःखप्रदेभ्यः सुखमज्ञ इच्छति ॥ ६३७ ॥

न हि दुःखप्रदं वस्तु सुखं दातुं समर्हति ।
किं विषं पिबतो जंतोरमृतत्वं प्रयच्छति ॥ ६३८ ॥
आत्मान्यः सुखमन्यच्चेत्येवं निश्चित्य पामरः ।
बहिःसुखाय यतते सत्यमेव न संशयः ॥ ६३९ ॥
इष्टस्य वस्तुनो ध्यानदर्शनाद्युपभुक्तिषु ।
प्रतीयते य आनंदः सर्वेषामिह देहिनाम् ॥ ६४० ॥
स वस्तुधर्मो नो यस्मान्मनस्येवोपलभ्यते ।
वस्तुधर्मस्य मनसि कथं स्यादुपलंभनम् ॥ ६४१ ॥
अन्यत्र त्वन्यधर्माणामुपलंभो न दृश्यते ।

तस्मान्न वस्तुधर्मोऽयमानंदस्तु कदाचन ॥ ६४२ ॥
नाप्येष धर्मो मनसोऽसत्यर्थे तददर्शनात् ।
असति व्यंजके व्यंग्यं नोदेतीति न मन्यताम् ॥ ६४३ ॥
सत्यर्थेऽपि च नोदेति ह्यानंदस्तूक्तलक्षणः ।
सत्यपि व्यंजके व्यंग्यानुदयो नैव संमतः ॥ ६४४ ॥
दुरदृष्टादिकं नात्र प्रतिबंधः प्रकल्प्यताम् ।
प्रियस्य वस्तुनो लाभे दुरदृष्टं न सिध्यति ॥ ६४५ ॥
तस्मान्न मानसो धर्मो निर्गुणत्वान्न चात्मनः ।
किं तु पुण्यस्य सांनिध्यादिष्टस्यापि च वस्तुनः ॥ ६४६ ॥
सत्त्वप्रधाने चित्तेऽस्मिंस्त्वात्मैव प्रतिबिंबति ।
आनंदलक्षणः स्वच्छे पयसीव सुधाकरः ॥ ६४७ ॥
सोऽयमाभास आनंदश्चित्ते यः प्रतिबिंबितः ।
पुण्योत्कर्षापकर्षाभ्यां भवत्युच्चावचः स्वयम् ॥ ६४८ ॥
सार्वभौमादिब्रह्मान्तं श्रुत्या यः प्रतिपादितः ।
स क्षयिष्णुः सातिशयः प्रक्षीणे कारणे लयम् ॥ ६४९ ॥
यात्येष विषयानंदो यस्तु पुण्यैकसाधनः ।
ये तु वैषयिकानंदं भुंजते पुण्यकारिणः ॥ ६५० ॥
दुःखं च भोगकालेऽपि तेषामंते महत्तरम् ।
सुखं विषयसंपृक्तं विषसंपृक्तभक्तवत् ॥ ६५१ ॥
भोगकालेऽपि भोगान्ते दुःखमेव प्रयच्छति ।
सुखमुच्चावचत्वेन क्षयिष्णुत्वभयेन च ॥ ६५२ ॥
भोगकाले भवेन्नृणां ब्रह्मादिपदभाजिनाम् ।
राजस्थानप्रतिष्ठानां तारतम्यं मतं यथा ॥ ६५३ ॥
तथैव दुःखं जंतूनां ब्रह्मादिपदभाजिनाम् ।
न कांक्षणीयं विदुषा तस्माद्वैषयिकं सुखम् ॥ ६५४ ॥

यो बिंबभूत आनंदः स आत्मानंदलक्षणः ।
शाश्वतो निर्द्वयः पूर्णो नित्य एकोऽपि निर्भयः ६५५ ॥
लक्ष्यते प्रतिबिंबेनाभासानंदेन बिंबवत् ।
प्रतिबिंबो बिंबमूलो विना बिंबं न सिध्यति ॥ ६५६ ॥
यत्ततो बिंब आनंदः प्रतिबिंबेन लक्ष्यते ।
युक्त्यैव पंडितजनैर्न कदाप्यनुभूयते ॥ ६५७ ॥
अविद्याकार्यकरणसंघातेषु पुरोदितः ।
आत्मा जाग्रत्यपि स्वप्ने न भवत्येष गोचरः ॥ ६५८ ॥
स्थूलस्यापि च सूक्ष्मस्य दुःखरूपस्य वर्ष्मणः ।
लये सुषुप्तौ स्फुरति प्रत्यगानंदलक्षणः ॥ ६५९ ॥
न ह्यत्र विषयः कश्चिन्नापि बुद्ध्यादि किंचन ।
आत्मैव केवलानंदमात्रस्तिष्ठति निर्द्वयः ॥ ६६० ॥
प्रत्यभिज्ञायते सर्वैरेष सुप्तोत्थितैर्जनैः ।
सुखमात्रतया नात्र संशयं कर्तुमर्हसि ॥ ६६१ ॥
त्वयापि प्रत्यभिज्ञातं सुखमात्रत्वमात्मनः ।
सुषुप्तादुत्थितवता सुखमस्वाप्समित्यनु ॥ ६६२ ॥
दुःखाभावः सुखमिति यदुक्तं पूर्ववादिना ।
अनाघ्रातोपनिषदा तदसारं मृषा वचः ॥ ६६३ ॥
दुःखाभावस्तु लोष्टादौ विद्यते नानुभूयते ।
सुखलेशोऽपि सर्वेषां प्रत्यक्षं तदिदं खलु ॥ ६६४ ॥
सदयं ह्येष एवेति प्रस्तुत्य वदति श्रुतिः ।
सद्घनोऽयं चिद्घनोऽयमानंदघन इत्यपि ॥ ६६५ ॥
आनंदघनतामस्य स्वरूपं प्रत्यगात्मनः ।
धन्यैर्महात्मभिर्धीरैर्ब्रह्मविद्भिः सदुत्तमैः ॥ ६६६ ॥
अपरोक्षतयैवात्मा समाधावनुभूयते ।

केवलानंदमात्रत्वेनैवमत्र न संशयः ॥ ६६७ ॥
स्वस्वोपाध्यनुरूपेण ब्रह्माद्याः सर्वजंतवः ।
उपजीवन्त्यमुष्येव मात्रामानंदलक्षणाम् ॥ ६६८ ॥
आस्वाद्यते यो भक्ष्येषु सुखकृन्मधुरो रसः ।
स गुडस्यैव नो तेषां माधुर्यं विद्यते क्वचित् ॥ ६६९ ॥
तद्वद्विषयसांनिध्यादानंदो यः प्रतीयते ।
बिंबानंदांशविस्फूर्तिरेवासौ न जडात्मनाम् ॥ ६७० ॥
यस्य कस्यापि योगेन यत्र कुत्रापि दृश्यते ।
आनंदः स परस्यैव ब्रह्मणः स्फूर्तिलक्षणः ॥ ६७१ ॥
यथा कुवलयोल्लासश्चंद्रस्यैव प्रसादतः ।
तथानंदोदयोऽप्येषां स्फुरणादेव वस्तुनः ॥ ६७२ ॥
सत्त्वं चित्त्वं तथानंदस्वरूपं परमात्मनः ।
निर्गुणस्य गुणायोगाद्गुणास्तु न भवन्ति ते ॥ ६७३ ॥
विशेषणं तु व्यावृत्त्यै भवेद्द्रव्यांतरे सति ।
परमात्माद्वितीयोऽयं प्रपंचस्य मृषात्वतः ॥ ६७४ ॥
वस्त्वंतरस्याभावेन न व्यावृत्त्यः कदाचन ।
केवलो निर्गुणश्चेति निर्गुणत्वं निरुच्यते ॥ ६७५ ॥
श्रुत्यैव न ततस्तेषां गुणत्वमुपपद्यते ।
उष्णत्वं च प्रकाशश्च यथा वह्नेस्तथात्मनः ॥ ६७६ ॥
सत्त्वचित्त्वानंदतादि स्वरूपमिति निश्चितम् ।
अत एव सजातीयविजातीयादिलक्षणः ॥ ६७७ ॥
भेदो न विद्यते वस्तुन्यद्वितीये परात्मनि ।
प्रपंचस्यापवादेन विजातीयकृता भिदा ॥ ६७८ ॥
नेष्यते तत्प्रकारं ते वक्ष्यामि शृणु सादरम् ।
अहेर्गुणविवर्तस्य गुणमात्रस्य वस्तुतः ॥ ६७९ ॥

विवर्तस्यास्य जगतः सन्मात्रत्वेन दर्शनम् ।
अपवाद इति प्राहुरद्वैतब्रह्मदर्शिनः ॥ ६८० ॥
व्युत्क्रमेण तदुत्पत्तेर्द्रष्टव्यं सूक्ष्मबुद्धिभिः ।
प्रतीतस्यास्य जगतः सन्मात्रत्वं सुयुक्तिभिः ॥ ६८१ ॥
चतुर्विधं स्थूलशरीरजातं तद्भोज्यमन्नादि तदाश्रयादि ।
ब्रह्मांडमेतत्सकलं स्थविष्ठमीक्षेत पंचीकृतभूतमात्रम् ॥ ६८२ ॥
यत्कार्यरूपेण यदीक्ष्यते तत्तन्मात्रमेवात्र विचार्यमाणे ।
मृत्कार्यभूतं कलशादि सम्यग्विचारितं सन्न मृदो विभिद्यते॥६८३॥
अंतर्बहिश्चापि मृदेव दृश्यते मृदो न भिन्नं कलशादि किंचन ।
ग्रीवादिमद्यत्कलशं तदित्थं न वाच्यमेतच्च मृदेव नान्यत् ॥ ६८४ ॥
स्वरूपतस्तत्कलशादिनाम्ना मृदेव मूढैरभिधीयते ततः ।
नाम्नो हि भेदो न तु वस्तुभेदः प्रदृश्यते तत्र विचार्यमाणे॥६८५॥
तस्माद्धि कार्यं न कदापि भिन्नं स्वकारणादस्ति यतस्ततोऽग ।
यद्भौतिकं सर्वमिदं तथैव तद्भूतमात्रं न ततोऽपि भिन्नम्॥६८६॥
तच्चापि पंचीकृतभूतजातं शब्दादिभिः स्वस्वगुणैश्च सार्धम् ।
वपूंषि सूक्ष्माणि च सर्वमेतद्भवत्यपंचीकृतभूतमात्रम् ॥ ६८७ ॥
तदप्यपंचीकृतभूतजातं रजस्तमःसत्त्वगुणैश्च सार्धम् ।
अव्यक्तमात्रं भवति स्वरूपतः साभासमव्यक्तमिदं स्वयं च ॥६८८॥
आधारभूतं यदखंडमाद्यं शुद्धं परं ब्रह्म सदैकरूपम् ।
सन्मात्रमेवास्त्यथ नो विकल्पः सतः परं केवलमेव वस्तु ॥ ६८९ ॥
एकश्चंद्रः सद्वितीयो यथा स्याद्दृष्टेर्दोषादेव पुंसस्तथैकम् ।
ब्रह्मास्त्येतद्बुद्धिदोषेण नाना दोषे नष्टे भाति वस्त्वेकमेव ॥६९०॥
रज्जोः स्वरूपाधिगमे न सर्पधी रज्ज्वां विलीना तु यथा तथैव ।
ब्रह्मावगत्या तु जगत्प्रतीतिस्तत्रैव लीना तु सह भ्रमेण ॥ ६९१ ॥
भ्रांत्योदितद्वैतमतिप्रशांत्या सदैकमेवास्ति सदाऽद्वितीयम् ।

ततो विजातीयकृतोऽत्र भेदो न विद्यते ब्रह्मणि निर्विकल्पे॥६९२॥
यदास्त्युपाधिस्तदभिन्न आत्मा तदा सजातीय इवावभाति ।
स्वप्नार्थतस्तस्य मृषात्मकत्वात्तदप्रतीतौ स्वयमेव आत्मा ।
ब्रह्मैक्यतामेति पृथङ् न भाति ततः सजातीयकृतो न भेदः॥६९३॥
घटाभावे घटाकाशो महाकाशो यथा तथा ।
उपाध्यभावे त्वात्मैव स्वयं ब्रह्मैव केवलम् ॥ ६९४ ॥
पूर्ण एव सदाकाशो घटे सत्यप्यसत्यपि ।
नित्यपूर्णस्य नभसो विच्छेदः केन सिध्यति ॥ ६९५ ॥
अच्छिन्नश्छिन्नवद्भाति पामराणां घटादिना।
ग्रामक्षेत्राद्यवधिभिर्भिन्नेव वसुधा यथा ॥ ६९६ ॥
तथैव परमं ब्रह्म महतां च महत्तमम् ।
परिच्छिन्नमिवाभाति भ्रांत्या कल्पितवस्तुना ॥ ६९७ ॥
तस्माद्ब्रह्मात्मनोर्भेदः कल्पितो न तु वास्तवः ।
अत एव मुहुः श्रुत्याप्येकत्वं प्रतिपाद्यते ॥ ६९८ ॥
ब्रह्मात्मनोस्तत्त्वमसीत्यद्वयत्वोपपत्तये ।
प्रत्यक्षादिविरोधेन वाच्ययोर्नोपयुज्यते ।
तत्त्वंपदार्थयोरैक्यं लक्ष्ययोरेव सिध्यति ॥ ६९९ ॥

शिष्यः—

स्यात्तत्त्वंपदयोः स्वामिन्नर्थः कतिविधो मतः ।
पदयोः को नु वाच्यार्थो लक्ष्यार्थ उभयोश्च कः ॥ ७०० ॥
वाच्यैकत्वविवक्षायां विरोधः कः प्रतीयते ।
लक्ष्यार्थयोरभिन्नत्वे स कथं विनिवर्तते ॥ ७०१ ॥
एकत्वकथने का वा लक्षणात्रोररीकृता ।
एतत्सर्वं करुणया सम्यक्त्वं प्रतिपादय ॥ ७०२ ॥

श्रीगुरुः—

श‍ृणुष्वावहितो विद्वन् अद्य ते फलितं तपः ।
वाक्यार्थश्रुतिमात्रेण सम्यग्ज्ञानं भविष्यति ॥ ७०३ ॥
यावन्न तत्त्वंपदयोरर्थः सम्यग्विचार्यते ।
तावदेव नृणां बंधो मृत्युसंसारलक्षणः ॥ ७०४ ॥
अवस्था सच्चिदानंदाखंडैकरसरूपिणी ।
मोक्षः सिध्यति वाक्यार्थापरोक्षज्ञानतः सताम् ॥ ७०५ ॥
वाक्यार्थ एव ज्ञातव्यो मुमुक्षोर्भवमुक्तये ।
तस्मादवहितो भूत्वा श‍ृणु वक्ष्ये समासतः ॥ ७०६ ॥
अर्था बहुविधाः प्रोक्ता वाक्यानां पंडितोत्तमैः ।
वाच्यलक्ष्यादिभेदेन प्रस्तुतं श्रूयतां त्वया ॥ ७०७ ॥
वाक्ये तत्त्वमसीत्यत्र विद्यते यत्पदत्रयम् ।
तत्रादौ विद्यमानस्य तत्पदस्य निगद्यते ॥ ७०८ ॥
शास्त्रार्थकोविदैरर्थो वाच्यो लक्ष्य इति द्विधा ।
वाच्यार्थं ते प्रवक्ष्यामि पंडितैर्य उदीरितः ॥ ७०९ ॥
समष्टिरूपमज्ञानं साभासं सत्त्वबृंहितम् ।
वियदादिविराडंतं स्वकार्येण समन्वितम् ॥ ७१० ॥
चैतन्यं तदवच्छिन्नं सत्यज्ञानादिलक्षणम् ।
सर्वज्ञत्वेश्वरत्वांतर्यामित्वादिगुणैर्युतम् ॥ ७११ ॥
जगत्स्रष्टृत्वपातृत्वसंहर्तृत्वादिधर्मकम् ।
सर्वात्मना भासमानं यदमेयं गुणैश्च तत् ॥ ७१२ ॥
अव्यक्तमपरं ब्रह्म वाच्यार्थ इति कथ्यते ।
नीलमुत्पलमित्यत्र यथा वाक्यार्थसंगतिः ॥ ७१३ ॥
तथा तत्त्वमसीत्यत्र नास्ति वाक्यार्थसंगतिः ।
पटाद्व्यावर्तते नील उत्पलेन विशेषितः ॥ ७१४ ॥

शौक्ल्याद्व्यावर्तते नीलेनोत्पलं तु विशेषितम् ।
इत्थमन्योन्यभेदस्य व्यावर्तकतया तयोः ॥ ७१५ ॥
विशेषणविशेष्यत्वसंसर्गस्येतरस्य वा ।
वाक्यार्थत्वे प्रमाणांतरविरोधो न विद्यते ॥ ७१६ ॥
अतः संगच्छते सम्यग्वाक्यार्थो बाधवर्जितः ।
एवं तत्त्वमसीत्यत्र वाक्यार्थो न समंजसः॥ ७१७ ॥
तदर्थस्य परोक्षत्वादिविशिष्टचितेरपि ।
त्वमर्थस्यापरोक्षत्वादिविशिष्टचितेरपि ॥ ७१८ ॥
तथैवान्योन्यभेदस्य व्यावर्तकतया तयोः ।
विशेषणविशेष्यस्य संसर्गस्येतरस्य वा ॥ ७१९ ॥
वाक्यार्थत्वे विरोधोऽस्ति प्रत्यक्षादिकृतस्ततः ।
संगच्छते न वाक्यार्थस्तद्विरोधं च वच्मि ते ॥ ७२० ॥
सर्वेशत्वस्वतंत्रत्वसर्वज्ञत्वादिभिर्गुणैः ।
सर्वोत्तमः सत्यकामः सत्यसंकल्प ईश्वरः ॥ ७२१ ॥
तत्पदार्थस्त्वमर्थस्तु किंचिज्ज्ञो दुःखजीवनः ।
संसार्ययं तद्गतिको जीवः प्राकृतलक्षणः ॥ ७२२ ॥
कथमेकत्वमनयोर्घटते विपरीतयोः ।
प्रत्यक्षेण विरोधोऽयमुभयोरुपलभ्यते ॥ ७२३ ॥
विरुद्धधर्माक्रांतत्वात्परस्परविलक्षणौ ।
जीवेशौ वह्नितुहिनाविव शब्दार्थतोऽपि च ॥ ७२४ ॥
प्रत्यक्षादिविरोधः स्यादित्यैक्ये तयोः परित्यक्ते ।
श्रुतिवचनविरोधो भवति महास्मृतिवचनविरोधश्च ॥ ७२५ ॥
श्रुत्याप्येकत्वमनयोस्तात्पर्येण निगद्यते ।
मुहुस्तत्त्वमसीत्यस्मादंगीकार्यं श्रुतेर्वचः ॥ ७२६ ॥
वाक्यार्थत्वे विशिष्टस्य संसर्गस्य च वा पुनः ।

अयथार्थतया सोऽयं वाक्यार्थो न मतः श्रुतेः ॥ ७२७ ॥
अखंडैकरसत्वेन वाक्यार्थः श्रुतिसंमतः ।
स्थूलसूक्ष्मप्रपंचस्य सन्मात्रत्वं पुनः पुनः ॥ ७२८ ॥
दर्शयित्वा सुषुप्तौ तद्ब्रह्माभिन्नत्वमात्मनः ।
उपपाद्य सदैकत्वं प्रदर्शयितुमिच्छया ॥ ७२९ ॥
ऐतदात्म्यमिदं सर्वमित्युक्त्यैव सदात्मनोः ।
ब्रवीति श्रुतिरेकत्वं ब्रह्मणोऽद्वैतसिद्धये ॥ ७३० ॥
सति प्रपंचे जीवे वा द्वैतत्वं ब्रह्मणः कुतः ।
अतस्तयोरखंडत्वमेकत्वं श्रुतिसंमतम् ॥ ७३१ ॥
विरुद्धांशपरित्यागात्प्रत्यक्षादिर्न बाधते ।
अविरुद्धांशग्रहणान्न श्रुत्यापि विरुध्यते ॥ ७३२ ॥
लक्षणा ह्युपगंतव्या ततो वाक्यार्थसिद्धये ।
वाच्यार्थानुपपत्त्यैव लक्षणाभ्युपगम्यते ॥ ७३३ ॥
संबंधानुपपत्त्या च लक्षणेति जगुर्बुधाः ।
गंगायां घोष इत्यादौ या जहल्लक्षणा मता ॥ ७३४ ॥
न सा तत्त्वमसीत्यत्र वाक्य एषा प्रवर्तते ।
गंगाया अपि घोषस्याधाराधेयत्वलक्षणम् ॥ ७३५ ॥
सर्वो विरुद्धवाक्यार्थस्तत्र प्रत्यक्षतस्ततः ।
गंगासंबंधवत्तीरे लक्षणा संप्रवर्तते ॥ ७३६ ॥
तथा तत्त्वमसीत्यत्र चैतन्यैकत्वलक्षणे ।
विवक्षिते तु वाक्यार्थेऽपरोक्षत्वादिलक्षणः ॥ ७३७ ॥
विरुध्यते भागमात्रो न तु सर्वो विरुध्यते ।
तस्माज्जहल्लक्षणायाः प्रवृत्तिर्नात्र युज्यते ॥ ७३८ ॥
वाच्यार्थस्य तु सर्वस्य त्यागे न फलमीक्ष्यते ।
नालिकेरफलस्येव कठिनत्वधिया नृणाम् ॥ ७३९ ॥

१३

गंगापदं यथा स्वार्थं त्यक्त्वा लक्षयते तटम् ।
तत्पदं त्वंपदं वापि त्यक्त्वा स्वार्थं यथाखिलम् ॥ ७४० ॥
तदर्थं वा त्वमर्थं वा यदि लक्षयति स्वयम् ।
तदा जहल्लक्षणायाः प्रवृत्तिरुपपद्यते ॥ ७४१ ॥
न शंकनीयमित्यार्यैर्ज्ञातार्थे न हि लक्षणा ।
तत्पदं त्वंपदं वापि श्रूयते च प्रतीयते ॥ ७४२ ॥
तदर्थे च कथं तत्र संप्रवर्तेत लक्षणा ।
अत्र शोणो धावतीति वाक्यवन्न प्रवर्तते ॥ ७४३ ॥
अजहल्लक्षणा वापि सा जहल्लक्षणा यथा ।
गुणस्य गमनं लोके विरुद्धं द्रव्यमंतरा ॥ ७४४ ॥
अतस्तमपरित्यज्य तद्गुणाश्रयलक्षणः ।
लक्ष्यादिर्लक्ष्यते तत्र लक्षणासौ प्रवर्तते ॥ ७४५ ॥
वाक्ये तत्त्वमसीत्यत्र ब्रह्मात्मैकत्वबोधके ।
परोक्षत्वापरोक्षत्वादिविशिष्टचितोर्द्वयोः ॥ ७४६ ॥
एकत्वरूपवाक्यार्थो विरुद्धांशाविवर्जनात् ।
न सिध्यति यतस्तस्मान्नाजहल्लक्षणा मता ॥ ७४७ ॥
तत्पदं त्वंपदं चापि स्वकीयार्थविरोधिनम् ।
अंशं सम्यक्परित्यज्य स्वाविरुद्धांशसंयुतम् ॥ ७४८ ॥
तदर्थं वा त्वमर्थं वा सम्यग्लक्षयतः स्वयम् ।
भागलक्षणया साध्यं किमस्तीति न शंक्यताम् ॥ ७४९ ॥
अविरुद्धं पदार्थान्तरांशं स्वांशं च तत्कथम् ।
एकं पदं लक्षणया संलक्षयितुमर्हति ॥ ७५० ॥
पदांतरेण सिद्धायां पदार्थप्रमितौ स्वतः ।
तदर्थप्रत्ययापेक्षा पुनर्लक्षणया कुतः ॥ ७५१ ॥
तस्मात्तत्त्वमसीत्यत्र लक्षणा भागलक्षणा ।

वाक्यार्थसत्त्वाखंडैकरसतासिद्धये मता ॥ ७५२ ॥
भागं विरुद्धं संत्यज्याविरोधो लक्ष्यते यदा ।
सा भागलक्षणेत्याहुर्लक्षणज्ञा विचक्षणाः ॥ ७५३ ॥
सोऽयं देवदत्त इति वाक्यं वाक्यार्थ एव वा ।
देवदत्तैक्यरूपस्ववाक्यार्थानवबोधकम् ॥ ७५४ ॥
देशकालादिवैशिष्ट्यं विरुद्धांशं निरस्य च ।
अविरुद्धं देवदत्तदेहमात्रं स्वलक्षणम् ॥ ७५५ ॥
भागलक्षणया सम्यग्लक्षयत्यनया यथा ।
तथा तत्त्वमसीत्यत्र वाक्यं वाक्यार्थ एव वा ॥ ७५६ ॥
परोक्षत्वापरोक्षत्वादिविशिष्टचितोर्द्वयोः ।
एकत्वरूपवाक्यार्थविरुद्धांशमुपस्थितम् ॥ ७५७ ॥
परोक्षत्वापरोक्षत्वसर्वज्ञत्वादिलक्षणम् ।
बुद्ध्यादिस्थूलपर्यंतमाविद्यकमनात्मकम् ॥ ७५८ ॥
परित्यज्य विरुद्धांशं शुद्धचैतन्यलक्षणम् ।
वस्तु केवलसन्मात्रं निर्विकल्पं निरंजनम् ॥ ७५९ ॥
लक्षयत्यनया सम्यग्भागलक्षणया ततः ।
सर्वोपाधिविनिर्मुक्तं सच्चिदानंदमद्वयम् ॥ ७६० ॥
निर्विशेषं निराभासमतादृशमनीदृशम् ।
अनिर्देश्यमनाद्यंतमनंतं शांतमच्युतम् ।
अप्रतर्क्यमविज्ञेयं निर्गुणं ब्रह्म शिष्यते ॥ ७६१ ॥
उपाधिवैशिष्ट्यकृतो विरोधो ब्रह्मात्मनोरेकतयाधिगत्या ।
उपाधिवैशिष्ट्य उदस्यमाने न कश्चिदप्यस्ति विरोध एतयोः ॥७६२॥
तयोरुपाधिश्च विशिष्टता च तद्धर्मभाक्त्वं च विलक्षणत्वम् ।
भ्रांत्या कृतं सर्वमिदं मृषैव स्वप्नार्थवज्जाग्रति नैव सत्यम् ॥७६३॥
निद्रासूतशरीरधर्मसुखदुःखादिप्रपंचोऽपि वा

जीवेशादिभिदापि वा न च ऋतं कर्तुं क्वचिच्छक्यते ।
मायाकल्पितदेशकालजगदीशादिभ्रमस्तादृशः
को भेदोऽस्त्यनयोर्द्वयोस्तु कतमः सत्योऽन्यतः को भवेत् ॥७६४॥
न स्वप्नजागरणयोरुभयोर्विशेषः
संदृश्यते क्वचिदपि भ्रमजैर्विकल्पैः ।
यद्दृष्टदर्शनमुखैरत एव मिथ्या
स्वप्नो यथा ननु तथैव हि जागरोऽपि ॥ ७६५ ॥
अविद्याकार्यतस्तुल्यौ द्वावपि स्वप्नजागरौ ।
दृष्टदर्शनदृश्यादिकल्पनोभयतः समा ॥ ७६६ ॥
अभाव उभयोः सुप्तौ सर्वैरप्यनुभूयते ।
न कश्चिदनयोर्भेदस्तस्मान्मिथ्यात्वमर्हतः ॥ ७६७ ॥
भ्रांत्या ब्रह्मणि भेदोऽयं सजातीयादिलक्षणः ।
कालत्रयेऽपि हे विद्वन् वस्तुतो नैव कश्चन ॥ ७६८ ॥
यत्र नान्यत्पश्यतीति श्रुतिर्द्वैतं निषेधति ।
कल्पितस्य भ्रमाद्भूम्नि मिथ्यात्वावगमाय तत् ॥ ७६९ ॥
यतस्ततो ब्रह्म सदाऽद्वितीयं विकल्पशून्यं निरुपाधि निर्मलम् ।
निरंतरानंदघनं निरीहं निरास्पदं केवलमेकमेव ॥ ७७० ॥
नैवास्ति काचन भिदा न गुणप्रतीति-
र्नो वाक्प्रवृत्तिरपि वा न मनःप्रवृत्तिः ।
यत्केवलं परमशांतमनंतमाद्य-
मानंदमात्रमवभाति सदद्वितीयम् ॥ ७७१ ॥
यदिदं परमं सत्यं तत्त्वं सच्चित्सुखात्मकम् ।
अजरामरणं नित्यं सत्यमेतद्वचो मम ॥ ७७२ ॥
न हि त्वं देहोऽसावसुरपि च वाप्यक्षनिकरो
मनो वा बुद्धिर्वा क्वचिदपि तथाहंकृतिरपि ।

न चैषां संघातस्त्वसु भवति विद्वन् शृणु परं
यदेतेषां साक्षी स्फुरणममलं तत्त्वमसि हि ॥ ७७३ ॥
यज्जायते वस्तु तदेव वर्धते तदेव मृत्युं समुपैति काले ।
जन्मैव तेनास्ति तथैव मृत्युर्नास्त्येव नित्यस्य विभोरजस्य ॥ ७७४ ॥
य एष देहो जनितः स एव समेधते नश्यति कर्मयोगात् ।
त्वमेतदीयास्वखिलास्ववस्थास्ववस्थितः साक्ष्यसि बोधमात्रः ॥ ७७५ ॥
यत्स्वप्रकाशमखिलात्मकमासुषुप्ते-
रेकात्मनाहमहमित्यवभाति नित्यम् ।
बुद्धेः समस्तविकृतेरविकारि बोद्धृ
यद्ब्रह्म तत्त्वमसि केवलबोधमात्रम् ॥ ७७६ ॥
स्वात्मन्यनस्तमयसंविदि कल्पितस्य
व्योमादिसर्वजगतः प्रददाति सत्ताम् ।
स्फूर्तिं स्वकीयमहसा वितनोति साक्षा-
द्यद्ब्रह्म तत्त्वमसि केवलबोधमात्रम् ॥ ७७७ ॥
सम्यक्समाधिनिरतैर्विमलांतरंगैः
साक्षादवेक्ष्य निजतत्त्वमपारसौख्यम् ।
संतुष्यते परमहंसकुलैरजस्रं
यद्ब्रह्म तत्त्वमसि केवलबोधमात्रम् ॥ ७७८ ॥
अंतर्बहिः स्वयमखंडितमेकरूप-
मारोपितार्थवदुदंचति मूढबुद्धेः ।
मृत्स्नादिवद्विगतविक्रियमात्मवेद्यं
यद्ब्रह्म तत्त्वमसि केवलबोधमात्रम् ॥ ७७९ ॥
श्रुत्युक्तमव्ययमनंतमनादिमध्य-
मव्यक्तमक्षरमनाश्रयमप्रमेयम् ।
आनंदसद्घनमनामयमद्वितीयं

यद्ब्रह्म तत्त्वमसि केवलबोधमात्रम् ॥ ७८० ॥

शरीरतद्योगतदीयधर्माद्यारोपणं भ्रान्तिवशात्त्वयीदम् ।
न वस्तुतः किंचिदतस्त्वजस्त्वं मृत्योर्भयं क्वास्ति तवासि पूर्णः ॥७८१॥

यद्यद्दृष्टं भ्रान्तिमत्या स्वदृष्ट्या
तत्तत्सम्यग्वस्तुदृष्ट्या त्वमेव ।
त्वत्तो नान्यद्वस्तु किंचित्तु लोके
कस्माद्भीतिस्ते भवेदद्वयस्य ॥ ७८२ ॥

पश्यतस्त्वहमेवेदं सर्वमित्यात्मनाखिलम् ।
भयं स्याद्विदुषः कस्मात्स्वस्मान्न भयमिष्यते ॥ ७८३ ॥

तस्मात्त्वमभयं नित्यं केवलानंदलक्षणम् ।
निष्कलं निष्क्रियं शांतं ब्रह्मैवासि सदाऽद्वयम् ॥ ७८४ ॥

ज्ञातृज्ञानज्ञेयविहीनं ज्ञातुरभिन्नं ज्ञानमखंडम् ।
ज्ञेयाज्ञेयत्वादिविमुक्तं शुद्धं बुद्धं तत्त्वमसि त्वम् ॥ ७८५ ॥

अंतःप्रज्ञत्वादिविकल्पैरस्पृष्टं यत्तद्दृशिमात्रम् ।
सत्तामात्रं समरसमेकं शुद्धं बुद्धं तत्त्वमसि त्वम् ॥ ७८६ ॥

सर्वाकारं सर्वमसर्वं सर्वनिषेधावधिभूतं यत् ।
सत्यं शाश्वतमेकमनंतं शुद्धं बुद्धं तत्त्वमसि त्वम् ॥ ७८७ ॥

नित्यानंदाखंडैकरसं निष्कलमक्रियमस्तविकारम् ।
प्रत्यगभिन्नं परमव्यक्तं शुद्धं बुद्धं तत्त्वमसि त्वम् ॥ ७८८ ॥

त्वं प्रत्यस्ताशेषविशेषं व्योमेवांतर्बहिरपि पूर्णम् ।
ब्रह्मानंदं परमद्वैतं शुद्धं बुद्धं तत्त्वमसि त्वम् ॥ ७८९ ॥

ब्रह्मैवाहमहं ब्रह्म निर्गुणं निर्विकल्पकम् ।
इत्येवाखंडया वृत्त्या तिष्ठ ब्रह्मणि निष्क्रिये ॥ ७९० ॥

अखंडामेवैतां घटितपरमानंदलहरीं
परिध्वस्तद्वैतप्रमितिममलां वृत्तिमनिशम् ।

अमुंचानः स्वात्मन्यनुपमसुखे ब्रह्मणि परे
रमस्व प्रारब्धं क्षपय सुखवृत्त्या त्वमनया ॥ ७९१ ॥
ब्रह्मानंदरसास्वादतत्परेणैव चेतसा ।
समाधिनिष्ठितो भूत्वा तिष्ठ विद्वन्सदा मुने ॥ ७९२ ॥

शिष्यः—

अखंडाख्या वृत्तिरेषा वाक्यार्थश्रुतिमात्रतः ।
श्रोतुः संजायते किं वा क्रियांतरमपेक्षते ॥ ७९३ ॥
समाधिः कः कतिविधस्तत्सिद्धेः किमु साधनम् ।
समाधेरंतरायाः के सर्वमेतन्निरूप्यताम् ॥ ७९४ ॥

श्रीगुरुः—

मुख्यगौणादिभेदेन विद्यन्तेऽत्राधिकारिणः ।
तेषां प्रज्ञानुसारेणाखंडा वृत्तिरुदेष्यते ॥ ७९५ ॥
श्रद्धाभक्तिपुरःसरेण विहितेनैवेश्वरं कर्मणा
संतोष्यार्जिततत्प्रसादमहिमा जन्मांतरेष्वेव यः ।
नित्यानित्यविवेकतीव्रविरतिन्यासादिभिः साधनै-
र्युक्तः सः श्रवणे सतामभिमतो मुख्याधिकारी द्विजः ॥ ७९६ ॥
अध्यारोपापवादक्रममनुसरता देशिकेनात्र वेत्त्रा
वाक्यार्थे बोध्यमाने सति सपदि सतः शुद्धबुद्धेरमुष्य ।
नित्यानंदाद्वितीयं निरुपमममलं यत्परं तत्त्वमेकं
तद्ब्रह्मैवाहमस्मीत्युदयति परमाखंडताकारवृत्तिः ॥ ७९७ ॥
अखंडाकारवृत्तिः सा चिदाभाससमन्विता ।
आत्माभिन्नं परं ब्रह्म विषयीकृत्य केवलम् ॥ ७९८ ॥
बाधते तद्गताज्ञानं यदावरणलक्षणम् ।
अखंडाकारया वृत्त्या त्वज्ञाने बाधिते सति ॥ ७९९ ॥
तत्कार्यं सकलं तेन समं भवति बाधितम् ।

तंतुदाहे तु तत्कार्यपटदाहो यथा तथा ॥ ८०० ॥
तस्य कार्यतया जीववृत्तिर्भवति बाधिता ।
उपप्रभा यथा सूर्यं प्रकाशयितुमक्षमा ॥ ८०१ ॥
तद्वदेव चिदाभासचैतन्यं वृत्तिसंस्थितम् ।
स्वप्रकाशं परं ब्रह्म प्रकाशयितुमक्षमम् ॥ ८०२ ॥
प्रचंडातपमध्यस्थदीपवन्नष्टदीधितिः ।
तत्तेजसाभिभूतं सल्लीनोपाधितया ततः ॥ ८०३ ॥
बिंबभूतपरब्रह्ममात्रं भवति केवलम् ।
यथापनीते त्वादर्शे प्रतिबिंबमुखं स्वयम् ॥ ८०४ ॥
मुखमात्रं भवेत्तद्वदेतच्चोपाधिसंक्षयात् ।
घटाज्ञाने यथा वृत्त्या व्याप्तया बाधिते सति ॥ ८०५ ॥
घटं विस्फुरयत्येष चिदाभासः स्वतेजसा ।
न तथा स्वप्रभे ब्रह्मण्याभास उपयुज्यते ॥ ८०६ ॥
अत एव मतं वृत्तिव्याप्यत्वं वस्तुनः सताम् ।
न फलव्याप्यता तेन न विरोधः परस्परम् ॥ ८०७ ॥
श्रुत्योदितस्ततो ब्रह्म ज्ञेयं बुद्ध्यैव सूक्ष्मया ।
प्रज्ञामांद्यं भवेद्येषां तेषां न श्रुतिमात्रतः ॥ ८०८ ॥
स्यादखंडाकारवृत्तिर्विना तु मननादिना ।
श्रवणान्मननाद्ध्यानात्तात्पर्येण निरंतरम् ॥ ८०९ ॥
बुद्धेः सूक्ष्मत्वमायाति ततो वस्तूपलभ्यते ।
मंदप्रज्ञावतां तस्मात्करणीयं पुनः पुनः ॥ ८१० ॥
श्रवणं मननं ध्यानं सम्यग्वस्तूपलब्धये ।
सर्ववेदान्तवाक्यानां षड्भिर्लिंगैः सदद्वये ॥ ८११ ॥
परे ब्रह्मणि तात्पर्यनिश्चयं श्रवणं विदुः ।
श्रुतस्यैवाद्वितीयस्य वस्तुनः प्रत्यगात्मनः ॥ ८१२ ॥

वेदान्तवाक्यानुगुणयुक्तिभिस्त्वनुचिंतनम् ।
मननं तच्छ्रुतार्थस्य साक्षात्करणकारणम् ॥ ८१३ ॥
विजातीयशरीरादिप्रत्ययत्यागपूर्वकम् ।
सजातीयात्मवृत्तीनां प्रवाहकरणं यथा ॥
तैलधारावदच्छिन्नवृत्त्या तद्ध्यानमिष्यते ॥ ८१४ ॥
तावत्कालं प्रयत्नेन कर्तव्यं श्रवणं सदा ।
प्रमाणसंशयो यावत्स्वबुद्धेर्न निवर्तते ॥ ८१५ ॥
प्रमेयसंशयो यावत्तावत्तु श्रुतियुक्तिभिः ।
आत्मयाथार्थ्यनिश्चित्यै कर्तव्यं मननं मुहुः ॥ ८१६ ॥
विपरीतात्मधीर्यावन्न विनश्यति चेतसि ।
तावन्निरंतरं ध्यानं कर्तव्यं मोक्षमिच्छता ॥ ८१७ ॥
यावन्न तर्केण निरासितोऽपि दृश्यप्रपंचस्त्वपरोक्षबोधात् ।
विलीयते तावदमुष्य भिक्षोर्ध्यानादि सम्यक्करणीयमेव ॥ ८१८ ॥
सविकल्पो निर्विकल्प इति द्वेधा निगद्यते ।
समाधिः सविकल्पस्य लक्षणं वच्मि तच्छृणु ॥ ८१९ ॥
ज्ञानाद्यविलयेनैव ज्ञेये ब्रह्मणि केवले ।
तदाकाराकारितया चित्तवृत्तेरवस्थितिः ॥ ८२० ॥
सद्भिः स एव विज्ञेयः समाधिः सविकल्पकः ।
मृद एवावभानेऽपि मृण्मयद्विपभानवत् ॥ ८२१ ॥
सन्मात्रवस्तुभानेऽपि त्रिपुटी भाति सन्मयी ।
समाधिरत एवायं सविकल्प इतीर्यते ॥ ८२२ ॥
ज्ञात्रादिभावमुत्सृज्य ज्ञेयमात्रस्थितिर्दृढा ।
मनसो निर्विकल्पः स्यात्समाधिर्योगसंज्ञितः ॥ ८२३ ॥
जले निक्षिप्तलवणं जलमात्रतया स्थितम् ।
पृथङ् न भाति किं न्वंभ एकमेवावभासते ॥ ८२४ ॥

यथा तथैव सा वृत्तिर्ब्रह्ममात्रतया स्थिता ।
पृथङ् न भाति ब्रह्मैवाद्वितीयमवभासते ॥ ८२५ ॥
ज्ञात्रादिकल्पनाभावान्मतोऽयं निर्विकल्पकः ।
वृत्तेः सद्भावबाधाभ्यामुभयोर्भेद इष्यते ॥ ८२६ ॥
समाधिसुप्त्योर्ज्ञानं चाज्ञानं सुप्त्यात्र नेष्यते ।
सविकल्पो निर्विकल्पः समाधिर्द्वाविमौ हृदि ॥ ८२७ ॥
मुमुक्षोर्यत्नतः कार्यौ विपरीतनिवृत्तये ।
कृतेऽस्मिन्विपरीताया भावनाया निवर्तनम् ॥ ८२८ ॥
ज्ञानस्याप्रतिवद्धत्वं सदानंदश्च सिध्यति ।
दृश्यानुविद्धः शब्दानुविद्धश्चेति द्विधा मतः ॥ ८२९ ॥
सविकल्पस्तयोर्यत्तल्लक्षणं वच्मि तच्छृणु ।
कामादिप्रत्ययैर्दृश्यैः संसर्गो यत्र दृश्यते ॥ ८३० ॥
सोऽयं दृश्यानुविद्धः स्यात्समाधिः सविकल्पकः ।
अहंममेदमित्यादिकामक्रोधादिवृत्तयः ॥ ८३१ ॥
दृश्यन्ते येन संदृष्टा दृश्याः स्युरहमादयः ।
कामादिसर्ववृत्तीनां द्रष्टारमविकारिणम् ॥ ८३२ ॥
साक्षिणं स्वं विजानीयाद्यस्ताः पश्यति निष्क्रियः ।
कामादीनामहं साक्षी दृश्यन्ते ते मया ततः ॥ ८३३ ॥
इति साक्षितयात्मानं जानात्यात्मनि साक्षिणम् ।
दृश्यं कामादि सकलं स्वात्मन्येव विलापयेत् ॥ ८३४ ॥

नाहं देहो नाप्यसुर्नाक्षवर्गो
नाहंकारो नो मनो नापि बुद्धिः ।
अंतस्तेषां चापि तद्विक्रियाणां
साक्षी नित्यः प्रत्यगेवाहमस्मि ॥ ८३५ ॥
वाचः साक्षी प्राणवृत्तेश्च साक्षी

बुद्धेः साक्षी बुद्धिवृत्तेश्च साक्षी ।
चक्षुःश्रोत्रादींद्रियाणां च साक्षी
साक्षी नित्यः प्रत्यगेवाहमस्मि ॥ ८३६ ॥
नाहं स्थूलो नापि सूक्ष्मो न दीर्घो
नाहं बालो नो युवा नापि वृद्धः ।
नाहं काणो नापि मूको न षंढः
साक्षी नित्यः प्रत्यगेवाहमस्मि ॥ ८३७ ॥
नास्म्यागंता नापि गंता न हंता
नाहं कर्ता न प्रयोक्ता न वक्ता ।
नाहं भोक्ता नो सुखी नैव दुःखी
साक्षी नित्यः प्रत्यगेवाहमस्मि ॥ ८३८ ॥
नाहं योगी नो वियोगी न रागी
नाहं क्रोधी नैव कामी न लोभी ।
नाहं बद्धो नापि युक्तो न मुक्तः
साक्षी नित्यः प्रत्यगेवाहमस्मि ॥ ८३९ ॥
नांतःप्रज्ञो नो बहिःप्रज्ञको वा
नैव प्रज्ञो नापि चाप्रज्ञ एषः ।
नाहं श्रोता नापि मंता न बोद्धा
साक्षी नित्यः प्रत्यगेवाहमस्मि ॥ ८४० ॥
न मेऽस्ति देहेंद्रियबुद्धियोगो
न पुण्यलेशोऽपि न पापलेशः ।
क्षुधापिपासादिषडूर्मिदूरः
सदा विमुक्तोऽस्मि चिदेव केवलः ॥ ८४१ ॥
अपाणिपादोऽहमवागचक्षुषी
अप्राण एवास्म्यमना ह्यबुद्धिः ।

व्योमेव पूर्णोऽस्मि विनिर्मलोऽस्मि
सदैकरूपोऽस्मि चिदेव केवलः ॥ ८४२ ॥
इति स्वमात्मानमवेक्षमाणः
प्रतीतदृश्यं प्रविलापयन्सदा ।
जहाति विद्वान्विपरीतभावं
स्वाभाविकं भ्रांतिवशात्प्रतीतम् ॥ ८४३ ॥
विपरीतात्मतास्फूर्तिरेव मुक्तिरितीर्यते ।
सदा समाहितस्यैव सैषा सिध्यति नान्यथा ॥ ८४४ ॥
न वेषभाषाभिरमुष्य मुक्तिर्या केवलाखंडचिदात्मना स्थितिः ।
तत्सिद्धये स्वात्मनि सर्वदा स्थितो जह्यादहंतां ममतामुपाधौ ॥८४५॥
स्वात्मतत्त्वं समालंब्य कुर्यात्प्रकृतिनाशनम् ।
तेनैव मुक्तो भवति नान्यथा कर्मकोटिभिः ॥ ८४६ ॥
ज्ञात्वा देवं सर्वपाशापहानिः
क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः ।
इत्येवैषा वैदिकी वाग्ब्रवीति
क्लेशक्षत्यां जन्ममृत्युप्रहाणिम् ॥ ८४७ ॥
भूयो जन्माद्यप्रसक्तिर्विमुक्तिः
क्लेशक्षत्यां भाति जन्माद्यभावः ।
क्लेशक्षत्या हेतुरात्मैकनिष्ठा
तस्मात्कार्या ह्यात्मनिष्ठा मुमुक्षोः ॥ ८४८ ॥
क्लेशाः स्युर्वासना एव जंतोर्जन्मादिकारणम् ।
ज्ञाननिष्ठाग्निना दाहे तासां नो जन्महेतुता ॥ ८४९ ॥
बीजान्यग्निप्रदग्धानि न रोहन्ति यथा पुनः ।
ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संपद्यते पुनः ॥ ८५० ॥
तस्मान्मुमुक्षोः कर्तव्या ज्ञाननिष्ठा प्रयत्नतः ।

निःशेषवासनाक्षत्यै विपरीतनिवृत्तये ॥ ८५१ ॥
ज्ञाननिष्ठातत्परस्य नैव कर्मोपयुज्यते ।
कर्मणो ज्ञाननिष्ठाया न सिध्यति सहस्थितिः ॥ ८५२ ॥
परस्परविरुद्धत्वात्तयोर्भिन्नस्वभावयोः ।
कर्तृत्वभावनापूर्वं कर्म ज्ञानं विलक्षणम् ॥ ८५३ ॥
देहात्मबुद्धेर्विच्छित्त्यै ज्ञानं कर्म विवृद्धये ।
अज्ञानमूलकं कर्म ज्ञानं तूभयनाशकम् ॥ ८५४ ॥
ज्ञानेन कर्मणो योगः कथं सिध्यति वैरिणा ।
सहयोगो न घटते यथा तिमिरतेजसोः ॥ ८५५ ॥
निमेषोन्मेषयोर्वापि तथैव ज्ञानकर्मणोः ।
प्रतीचीं पश्यतः पुंसां कुतः प्राचीविलोकनम् ।
प्रत्यक्प्रवणचित्तस्य कुतः कर्मणि योग्यता ॥ ८५६ ॥
ज्ञानैकनिष्ठानिरतस्य भिक्षोर्नैवावकाशोऽस्ति हि कर्मतंत्रे ।
तदेव कर्मास्य तदेव संध्या तदेव सर्वं न ततोऽन्यदस्ति ॥८५७॥
बुद्धिकल्पितमालिन्यक्षालनं स्नानमात्मनः ।
तेनैव शुद्धिरेतस्य न मृदा न जलेन च ॥ ८५८ ॥
स्वस्वरूपे मनःस्थानमनुष्ठानं तदिष्यते ।
करणत्रयसाध्यं यत्तन्मृषा तदसत्यतः ॥ ८५९ ॥
विनिषिध्याखिलं दृश्यं स्वस्वरूपेण या स्थितिः ।
सा संध्या तदनुष्ठानं तद्दानं तद्धि भोजनम् ॥ ८६० ॥
विज्ञातपरमार्थानां शुद्धसत्त्वात्मनां सताम् ।
यतीनां किमनुष्ठानं स्वानुसंधिं विना परम् ॥ ८६१ ॥
तस्मात्क्रियान्तरं त्यक्त्वा ज्ञाननिष्ठापरो यतिः ।
सदात्मनिष्ठया तिष्ठेन्निश्चलस्तत्परायणः ॥ ८६२ ॥
कर्तव्यं स्वोचितं कर्म योगमारोढुमिच्छता ।

आरोहणं कुर्वतस्तु कर्म नारोहणं मतम् ॥ ८६३ ॥

योगं समारोहति यो मुमुक्षुः
क्रियान्तरं तस्य न युक्तमीषत् ।
क्रियान्तरासक्तमनाः पतत्यसौ
तालद्रुमारोहणकर्तृवद्ध्रुवम् ॥ ८६४ ॥

योगारूढस्य सिद्धस्य कृतकृत्यस्य धीमतः ।
नास्त्येव हि बहिर्दृष्टिः का कथा तत्र कर्मणाम् ।
दृश्यानुविद्धः कथितः समाधि सविकल्पकः ॥ ८६५ ॥

शुद्धोऽहं बुद्धोऽहं प्रत्यग्रूपेण नित्यसिद्धोऽहम् ।
शांतोऽहमनंतोऽहं सततपरानंदसिंधुरेवाहम् ॥ ८६६ ॥

आद्योऽहमनाद्योऽहं वाङ्मनसा साध्यवस्तुमात्रोऽहम् ।
निगमवचोवेद्योऽहमनवद्याखंडबोधरूपोऽहम् ॥ ८६७ ॥

विदिताविदितान्योऽहं मायातत्कार्यलेशशून्योऽहम् ।
केवलदृगात्मकोऽहं संविन्मात्रः सकृद्विभातोऽहम् ॥ ८६८ ॥

अपरोऽहमनपरोऽहं बहिरंतश्चापि पूर्ण एवाहम् ।
अजरोऽहमक्षरोऽहं नित्यानंदोऽहमद्वितीयोऽहम् ॥ ८६९ ॥

प्रत्यगभिन्नमखंडं सत्यज्ञानादिलक्षणं शुद्धम् ।
श्रुत्यवगम्यं तथ्यं ब्रह्मैवाहं परं ज्योतिः ॥ ८७० ॥

एवं सन्मात्रगाहिन्या वृत्त्या तन्मात्रगाहकैः ।
शब्दैः समर्पितं वस्तु भावयेन्निश्चलो यतिः ॥ ८७१ ॥

कामादिदृश्यप्रविलापपूर्वकं शुद्धोऽहमित्यादिकशब्दमिश्रः ।
दृश्येव निष्ठस्य य एष भावः शब्दानुविद्धः कथितः समाधिः ॥८७२॥

दृश्यस्यापि च साक्षित्वात्समुल्लेखनमात्मनि ।
निवर्तकमनोवस्था निर्विकल्प इतीर्यते ॥ ८७३ ॥

सविकल्पसमाधिं यो दीर्घकालं निरंतरम् ।

संस्कारपूर्वकं कुर्यान्निर्विकल्पोऽस्य सिध्यति ८७४ ॥
निर्विकल्पकसमाधिनिष्ठया तिष्ठतो भवति नित्यता ध्रुवम् ।
उद्भवाद्यपगतिर्निरर्गला नित्यनिश्चलनिरंतनिर्वृतिः ॥ ८७५ ॥
विद्वानहमिदमिति वा किंचिद्बाह्याभ्यंतरवेदनशून्यः ।
स्वानंदामृतसिंधुनिमग्नस्तूष्णीमास्ते कश्चिदनन्यः ॥ ८७६ ॥
निर्विकल्पं परं ब्रह्म यत्तस्मिन्नेव निष्ठिताः ।
एते धन्या एव मुक्ता जीवन्तोऽपि बहिर्दृशाम् ॥ ८७७ ॥
यथा समाधित्रितयं यत्नेन क्रियते हृदि ।
तथैव बाह्यदेशेऽपि कार्यं द्वैतनिवृत्तये ॥ ८७८ ॥
तत्प्रकारं प्रवक्ष्यामि निशामय समासतः ।
अधिष्ठानं परं ब्रह्म सच्चिदानंदलक्षणम् ॥ ८७९ ॥
तत्राध्यस्तमिदं भाति नामरूपात्मकं जगत् ।
सत्त्वं चित्त्वं तथानंदरूपं यद्ब्रह्मणस्त्रयम् ॥ ८८० ॥
अध्यस्तजगतो रूपं नामरूपमिदं द्वयम् ।
एतानि सच्चिदानंदनामरूपाणि पंच च ॥ ८८१ ॥
एकीकृत्योच्यते मूर्खैरिदं विश्वमिति भ्रमात् ।
शैत्यं श्वेतं रसं द्राव्यं तरंग इति नाम च ॥ ८८२ ॥
एकीकृत्य तरंगोऽयमिति निर्दिश्यते यथा ।
आरोपिते नामरूपे उपेक्ष्य ब्रह्मणः सतः ॥ ८८३ ॥
स्वरूपमात्रग्रहणं समाधिर्बाह्य आदिमः ।
सच्चिदानंदरूपस्य सकाशाद्ब्रह्मणो यतिः ॥ ८८४ ॥
नामरूपे पृथक्कृत्वा ब्रह्मण्येव विलापयन् ।
अधिष्ठानं परं ब्रह्म सच्चिदानंदमद्वयम् ।
यत्तदेवाहमित्येव निश्चितात्मा भवेद्ध्रुवम् ॥ ८८५ ॥
इयं भूर्न सन्नापि तोयं न तेजो

न वायुर्न खं नापि तत्कार्यजातम् ।
यदेषामधिष्ठानभूतं विशुद्धं
सदेकं परं सत्तदेवाहमस्मि ॥ ८८६ ॥
न शब्दो न रूपं न च स्पर्शको वा
तथा नो रसो नापि गंधो न चान्यः ।
यदेषामधिष्ठानभूतं विशुद्धं
सदेकं परं सत्तदेवाहमस्मि ॥ ८८७ ॥
न सद्द्रव्यजातं गुणा न क्रिया वा
न जातिर्विशेषो न चान्यः कदापि ।
यदेषामधिष्ठानभूतं विशुद्धं
सदेकं परं सत्तदेवाहमस्मि ॥ ८८८ ॥
न देहो न चाक्षाणि न प्राणवायु-
र्मनो नापि बुद्धिर्न चित्तं ह्यहंधीः ।
यदेषामधिष्ठानभूतं विशुद्धं
सदेकं परं सत्तदेवाहमस्मि ॥ ८८९ ॥
न देशो न कालो न दिग्वापि सत्स्या-
न्न वस्त्वंतरं स्थूलसूक्ष्मादिरूपम् ।
यदेषामधिष्ठानभूतं विशुद्धं
सदेकं परं सत्तदेवाहमस्मि ॥ ८९० ॥
एतद्दृश्यं नामरूपात्मकं यो-
ऽधिष्ठानं तद्ब्रह्म सत्यं सदेति ।
गच्छंस्तिष्ठन्वा शयानोऽपि नित्यं
कुर्याद्विद्वान्बाह्यदृश्यानुविद्धम् ॥ ८९१ ॥
अध्यस्तनामरूपादिप्रविलापेन निर्मलम् ।
अद्वैतं परमानंदं ब्रह्मैवास्मीति भावयेत् ॥ ८९२ ॥

निर्विकारं निराकारं निरंजनमनामयम् ।
आद्यंतरहितं पूर्णं ब्रह्मैवाहं न संशयः ॥ ८९३ ॥
निष्कलंकं निरातंकं त्रिविधच्छेदवर्जितम् ।
आनंदमक्षरं मुक्तं ब्रह्मैवास्मीति भावयेत् ॥ ८९४ ॥
निर्विशेषं निराभासं नित्यमुक्तमविक्रियम् ।
प्रज्ञानैकरसं सत्यं ब्रह्मैवास्मीति भावयेत् ॥ ८९५ ॥
शुद्धं बुद्धं तत्त्वसिद्धं परं प्रत्यगखंडितम् ।
स्वप्रकाशं पराकाशं ब्रह्मैवास्मीति भावयेत् ॥ ८९६ ॥
सुसूक्ष्ममस्तितामात्रं निर्विकल्पं महत्तमम् ।
केवलं परमाद्वैतं ब्रह्मैवास्मीति भावयेत् ॥ ८९७ ॥
इत्येवं निर्विकारादिशब्दमात्रसमर्पितम् ।
ध्यायतः केवलं वस्तु लक्ष्ये चित्तं प्रतिष्ठति ॥ ८९८ ॥
ब्रह्मानंदरसावेशादेकीभूय तदात्मना ।
वृत्तेर्या निश्चलावस्था स समाधिरकल्पकः ॥ ८९९ ॥
उत्थाने वाप्यनुत्थानेऽप्यप्रमत्तो जितेंद्रियः ।
समाधिषट्कं कुर्वीत सर्वदा प्रयतो यतिः ॥ ९०० ॥
विपरीतार्थधीर्यावन्न निःशेषं निवर्तते ।
स्वरूपस्फुरणं यावन्न प्रसिध्यत्यनिर्गलम् ।
तावत्समाधिषट्केन नयेत्कालं निरंतरम् ॥ ९०१ ॥
न प्रमादोऽत्र कर्तव्यो विदुषा मोक्षमिच्छता ।
प्रमादे जृंभते माया सूर्यापाये तमो यथा ॥ ९०२ ॥
स्वानुभूतिं परित्यज्य न तिष्ठन्ति क्षणं बुधाः ।
स्वानुभूतौ प्रमादो यः स मृत्युर्न यमः सताम् ॥ ९०३ ॥
अस्मिन्समाधौ कुरुते प्रयासं
यस्तस्य नैवास्ति पुनर्विकल्पः ।

सर्वात्मभावोऽप्यमुनैव सिध्ये-
त्सर्वात्मभावः खलु केवलत्वम् ॥ ९०४ ॥
सर्वात्मभावो विदुषो ब्रह्मविद्याफलं विदुः ।
जीवन्मुक्तस्य तस्यैव स्वानंदानुभवः फलम् ॥ ९०५ ॥
योऽहंममेत्याद्यसदात्मगाहको
ग्रंथिर्लयं याति स वासनामयः ।
समाधिना नश्यति कर्मबंधो
ब्रह्मात्मबोधोऽप्रतिबंध इष्यते ॥ ९०६ ॥
एष निष्कंटकः पंथा मुक्तेर्ब्रह्मात्मना स्थितेः ।
शुद्धात्मनां मुमुक्षूणां यत्सदेकत्वदर्शनम् ॥ ९०७ ॥
तस्मात्त्वं चाप्यप्रमत्तः समाधी-
न्कृत्वा ग्रंथिं साधु निर्दह्य युक्तः ।
नित्यं ब्रह्मानंदपीयूषसिंधौ
मज्जन्क्रीडन्मोदमानो रमस्व ॥ ९०८ ॥
निर्विकल्पसमाधिर्यो वृत्तिर्नैश्चल्यलक्षणा ।
तमेव योग इत्याहुर्योगशास्त्रार्थकोविदाः ॥ ९०९ ॥
अष्टावंगानि योगस्य यमो नियम आसनम् ।
प्राणायामस्तथा प्रत्याहारश्चापि च धारणा ॥ ९१० ॥
ध्यानं समाधिरित्येव निगदन्ति मनीषिणः ।
सर्वं ब्रह्मेति विज्ञानादिंद्रियग्रामसंयमः ॥ ९११ ॥
यमोऽयमिति संप्रोक्तोऽभ्यसनीयो मुहुर्मुहुः ।
सजातीयप्रवाहश्च विजातीयतिरस्कृतिः ॥ ९१२ ॥
नियमो हि परानंदो नियमात्क्रियते बुधैः ।
सुखेनैव भवेद्यस्मिन्नजस्रं ब्रह्मचिंतनम् ॥ ९१३ ॥
आसनं तद्विजानीयादितरत्सुखनाशनम् ।

चित्तादिसर्वभावेषु ब्रह्मत्वेनैव भावनात् ॥ ११४ ॥
निरोधः सर्ववृत्तीनां प्राणायामः स उच्यते ।
निषेधनं प्रपंचस्य रेचकाख्यः समीरणः ॥ ११५ ॥
ब्रह्मैवास्मीति या वृत्तिः पूरको वायुरीरितः ।
ततस्तद्वृत्तिनैश्चल्यं कुंभकः प्राणसंयमः ॥ ११६ ॥
अयं चापि प्रबुद्धानामज्ञानां प्राणपीडनम् ।
विषयेष्वात्मतां त्यक्त्वा मनसाश्चिति मज्जनम् ॥ ११७ ॥
प्रत्याहारः स विज्ञेयोऽभ्यसनीयो मुमुक्षुभिः ।
यत्र यत्र मनो याति ब्रह्मणस्तत्र दर्शनात् ॥ ११८ ॥
मनसो धारणं चैव धारणा सा परा मता ।
ब्रह्मैवास्मीति सद्वृत्त्या निरालंबतया स्थितिः ॥ ११९ ॥
ध्यानशब्देन विख्याता परमानंददायिनी ।
निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः ॥ १२० ॥
वृत्तिविस्मरणं सम्यक्समाधिर्ध्यानसंज्ञिकः ।
समाधौ क्रियमाणे तु विघ्ना ह्यायान्ति वै बलात् ॥ १२१ ॥
अनुसंधानराहित्यमालस्यं भोगलालसम् ।
भयं तमश्च विक्षेपस्तेजःस्पंदश्च शून्यता ॥ १२२ ॥
एवं यद्विघ्नबाहुल्यं त्याज्यं तद्ब्रह्मविज्जनैः ।
विघ्नानेतान्परित्यक्त्वा प्रमादरहितो वशी ।
समाधिनिष्ठया ब्रह्म साक्षाद्भवितुमर्हसि ॥ १२३ ॥
इति गुरुवचनाच्छ्रुतिप्रमाणा-
त्परमवगम्य स्वतत्त्वमात्मयुक्त्या ।
प्रशमितकरणः समाहितात्मा
क्वचिदचलाकृतिरात्मनिष्ठितोऽभूत् ॥ १२४ ॥
बहुकालं समाधाय स्वस्वरूपे तु मानसम् ।

उत्थाय परमानंदाद्गुरुमेत्य पुनर्मुदा ॥
प्रमाणपूर्वकं धीमान्सगद्गदमुवाच ह ॥९२५॥
नमो नमस्ते गुरवे नित्यानंदस्वरूपिणे ।
मुक्तसंगाय शांताय त्यक्ताहंताय ते नमः ॥ ९२६ ॥
दयाधाम्ने नमो भूम्ने महिम्नः पारमस्य ते ।
नैवास्ति यत्कटाक्षेण ब्रह्मैवाभवमद्वयम् ॥ ९२७ ॥
किं करोमि क्व गच्छामि किं गृह्णामि त्यजामि किम् ।
यन्मया पूरितं विश्वं महाकल्पांबुना यथा ॥ ९२८ ॥
मयि सुखबोधपयोधौ महति ब्रह्मांडबुद्बुदसहस्रम् ।
मायामयेन मरुता भूत्वा भूत्वा पुनस्तिरोधत्ते ॥ ९२९ ॥
नित्यानंदस्वरूपोऽहमात्माहं त्वदनुग्रहात् ।
पूर्णोऽहमनवद्योऽहं केवलोऽहं च सद्गुरो ॥ ९३० ॥
अकर्ताहमभोक्ताहमविकारोऽहमक्रियः ।
आनंदघन एवाहमसंगोऽहं सदाशिवः ॥ ९३१ ॥
त्वत्कटाक्षवरचांद्रचंद्रिकापातधूतभवतापजः श्रमः ।
प्राप्तवानहमखंडवैभवानंदमात्मपदमक्षयं क्षणात् ॥ ९३२ ॥
छायया स्पृष्टमुष्णं वा शीतं वा दुष्टु सुष्ठु वा ।
न स्पृशत्येव यत्किंचित्पुरुषं तद्विलक्षणम् ॥ ९३३ ॥
न साक्षिणं साक्ष्यधर्मा न स्पृशन्ति विलक्षणम् ।
अविकारमुदासीनं गृहधर्माः प्रदीपवत् ॥ ९३४ ॥
रवेर्यथा कर्मणि साक्षिभावो
वह्नेर्यथा वायसि दाहकत्वम् ।
रज्जोर्यथारोपितवस्तुसंग-
स्तथैव कूटस्थचिदात्मनो मे ॥ ९३५ ॥
इत्युक्त्वा स गुरुं स्तुत्वा प्रश्रयेण कृतानतिः ।

मुमुक्षोरुपकाराय प्रष्टव्यांशमपृच्छत ॥ १३६ ॥
जीवन्मुक्तस्य भगवन्ननुभूतेश्च लक्षणम् ।
विदेहमुक्तस्य च मे कृपया ब्रूहि तत्त्वतः ॥ १३७ ॥

श्रीगुरुः—

वक्ष्ये तुभ्यं ज्ञानभूमिकाया लक्षणमादितः ।
ज्ञाने यस्मिंस्त्वया सर्वं ज्ञातं स्यात्पृष्टमद्य यत् ॥ १३८ ॥
ज्ञानभूमिः शुभेच्छा स्यात्प्रथमा समुदीरिता ।
विचारणा द्वितीया तु तृतीया तनुमानसी ॥ १३९ ॥
सत्त्वापत्तिश्चतुर्थी स्यात्ततोऽसंसक्तिनामिका ।
पदार्थाभावना षष्ठी सप्तमी तुर्यगा स्मृता ॥ १४० ॥
स्थितः किं मूढ एवास्मि प्रेक्ष्योऽहं शास्त्रसज्जनैः ।
वैराग्यपूर्वमिच्छेति शुभेच्छा चोच्यते बुधैः ॥ १४१ ॥
शास्त्रसज्जनसंपर्कवैराग्याभ्यासपूर्वकम् ।
सदाचारप्रवृत्तिर्या प्रोच्यते सा विचारणा ॥ १४२ ॥
विचारणाशुभेच्छाभ्यामिंद्रियार्थेष्वरक्तता ।
यत्र सा तनुतामेति प्रोच्यते तनुमानसी ॥ १४३ ॥
भूमिकात्रितयाभ्यासाच्चित्तेऽर्थविरतेर्वशात् ।
सत्त्वात्मनि स्थिते शुद्धे सत्त्वापत्तिरुदाहृता ॥ १४४ ॥
दयाचतुष्टयाभ्यासादसंसर्गफला तु या ।
रूढसत्त्वचमत्कारा प्रोक्ता संसक्तिनामिका ॥ १४५ ॥
भूमिकापंचकाभ्यासात्स्वात्मारामतया भृशम् ।
आभ्यंतराणां बाह्यानां पदार्थानामभावनात् ॥ १४६ ॥
परप्रयुक्तेन चिरप्रयत्नेनावबोधनम् ।
पदार्थाभावना नाम षष्ठी भवति भूमिका ॥ १४७ ॥
षड्भूमिकाचिराभ्यासाद्भेदस्यानुपलंभनात् ।

यत्स्वभावैकनिष्ठत्वं सा ज्ञेया तुर्यगा गतिः ॥ ९४८ ॥
इदं ममेति सर्वेषु दृश्यभावेष्वभावना ।
जाग्रज्जाग्रदिति प्राहुर्महान्तो ब्रह्मवित्तमाः ॥ ९४९ ॥
विदित्वा सच्चिदानंदे मयि दृश्यपरंपराम् ।
नामरूपपरित्यागो जाग्रत्स्वप्नः समीर्यते ॥ ९५० ॥
परिपूर्णचिदाकाशे मयि बोधात्मतां विना ।
न किंचिदन्यदस्तीति जाग्रत्सुप्तिः समीर्यते ॥ ९५१ ॥
मूलाज्ञानविनाशेन कारणाभासचेष्टितैः ।
बंधो न मेऽतिस्वल्पोऽपि स्वप्नजाग्रदितीर्यते ॥ ९५२ ॥
कारणाज्ञाननाशाद्यद्द्रष्टृदर्शनदृश्यता ।
न कार्यमस्ति तज्ज्ञानं स्वप्नस्वप्नः समीर्यते ॥ ९५३ ॥
अतिसूक्ष्मविमर्शेन स्वधीवृत्तिरचंचला ।
विलीयते यदा बोधे स्वप्नसुप्तिरितीर्यते ॥ ९५४ ॥
चिन्मयाकारमतयो धीवृत्तिप्रसरैर्गतः ।
आनंदानुभवो विद्वन् सुप्तिजाग्रदितीर्यते ॥ ९५५ ॥
वृत्तौ चिरानुभूतांतरानंदानुभवस्थितौ ।
समात्मतां यो यात्येष सुप्तिस्वप्न इतीर्यते ॥ ९५६ ॥
दृश्यधीवृत्तिरेतस्य केवलीभावभावना ।
परं बोधैकतावाप्तिः सुप्तिसुप्तिरितीर्यते ॥ ९५७ ॥
परब्रह्मवदाभाति निर्विकारैकरूपिणी ।
सर्वावस्थासु धरैका तुर्याख्या परिकीर्तिता ॥ ९५८ ॥
इत्यवस्थासमुल्लासं विमृशन्मुच्यते सुखी ।
शुभेच्छादित्रयं भूमिभेदाभेदयुतं स्मृतम् ॥ ९५९ ॥
यथावद्भेदबुद्ध्येदं जगज्जाग्रदितीर्यते ।
अद्वैते स्थैर्यमायाते द्वैते च प्रशमं गते ॥ ९६० ॥

पश्यन्ति स्वप्नवल्लोकं तुर्यभूमिसुयोगतः ।
पंचमीं भूमिमारुह्य सुषुप्तिपदनामिकाम् ॥ ९६१ ॥
शांताशेषविशेषांशस्तिष्ठेदद्वैतमात्रके ।
अंतर्मुखतया नित्यं षष्ठीं भूमिमुपाश्रितः ॥ ९६२ ॥
परिश्रांततया गाढनिद्रालुरिव लक्ष्यते ।
कुर्वन्नभ्यासमेतस्यां भूम्यां सम्यग्विवासनः ॥ ९६३ ॥
तुर्यावस्थां सप्तभूमिं क्रमात्प्राप्नोति योगिराट् ।
विदेहमुक्तिरेवात्र तुर्यातीतदशोच्यते ॥ ९६४ ॥
यत्र नासन्न सच्चापि नाहं नाप्यनहंकृतिः ।
केवलं क्षीणमनन आस्तेऽद्वैतेऽतिनिर्भयः ॥ ९६५ ॥
अंतःशून्यो बहिःशून्यः शून्यकुंभ इवांबरे ।
अंतःपूर्णो बहिःपूर्णः पूर्णकुंभ इवार्णवे ॥ ९६६ ॥
यथास्थितमिदं सर्वं व्यवहारवतोऽपि च ।
अस्तं गतं स्थितं व्योम स जीवन्मुक्त उच्यते ॥ ९६७ ॥
नोदेति नास्तमायाति सुखदुःखे मनःप्रभा ।
यथाप्राप्तस्थितिर्यस्य स जीवन्मुक्त उच्यते ॥ ९६८ ॥
यो जागर्ति सुषुप्तिस्थो यस्य जाग्रन्न विद्यते ।
यस्य निर्वासनो बोधः स जीवन्मुक्त उच्यते ॥ ९६९ ॥
रागद्वेषभयादीनामनुरूपं चरन्नपि ।
योंऽतर्व्योमवदत्यच्छः स जीवन्मुक्त उच्यते ॥ ९७० ॥
यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
कुर्वतोऽकुर्वतो वापि स जीवन्मुक्त उच्यते ॥ ९७१ ॥
यः समस्तार्थजालेषु व्यवहार्यपि शीतलः ।
परार्थेष्विव पूर्णात्मा स जीवन्मुक्त उच्यते ॥ ९७२ ॥
द्वैतवर्जितचिन्मात्रे पदे परमपावने ।

अक्षुब्धचित्तविश्रान्तः स जीवन्मुक्त उच्यते ॥ ९७३ ॥
इदं जगदयं सोऽयं दृश्यजातमवास्तवम् ।
यस्य चित्ते न स्फुरति स जीवन्मुक्त उच्यते ॥ ९७४ ॥
चिदात्माहं परात्माहं निर्गुणोऽहं परात्परः ।
आत्ममात्रेण यस्तिष्ठेत्स जीवन्मुक्त उच्यते ॥ ९७५ ॥
देहत्रयातिरिक्तोऽहं शुद्धचैतन्यमस्म्यहम् ।
ब्रह्माहमिति यस्यान्तः स जीवन्मुक्त उच्यते ॥ ९७६ ॥
यस्य देहादिकं नास्ति यस्य ब्रह्मेति निश्चयः ।
परमानंदपूर्णो यः स जीवन्मुक्त उच्यते ॥ ९७७ ॥
अहं ब्रह्मास्म्यहं ब्रह्मास्म्यहं ब्रह्मेति निश्चयः ।
चिदहं चिदहं चेति स जीवन्मुक्त उच्यते ॥ ९७८ ॥
जीवन्मुक्तिपदं त्यक्त्वा स्वदेहे कालसात्कृते ।
विशत्यदेहमुक्तित्वं पवनोऽस्पंदतामिव ॥ ९७९ ॥
ततस्तत्संबभूवासौ यद्गिरामप्यगोचरम् ।
यच्छून्यवादिनां शून्यं ब्रह्म ब्रह्मविदां च यत् ॥ ९८० ॥
विज्ञानं विज्ञानविदां मलानां च मलात्मकम् ।
पुरुषः सांख्यदृष्टीनामीश्वरो योगवादिनाम् ॥ ९८१ ॥
शिवः शैवागमस्थानां कालः कालैकवादिनाम् ।
यत्सर्वशास्त्रसिद्धान्तं यत्सर्वहृदयानुगम् ।
यत्सर्वं सर्वगं वस्तु तत्तत्त्वं तदसौ स्थितः ॥ ९८२ ॥
ब्रह्मैवाहं चिदेवाहमेवं वापि न चिंत्यते ।
चिन्मात्रेव यस्तिष्ठेद्विदेहो मुक्त एव सः ॥ ९८३ ॥
यस्य प्रपंचभानं न ब्रह्माकारमपीह न ।
अतीतातीतभावो यो विदेहो मुक्त एव सः ॥ ९८४
चित्तवृत्तेरतीतो यश्चित्तवृत्त्यावभासकः ।

चित्तवृत्तिविहीनो यो विदेहो मुक्त एव सः ।। ९८५ ।।
जीवात्मेति परात्मेति सर्वचिंताविवर्जितः ।
सर्वसंकल्पहीनात्मा विदेहो मुक्त एव सः ।। ९८६ ।।
ओंकारवाच्यहीनात्मा सर्ववाच्यविवर्जितः ।
अवस्थात्रयहीनात्मा विदेहो मुक्त एव सः ।। ९८७ ।।
अहिनिर्ल्वयनीसर्पनिर्मोको जीववर्जितः ।
वल्मीके पतितस्तिष्ठेत्तं सर्पो नाभिमन्यते ।।९८८।।
एवं स्थूलं च सूक्ष्मं च शरीरं नाभिमन्यते ।
प्रत्यग्ज्ञानशिखिध्वस्ते मिथ्याज्ञाने सहेतुके ।।९८९।।
नेति नेतीत्यरूपत्वादशरीरो भवत्ययम् ।
विश्वश्च तैजसश्चैव प्राज्ञश्चेति च ते त्रयम् ।।९९०।।
विराड् हिरण्यगर्भश्चेश्वरश्चेति च ते त्रयम् ।
ब्रह्मांडं चैव पिंडांडं लोका भूरादयः क्रमात् ।।९९१।।
स्वस्वोपाधिलयादेव लीयन्ते प्रत्यगात्मनि ।
तूष्णीमेव ततस्तूष्णीं तूष्णीं सत्यं न किंचन ।।९९२।।
कालभेदं वस्तुभेदं देशभेदं स्वभेदकम् ।
किंचिद्भेदं न तस्यास्ति किंचिद्वापि न विद्यते ।।९९३।।
जीवेश्वरेति वाक्ये च वेदशास्त्रेष्वहं त्विति ।
इदं चैतन्यमेवेत्यहं चैतन्यमित्यपि ।।९९४।।
इति निश्चयशून्यो यो विदेहो मुक्त एव सः ।
ब्रह्मैव विद्यते साक्षाद्वस्तुतोऽवस्तुतोऽपि च ।।९९५।।
तद्विद्या विषयं ब्रह्म सत्यज्ञानसुखात्मकम् ।
शान्तं च तदतीतं च परं ब्रह्म तदुच्यते ।।९९६।।
सिद्धान्तोऽध्यात्मशास्त्राणां सर्वापह्नव एव हि ।
नाविद्यास्तीह नो माया शांतं ब्रह्मैव तद्विना ।।९९७।।

प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम् ।
विसृज्य ध्यानयोगेन ब्रह्माप्येति सनातनम् ॥९९८॥
यावद्यावच्च सद्‌बुद्धे स्वयं संत्यज्यतेऽखिलम् ।
तावत्तावत्परानंदः परमात्मैव शिष्यते ॥९९९॥
यत्र यत्र मृतो ज्ञानी परमाक्षरवित्सदा ।
परे ब्रह्मणि लीयेत न तस्योत्क्रांतिरिष्यते ॥ १००० ॥
यद्यत्स्वाभिमतं वस्तु तत्त्यजन्मोक्षमश्नुते ।
असंकल्पेन शस्त्रेण छिन्नं चित्तमिदं यदा ॥१००१॥
सर्वं सर्वगतं शांतं ब्रह्म संपद्यते तदा ।
इति श्रुत्वा गुरोर्वाक्यं शिष्यस्तु छिन्नसंशयः ॥१००२॥
ज्ञातज्ञेयः संप्रणम्य सद्गुरोश्चरणांबुजम् ।
स तेन समनुज्ञातो ययौ निर्मुक्तबंधनः ॥१००३॥
गुरुरेष सदानंदसिंधौ निर्मग्नमानसः ।
पावयन्वसुधां सर्वां विचचार निरुत्तरः ॥१००४॥
इत्याचार्यस्य शिष्यस्य संवादेनात्मलक्षणम् ।
निरूपितं मुमुक्षूणां सुखबोधोपपत्तये ॥१००५॥
सर्ववेदांतसिद्धांतसारसंग्रहनामकः ।
ग्रंथोऽयं हृदयग्रंथिविच्छित्त्यै रचितः सताम् ॥१००६॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ सर्ववेदान्तसिद्धान्तसारसंग्रहः संपूर्णः ॥

———

।। विवेकचूडामणिः ।।

सर्ववेदांतसिद्धांतगोचरं तमगोचरम् ।
गोविंदं परमानंदं सद्गुरुं प्रणतोऽस्म्यहम् ॥ १ ॥

जंतूनां नरजन्म दुर्लभमतः पुंस्त्वं ततो विप्रता
तस्माद्वैदिकधर्ममार्गपरता विद्वत्त्वमस्मात्परम् ।
आत्मानात्मविवेचनं स्वनुभवो ब्रह्मात्मना संस्थिति-
र्मुक्तिर्नो शतजन्मकोटिसुकृतैः पुण्यैर्विना लभ्यते ॥ २ ॥

दुर्लभं त्रयमेवैतद्देवानुग्रहहेतुकम् ।
मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रयः ॥ ३॥

लब्ध्वा कथंचिन्नरजन्म दुर्लभं तत्रापि पुंस्त्वं श्रुतिपारदर्शनम् ।
यस्त्वात्ममुक्तो न यतेत मूढधीः
स ह्यात्महा स्वं विनिहन्त्यसद्ग्रहात् ॥ ४ ॥

इतः कोऽन्वरित मूढात्मा यस्तु स्वार्थे प्रमाद्यति ।
दुर्लभं मानुषं देहं प्राप्य तत्रापि पौरुषम् ॥ ५ ॥

वदन्तु शास्त्राणि यजन्तु देवान्कुर्वन्तु कर्माणि भजन्तु देवताः ।
आत्मैक्यबोधेन विनापि मुक्तिर्न सिध्यति ब्रह्मशतान्तरेऽपि ॥६॥

अमृतत्वस्य नाशास्ति वित्तेनेत्येव हि श्रुतिः ।
ब्रवीति कर्मणो मुक्तेरहेतुत्वं स्फुटं यतः ॥ ७ ॥

अतो विमुक्त्यै प्रयतेत विद्वान्संन्यस्तबाह्यार्थसुखस्पृहः सन् ।
संतं महांतं समुपेत्य देशिकं तेनोपदिष्टार्थसमाहितात्मा ॥ ८ ॥

उद्धरेदात्मनात्मानं मग्नं संसारवारिधौ ।
योगारूढत्वमासाद्य सम्यग्दर्शननिष्ठया ॥ ९ ॥

संन्यस्य सर्वकर्माणि भवबंधविमुक्तये ।
यत्यतां पंडितैर्धीरैरात्माभ्यास उपस्थितैः ॥ १० ॥

चित्तस्य शुद्धये कर्म न तु वस्तूपलब्धये ।
वस्तुसिद्धिर्विचारेण न किंचित्कर्मकोटिभिः ॥११॥
सम्यग्विचारतः सिद्धा रज्जुतत्त्वावधारणा ।
भ्रांतोदितमहासर्प—भयदुःखविनाशिनी ॥१२॥
अर्थस्य निश्चयो दृष्टो विचारेण हितोक्तितः ।
न स्नानेन न दानेन प्राणायामशतेन वा ॥१३॥
अधिकारिणमाशास्ते फलसिद्धिर्विशेषतः ।
उपाया देशकालाद्याः संत्यस्मिन्सहकारिणः ॥१४॥
अतो विचारः कर्तव्यो जिज्ञासोरात्मवस्तुतः ।
समासाद्य दयासिंधुं गुरुं ब्रह्मविदुत्तमम् ॥१५॥
मेधावी पुरुषो विद्वानूहापोहविचक्षणः ।
अधिकार्यात्मविद्यायामुक्तलक्षणलक्षितः ॥१६॥
विवेकिनो विरक्तस्य शमादिगुणशालिनः ।
मुमुक्षोरेव हि ब्रह्मजिज्ञासायोग्यता मता ॥१७॥
साधनान्यत्र चत्वारि कथितानि मनीषिभिः ।
येषु सत्स्वेव सन्निष्ठा यदभावे न सिध्यति ॥१८॥
आदौ नित्यानित्यवस्तुविवेकः परिगण्यते ।
इहामुत्रफलभोगविरागस्तदनंतरम् ॥१९॥
शमादिषट्कसंपत्तिर्मुमुक्षुत्वमिति स्फुटम् ।
ब्रह्म सत्यं जगन्मिथ्येत्येवंरूपो विनिश्चयः ॥२०॥
सोऽयं नित्यानित्यवस्तुविवेकः समुदाहृतः ।
तद्वैराग्यं जिहासा या दर्शनश्रवणादिभिः ॥२१॥
देहादिब्रह्मपर्यंते ह्यनित्ये भोगवस्तुनि ।
विरज्य विषयव्राताद्दोषदृष्ट्या मुहुर्मुहुः ॥२२॥
स्वलक्ष्ये नियतावस्था मनसः शम उच्यते ।

विषयेभ्यः परावर्त्य स्थापनं स्वस्वगोलके ॥२३॥
उभयेषामिंद्रियाणां स दमः परिकीर्तितः ।
बाह्यानालंबनं वृत्तेरेषोपरतिरुत्तमा ॥२४॥
सहनं सर्वदुःखानामप्रतीकारपूर्वकम् ।
चिंताविलापरहितं सा तितिक्षा निगद्यते ॥२५॥
शास्त्रस्य गुरुवाक्यस्य सत्यबुद्ध्यवधारणम् ।
सा श्रद्धा कथिता सद्भिर्यया वस्तूपलभ्यते ॥२६॥
सर्वदा स्थापनं बुद्धेः शुद्धे ब्रह्मणि सर्वदा ।
तत्समाधानमित्युक्तं न तु चित्तस्य लालनम् ॥२७॥
अहंकारादिदेहांतान्बंधानज्ञानकल्पितान् ।
स्वस्वरूपावबोधेन मोक्तुमिच्छा मुमुक्षुता ॥२८॥
मंदमध्यमरूपापि वैराग्येण शमादिना ।
प्रसादेन गुरोः सेयं प्रवृद्धा सूयते फलम् ॥२९॥
वैराग्यं च मुमुक्षुत्वं तीव्रं यस्य तु विद्यते ।
तस्मिन्नेवार्थवन्तः स्युः फलवंतः शमादयः ॥३०॥
एतयोर्मंदता यत्र विरक्तत्वमुमुक्षयोः ।
मरौ सलिलवत्तत्र शमादेर्भासमात्रता ॥३१॥
मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी ।
स्वस्वरूपानुसंधानं भक्तिरित्यभिधीयते ॥३२॥
स्वात्मतत्त्वानुसंधानं भक्तिरित्यपरे जगुः ।
उक्तसाधनसंपन्नस्तत्त्वजिज्ञासुरात्मनः ॥३३॥
उपसीदेद्गुरुं प्राज्ञं यस्माद्बंधविमोक्षणम् ।
श्रोत्रियोऽवृजिनोऽकामहतो यो ब्रह्मवित्तमः ॥३४॥
ब्रह्मण्युपरतः शांतो निरिंधन इवानलः ।
अहेतुकदयासिंधुर्बंधुरानमतां सताम् ॥३५॥

तमाराध्य गुरुं भक्त्या प्रह्वप्रश्रयसेवनैः ।
प्रसन्नं तमनुप्राप्य पृच्छेज्ज्ञातव्यमात्मनः ॥३६॥

स्वामिन्नमस्ते नतलोकबंधो कारुण्यसिंधो पतितं भवाब्धौ ।
मामुद्धरात्मीयकटाक्षदृष्ट्या ऋज्व्यातिकारुण्यसुधाभिवृष्ट्या ॥३७॥

दुर्वारसंसारदवाग्नितप्तं दोधूयमानं दुरदृष्टवातैः ।
भीतं प्रपन्नं परिपाहि मृत्योः शरण्यमन्यद्यदहं न जाने ॥३८॥

शांता महांतो निवसंति संतो वसंतवल्लोकहितं चरंतः ।
तीर्णाः स्वयं भीमभवार्णवं जना न हेतुनान्यानपि तारयन्तः ॥३९॥

अयं स्वभावः स्वत एव यत्परश्रमापनोदप्रवणं महात्मनाम् ।
सुधांशुरेष स्वयमर्ककर्कशप्रभाभितप्तामवति क्षितिं किल ॥४०॥

ब्रह्मानंदरसानुभूतिकलितैः पूतैः सुशीतैर्युतै-
र्युष्मद्वाक्कलशोज्झितैः श्रुतिसुखैर्वाक्यामृतैः सेचय ।
संतप्तं भवतापदावदहनज्वालाभिरेनं प्रभो
धन्यास्ते भवदीक्षणक्षणगतेः पात्रीकृताः स्वीकृताः ॥४१॥

कथं तरेयं भवसिंधुमेतं का वा गतिर्मे कतमोऽस्त्युपायः ।
जाने न किंचित्कृपयात्र मां प्रभो संसारदुःखक्षतिमातनुष्व ॥४२॥

तथा वदंतं शरणागतं स्वं संसारदावानलतापतप्तम् ।
निरीक्ष्य कारुण्यरसार्द्रदृष्ट्या दद्यादभीतिं सहसा महात्मा ॥४३॥

विद्वान्स तस्मा उपसत्तिमीयुषे मुमुक्षवे साधु यथोक्तकारिणे ।
प्रशांतचित्ताय शमान्विताय तत्त्वोपदेशं कृपयैव कुर्यात् ॥४४॥

श्रीगुरुरुवाच —

मा भैष्ट विद्वंस्तव नास्त्यपायः संसारसिंधोस्तरणेऽस्त्युपायः ।
येनैव याता यतयोऽस्य पारं तमेव मार्गं तव निर्दिशामि ॥४५॥

अस्त्युपायो महान्कश्चित्संसारभयनाशनः ।
तेन तीर्त्वा भवांभोधिं परमानंदमाप्स्यसि ॥४६॥

वेदांतार्थविचारेण जायते ज्ञानमुत्तमम् !
तेनात्यंतिकसंसारदुःखनाशो भवत्यनु ॥४७॥
श्रद्धाभक्तिध्यानयोगान्मुमुक्षोर्मुक्तेर्हेतून्वाक्ति साक्षाच्छ्रुतेर्गीः ।
यो वा एतेष्वेव तिष्ठत्यमुष्य मोक्षोऽविद्याकल्पितादेहबंधात् ॥४८॥
अज्ञानयोगात्परमात्मनस्तव ह्यनात्मबंधस्तव एव संसृतिः ।
तयोर्विवेकोदितबोधवह्निरज्ञानकार्यं प्रदहेत्समूलम् ॥४९॥

शिष्य उवाच—

कृपया श्रूयतां स्वामिन् प्रश्नोऽयं क्रियते मया ।
तदुत्तरमहं श्रुत्वा कृतार्थः स्यां भवन्मुखात् ॥५०॥
को नाम बंधः कथमेष आगतः कथं प्रतिष्ठास्य कथं विमोक्षः ।
कोऽसावनात्मा परमः स्व आत्मा तयोर्विवेकः कथमेतदुच्यताम् ॥५१॥

श्रीगुरुरुवाच —

धन्योऽसि कृतकृत्योऽसि पावितं ते कुलं त्वया ।
यदविद्याबंधमुक्त्या ब्रह्मीभवितुमिच्छसि ॥५२॥
ऋणमोचनकर्तारः पितुः संति सुतादयः ।
बंधमोचनकर्ता तु स्वस्मादन्यो न कश्चन ॥५३॥
मस्तकन्यस्तभारादेर्दुःखमन्यैर्निवार्यते ।
क्षुधादिकृतदुःखं तु विना स्वेन न केनचित् ॥५४॥
पथ्यमौषधसेवा च क्रियते येन रोगिणा ।
आरोग्यसिद्धिर्दृष्टास्य नान्यानुष्ठितकर्मणा ॥५५॥
वस्तुस्वरूपं स्फुटबोधचक्षुषा स्वेनैव वेद्यं न तु पंडितेन ।
चंद्रस्वरूपं निजचक्षुषैव ज्ञातव्यमन्यैरवगम्यते किम् ॥५६॥
अविद्याकामकर्मादिपाशबंधं विमोचितुम् ।
कः शक्नुयाद्विनात्मानं कल्पकोटिशतैरपि ॥५७॥
न योगेन न सांख्येन कर्मणा नो न विद्यया ।

ब्रह्मात्मैकत्वबोधेन मोक्षः सिध्यति नान्यथा ॥५८॥
वीणाया रूपसौंदर्यं तंत्रीवादनसौष्ठवम् ।
प्रजारंजनमात्रं तन्न साम्राज्याय कल्पते ॥५९॥
वाग्वैखरी शब्दझरी शास्त्रव्याख्यातकौशलम् ।
वैदुष्यं विदुषां तद्वद्भुक्तये न तु मुक्तये ॥६०॥
अविज्ञाते परे तत्त्वे शास्त्राधीतिस्तु निष्फला ।
विज्ञातेऽपि परे तत्त्वे शास्त्राधीतिस्तु निष्फला ॥६१॥
शब्दजालं महारण्यं चित्तभ्रमणकारणम् ।
अतः प्रयत्नाज्ज्ञातव्यं तत्वज्ञात्तत्त्वमात्मनः ॥६२॥
अज्ञानसर्पदष्टस्य ब्रह्मज्ञानौषधं विनां ।
किमु वेदैश्च शास्त्रैश्च किमु मंत्रैः किमौषधैः ॥६३॥
न गच्छति विना पानं व्याधिरौषधशब्दतः ।
विनापरोक्षानुभवं ब्रह्मशब्दैर्न मुच्यते ॥६४॥
अकृत्वा दृश्यविलयमज्ञात्वा तत्त्वमात्मनः ।
बाह्यशब्दैः कुतो मुक्तिरुक्तिमात्रफलैर्नृणाम् ॥ ६५ ॥
अकृत्वा शत्रुसंहारमगत्वाखिलभूश्रियम् ।
राजाहमिति शब्दान्नो राजा भवितुमर्हति ॥ ६६ ॥
आप्तोक्तिं खननं तथोपरि शिलाद्युत्कर्षणं स्वीकृतिं
निक्षेपः समपेक्षते नहि बहिः शब्दैस्तु निर्गच्छति ॥
तद्वत् ब्रह्मविदोपदेशमननध्यानादिभिर्लभ्यते
मायाकार्यतिरोहितं स्वममलं तत्त्वं न दुर्युक्तिभिः ॥ ६७ ॥
तस्मात्सर्वप्रयत्नेन भवबंधविमुक्तये ।
स्वैरेव यत्नः कर्तव्यो रोगादाविव पंडितैः ॥ ६८ ॥
यस्त्वयाद्य कृतः प्रश्नो वरीयाञ्छास्त्रविन्मतः ।
सूत्रप्रायो निगूढार्थो ज्ञातव्यश्च मुमुक्षुभिः ॥ ६९ ॥

शृणुष्वावहितो विद्वन्यन्मया समुदीर्यते ।
तदेतच्छ्रवणात्सत्यं भवबंधाद्विमोक्ष्यसे ॥ ७० ॥
मोक्षस्य हेतुः प्रथमो निगद्यते वैराग्यमत्यंतमनित्यवस्तुषु ।
ततः शमश्चापि दमस्तितिक्षा न्यासः प्रसक्ताखिलकर्मणां भृशम् ॥७१॥
ततः श्रुतिस्तन्मननं सतत्त्वध्यानं चिरं नित्यनिरंतरं मुनेः ।
ततोऽविकल्पं परमेत्य विद्वानिहैव निर्वाणसुखं समृच्छति ॥ ७२ ॥
यद्बोद्धव्यं तवेदानीमात्मानात्मविवेचनम् ।
तदुच्यते मया सम्यक् श्रुत्वात्मन्यवधारय ॥ ७३ ॥
मज्जास्थिमेदःपलरक्तचर्मत्वगाह्वयैर्धातुभिरेभिरन्वितम् ।
पादोरुवक्षोभुजपृष्ठमस्तकैरंगैरुपांगैरुपयुक्तमेतत् ॥ ७४ ॥
अहंममेति प्रथितं शरीरं मोहास्पदं स्थूलमितीर्यते बुधैः ।
नभोनभस्वद्दहनांबुभूमयः सूक्ष्माणि भूतानि भवंति तानि ॥ ७५ ॥
परस्परांशैर्मिलितानि भूत्वा स्थूलानि च स्थूलशरीरहेतवः ।
मंत्रास्तदीया विषया भवन्ति शब्दादयः पंच सुखाय भोक्तुः ॥७६॥
य एषु मूढा विषयेषु बद्धा रागोरुपाशेन सुदुर्दमेन ।
आयांति निर्यात्यध ऊर्ध्वमुच्चैः स्वकर्मदूतेन जवेन नीताः ॥ ७७ ॥
शब्दादिभिः पंचभिरेव पंच पंचत्वमापुः स्वगुणेन बद्धाः
कुरंगमातंगपतंगमीनभृंगा नरः पंचभिरंचितः किम् ॥ ७८ ॥
दोषेण तीव्रो विषयः कृष्णसर्पविषादपि ।
विषं निहंति भोक्तारं द्रष्टारं चक्षुषाप्ययम् ॥ ७९ ॥
विषयाशामहापाशाद्यो विमुक्तः सुदुस्त्यजात् ।
स एव कल्पते मुक्त्यै नान्यः षट्शास्त्रवेद्यपि ॥ ८० ॥
आपातवैराग्यवतो मुमुक्षून् भवाब्धिपारं प्रतियातुमुद्यतान् ।
आशाग्रहो मज्जयतेऽन्तराले निगृह्य कंठे विनिवर्त्य वेगात् ॥ ८१ ॥
विषयाशाग्रहो येन सुविरक्त्यसिना हतः ।

स गच्छति भवांभोधेः पारं प्रत्यूहवर्जितः ॥ ८२ ॥

विषमविषयमार्गैर्गच्छतोऽनच्छबुद्धेः
प्रतिपदमभियातो मृत्युरप्येष विद्धि ।
हितसुजनगुरूक्त्या गच्छतः स्वस्य युक्त्या
प्रभवति फलसिद्धिः सत्यमित्येव विद्धि ॥ ८३ ॥

मोक्षस्य कांक्षा यदि वै तवास्ति त्यजातिदूराद्विषयान्विषं यथा ।
पीयूषवत्तोषदयाक्षमार्जवप्रशांतिदान्तीर्भज नित्यमादरात् ॥ ८४ ॥

अनुक्षणं यत्परिहृत्य कृत्यमनाद्यविद्याकृतबंधमोक्षणम् ।
देहः परार्थोऽयममुष्य पोषणे यः सज्यते स स्वमनेन हंति ॥ ८५ ॥

शरीरपोषणार्थी सन् य आत्मानं दिदृक्षति ।
ग्राहं दारुधिया धृत्वा नदीं तर्तुं स गच्छति ॥ ८६ ॥

मोह एव महामृत्युर्मुमुक्षोर्वपुरादिषु ।
मोहो विनिर्जितो येन स मुक्तिपदमर्हति ॥ ८७ ॥

मोहं जहि महामृत्युं देहदारसुतादिषु ।
यं जित्वा मुनयो यांति तद्विष्णोः परमं पदम् ॥ ८८ ॥

त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंकुलम् ।
पूर्णं मूत्रपुरीषाभ्यां स्थूलं निंद्यमिदं वपुः ॥ ८९ ॥

पंचीकृतेभ्यो भूतेभ्यः स्थूलेभ्यः पूर्वकर्मणा ।
समुत्पन्नमिदं स्थूलं भोगायतनमात्मनः ।
अवस्था जागरस्तस्य स्थूलार्थानुभवो यतः ॥ ९० ॥

बाह्येंद्रियैः स्थूलपदार्थसेवां स्रक्चंदनस्त्र्यादिविचित्ररूपाम् ।
करोति जीवः स्वयमेतदात्मना तस्मात्प्रशस्तिर्वपुषोऽस्य जागरे ॥९१॥

सर्वोऽपि बाह्यसंसारः पुरुषस्य यदाश्रयः ।
विद्धि देहमिदं स्थूलं गृहवद् गृहमेधिनः ॥ ९२ ॥

स्थूलस्य संभवजरामरणानि धर्माः

स्थौल्यादयो बहुविधाः शिशुताद्यवस्थाः ।
वर्णाश्रमादिनियमा बहुधामयाः स्युः
पूजावमानबहुमानमुखा विशेषाः ॥ ९३ ॥
बुद्धींद्रियाणि श्रवणं त्वगक्षि घ्राणं च जिह्वा विषयावबोधनात् ।
वाक्पाणिपादं गुदमप्युपस्थः कर्मेंद्रियाणि प्रवणेन कर्मसु ॥ ९४ ॥
निगद्यतेऽन्तःकरणं मनोधीरहंकृतिश्चित्तमिति स्ववृत्तिभिः ।
अत्राभिमानादहमित्यहंकृतिः स्वार्थानुसंधानगुणेन चित्तम् ॥ ९६ ॥
प्राणापानव्यानोदानसमाना भवत्यसौ प्राणः ।
स्वयमेव वृत्तिभेदाद्विकृतिर्भेदात्सुवर्णसलिलवत् ॥ ९७ ॥
वागादि पंच श्रवणादि पंच प्राणादि पंचाभ्रमुखानि पंच ।
बुद्ध्याद्यविद्यापि च कामकर्मणी पुर्यष्टकं सूक्ष्मशरीरमाहुः ॥ ९८ ॥
इदं शरीरं शृणु सूक्ष्मसंज्ञितं लिंगं त्वपंचीकृतभूतसंभवम् ।
सवासनं कर्मफलानुभावकं स्वाज्ञानतोऽनादिरुपाधिरात्मनः ॥ ९९ ॥
स्वप्नो भवत्यस्य विभक्त्यवस्था स्वमात्रशेषेण विभाति यत्र ।
स्वप्ने तु बुद्धिः स्वयमेव जाग्रत्कालीननानाविधवासनाभिः ॥ १००॥
कर्त्रादिभावं प्रतिपद्य राजते यत्र स्वयं भाति ह्ययं परात्मा ।
धीमात्रकोपाधिरशेषसाक्षी न लिप्यते तत्कृतकर्मलेशैः ।
यस्मादसंगस्तत एव कर्मभिर्न लिप्यते किंचिदुपाधिना कृतैः ॥१०१॥
सर्वव्यापृतिकरणं लिंगमिदं स्याच्चिदात्मनः पुंसः ।
वास्यादिकमिव तक्षणस्तेनैवात्मा भवत्यसंगोऽयम् ॥ १०२ ॥
अंधत्वमंदत्वपटुत्वधर्माः सौगुण्यवैगुण्यवशाद्धि चक्षुषः ।
बाधिर्यमूकत्वमुखास्तथैव श्रोत्रादिधर्मा न तु वेत्तुरात्मनः ॥ १०३ ॥
उच्छ्वासनिःश्वासविजृंभणक्षुत्प्रस्यन्दनाद्युत्क्रमणादिकाः क्रियाः ॥
प्राणादिकर्माणि वदन्ति तज्ज्ञाः प्राणस्य धर्मावशनापिपासे ॥ १०४॥
अंतःकरणमेतेषु चक्षुरादिषु वर्ष्मणि ।

अहमित्यभिमानेन तिष्ठत्याभासतेजसा ॥ १०५ ॥
अहंकारः स विज्ञेयः कर्ता भोक्ताभिमान्ययम् ।
सत्त्वादिगुणयोगेन चावस्थात्रयमश्नुते ॥ १०६ ॥
विषयाणामानुकूल्ये सुखी दुःखी विपर्यये ।
सुखं दुःखं च तद्धर्मः सदानंदस्य नात्मनः ॥ १०७ ॥
आत्मार्थत्वेन हि प्रेयान्विषयो न स्वतः प्रियः ।
स्वत एव हि सर्वेषामात्मा प्रियतमो यतः ॥ १०८ ॥
तत आत्मा सदानंदो नास्य दुःखं कदाचन ।
यत्सुषुप्तौ निर्विषय आत्मानंदोऽनुभूयते ।
श्रुतिः प्रत्यक्षमैतिह्यमनुमानं च जाग्रति ॥ १०९ ॥

अव्यक्तनाम्नी परमेशशक्तिरनाद्यविद्या त्रिगुणात्मिका परा ।
कार्यानुमेया सुधियैव माया यया जगत्सर्वमिदं प्रसूयते ॥ ११० ॥
सन्नाप्यसन्नाप्युभयात्मिका नो भिन्नाप्यभिन्नाप्युभयात्मिका नो ।
सांगाप्यनंगा ह्युभयात्मिका नो महाद्भुताऽनिर्वचनीयरूपा ॥ १११ ॥
शुद्धाद्वयब्रह्मविबोधनाश्या सर्पभ्रमो रज्जुविवेकतो यथा ।
रजस्तमःसत्त्वमिति प्रसिद्धा गुणास्तदीयाः प्रथितैः स्वकार्यैः ॥ ११२ ॥
विक्षेपशक्ती रजसः क्रियात्मिका यतः प्रवृत्तिः प्रसृता पुराणी ।
रागादयोऽस्याः प्रभवन्ति नित्यं दुःखादयो ये मनसो विकाराः ११३
कामः क्रोधो लोभदंभाद्यसूयाहंकारेर्ष्यामत्सराद्यास्तु घोराः ।
धर्मा एते राजसाः पुंप्रवृत्तिर्यस्मादेषा तद्रजो बंधहेतुः ॥ ११४ ॥
एषावृत्तिर्नाम तमोगुणस्य शक्तिर्यया वस्त्ववभासतेऽन्यथा ।
सैषा निदानं पुरुषस्य संसृतेर्विक्षेपशक्तेः प्रणवस्य हेतुः ॥ ११५ ॥

प्रज्ञावानपि पंडितोऽपि चतुरोऽप्यत्यंतसूक्ष्मात्मदृग्
व्यालीढस्तमसा न वेत्ति बहुधा संबोधितोऽपि स्फुटम् ।
भ्रान्त्यारोपितमेव साधु कलयत्यालंबते तद्गुणान् ।

हंतासौ प्रबला दुरंततमसः शक्तिर्महत्यावृतिः ॥ ११६ ॥
अभावना वा विपरीतभावना संभावना विप्रतिपत्तिरस्याः ।
संसर्गयुक्तं न विमुंचति ध्रुवं विक्षेपशक्तिः क्षपयत्यजस्रम् ॥ ११७ ॥
अज्ञानमालस्यजडत्वनिद्राप्रमादमूढत्वमुखास्तमोगुणाः ।
एतैः प्रयुक्तो नहि वेत्ति किंचिन्निद्रालुवत्स्तंभवदेव तिष्ठति ॥ ११८ ॥
सत्त्वं विशुद्धं जलवत्तथापि ताभ्यां मिलित्वा शरणाय कल्पते ।
यत्रात्मबिंबः प्रतिबिंबितः सन्प्रकाशयत्यर्क इवाखिलं जडम् ॥११९॥
मिश्रस्य सत्त्वस्य भवंति धर्मास्त्वमानिताद्या नियमा यमाद्याः ।
श्रद्धा च भक्तिश्च मुमुक्षुता च दैवी च संपत्तिरसन्निवृत्तिः ॥ १२० ॥
विशुद्धसत्त्वस्य गुणाः प्रसादः स्वात्मानुभूतिः परमा प्रशांतिः ।
तृप्तिः प्रहर्षः परमात्मनिष्ठा यया सदानंदरसं समृच्छति ॥ १२१ ॥
अव्यक्तमेतत्त्रिगुणैर्निरुक्तं तत्कारणं नाम शरीरमात्मनः ।
सुषुप्तिरेतस्य विभक्त्यवस्था प्रलीनसर्वेंद्रियबुद्धिवृत्तिः ॥ १२२ ॥
सर्वप्रकारप्रमितिप्रशान्तिर्बीजात्मनावस्थितिरेव बुद्धेः ।
सुषुप्तिरेतस्य किल प्रतीतिः किंचिन्न वेद्मीति जगत्प्रसिद्धेः ॥१२३॥
देहेंद्रियप्राणमनोऽहमादयः सर्वे विकारा विषयाः सुखादयः ।
व्योमादिभूतान्यखिलं च विश्वमव्यक्तपर्यंतमिदं ह्यनात्मा ॥ १२४ ॥
माया मायाकार्यं सर्वं महदादि देहपर्यंतम् ।
असदिदमनात्मकं त्वं विद्धि मरुमरीचिकाकल्पम् ॥ १२५ ॥
अथ ते संप्रवक्ष्यामि स्वरूपं परमात्मनः ।
यद्विज्ञाय नरो बंधान्मुक्तः कैवल्यमश्नुते ॥ १२६ ॥
अस्ति कश्चित्स्वयं नित्यमहंप्रत्ययलंबनः ।
अवस्थात्रयसाक्षी स पंचकोशविलक्षणः ॥ १२७ ॥
यो विजानाति सकलं जाग्रत्स्वप्नसुषुप्तिषु ।
बुद्धितद्वृत्तिसद्भावमभावमहमित्ययम् ॥ १२८ ॥

यः पश्यति स्वयं सर्वं यं न पश्यति कश्चन ।
यश्चेतयति बुद्ध्यादि न तद्यं चेतयत्ययम् ॥ १२९ ॥
येन विश्वमिदं व्याप्तं यन्न व्याप्नोति किंचन ।
आभारूपमिदं सर्वं यं भांतमनुभात्ययम् ॥ १३० ॥
यस्य संनिधिमात्रेण देहेंद्रियमनोधियः ।
विषयेषु स्वकीयेषु वर्तंते प्रेरिता इव ॥ १३१ ॥
अहंकारादिदेहांता विषयाश्च सुखादयः ।
वेद्यंते घटवद्येन नित्यबोधस्वरूपिणा ॥ १३२ ॥
एषोंऽतरात्मा पुरुषः पुराणो निरंतराखंडसुखानुभूतिः ।
सदैकरूपः प्रतिबोधमात्रो येनेषिता वागसवश्चरंति ॥ १३३ ॥
अत्रैव सत्त्वात्मनि धीगुहायामव्याकृताकाश उशत्प्रकाशः ।
आकाश उच्चै रविवत्प्रकाशते स्वतेजसा विश्वमिदं प्रकाशयन् १३४
ज्ञाता मनोऽहंकृतिविक्रियाणां देहेंद्रियप्राणकृतक्रियाणाम् ।
अयोऽग्निवत्ताननुवर्तमानो न चेष्टते नो विकरोति किंचन ॥ १३५ ॥
न जायते नो म्रियते न वर्धते न क्षीयते नो विकरोति नित्यः ।
विलीयमानेऽपि वपुष्यमुष्मिन्न लीयते कुंभ इवांबरं स्वयम् ॥ १३६ ॥
प्रकृतिविकृतिभिन्नः शुद्धबोधस्वभावः
सदसदिदमशेषं भासयन्निर्विशेषः ।
विलसति परमात्मा जाग्रदादिष्ववस्था-
स्वहमहमिति साक्षात्साक्षिरूपेण बुद्धेः ॥ १३७ ॥
नियमितमनसामुं त्वं स्वमात्मानमात्म-
न्ययमहमिति साक्षाद्विद्धि बुद्धिप्रसादात् ।
जनिमरणतरंगापारसंसारसिंधुं
प्रतर भव कृतार्थो ब्रह्मरूपेण संस्थः ॥ १३८ ॥
अत्रानात्मन्यहमिति मतिर्बंध एषोऽस्य पुंसः

प्राप्तोऽज्ञानाज्जननमरणक्लेशसंपातहेतुः ।
येनैवायं वपुरिदमसत्सत्यमित्यात्मबुद्ध्या
पुष्यत्युक्षत्यवति विषयैस्तंतुभिः कोशकृद्वत् ॥ १३९ ॥
अतस्मिंस्तद्बुद्धिः प्रभवति विमूढस्य तमसा
विवेकाभावाद्वै स्फुरति भुजगे रज्जुधिषणा ।
ततोऽनर्थव्रातो निपतति समादातुरधिक-
स्ततो योऽसद्ग्राहः स हि भवति बंधः शृणु सखे ॥ १४० ॥
अखंडनित्याद्वयबोधशक्त्या स्फुरंतमात्मानमनंतवैभवम् ।
समावृणोत्यावृतिशक्तिरेषा तमोमयी राहुरिवार्कबिंबम् ॥ १४१ ॥
तिरोभूते स्वात्मन्यमलतरतेजोवति पुमा-
ननात्मानं मोहादहमिति शरीरं कलयति ।
ततः कामक्रोधप्रभृतिभिरमुं बंधनगुणैः
परं विक्षेपाख्या रजस उरुशक्तिर्व्यथयति ॥ १४२ ॥
महामोहग्राहग्रसनगलितात्मावगमनो ।
धियो नानावस्थां स्वयमभिनयंस्तद्गुणतया ॥
अपारे संसारे विषयविषपूरे जलनिधौ ।
निमज्ज्योन्मज्ज्यायं भ्रमति कुमतिः कुत्सितगतिः ॥ १४३ ॥
भानुप्रभासंजनिताभ्रपंक्तिर्भानुं तिरोधाय विजृंभते यथा ।
आत्मोदिताहंकृतिरात्मतत्त्वं तथा तिरोधाय विजृंभते स्वयम् ॥१४४॥
कवलितदिननाथे दुर्दिने सांद्रमेघै-
र्व्यथयति हिमझंझावायुरुग्रो यथैतान् ।
अविरततमसात्मन्यावृते मूढबुद्धिं
क्षपयति बहुदुःखैस्तीव्रविक्षेपशक्तिः ॥ १४५ ॥
एताभ्यामेव शक्तिभ्यां बंधः पुंसः समागतः ।
याभ्यां विमोहितो देहं मत्वात्मानं भवत्ययम् ॥ १४६ ॥

बीजं संसृतिभूमिजस्य तु तमो देहात्मधीरंकुरो
रागः पल्लवमंबु कर्म तु वपुः स्कंधोऽसवः शाखिकाः ।
अग्राणींद्रियसंहतिश्च विषयाः पुष्पाणि दुःखं फलं
नानाकर्मसमुद्भवं बहुविधं भोक्तात्र जीवः खगः ॥ १४७ ॥

अज्ञानमूलोऽयमनात्मबंधो नैसर्गिकोऽनादिरनंत ईरितः ।
जन्माप्ययव्याधिजरादिदुःखप्रवाहपातं जनयत्यमुष्य ॥ १४८ ॥

नास्त्रैर्न शस्त्रैरनिलेन वह्निना छेत्तुं न शक्यो न च कर्मकोटिभिः ।
विवेकविज्ञानमहासिना विना धातुः प्रसादेन सितेन मंजुना ॥ १४९ ॥

श्रुतिप्रमाणैकमतेः स्वधर्मनिष्ठा तयैवात्मविशुद्धिरस्य ।
विशुद्धबुद्धेः परमात्मवेदनं तेनैव संसारसमूलनाशः ॥ १५० ॥

कोशैरन्नमयाद्यैः पंचभिरात्मा न संवृतो भाति ।
निजशक्तिसमुत्पन्नैः शैवलपटलैरिवांबु वापिस्थम् ॥ १५१ ॥

तच्छैवालापनये सम्यक् सलिलं प्रतीयते शुद्धम् ।
तृष्णासंतापहरं सद्यः सौख्यप्रदं परं पुंसः ॥ १५२ ॥

पंचानामपि कोशानामपवादे विभात्ययं शुद्धः ।
नित्यानंदैकरसः प्रत्यग्रूपः परं स्वयं ज्योतिः ॥ १५३ ॥

आत्मानात्मविवेकः कर्तव्यो बंधमुक्तये विदुषा ।
तेनैवानंदी भवति स्वं विज्ञाय सच्चिदानंदम् ॥ १५४ ॥

मुंजादिषीकामिव दृश्यवर्गात्प्रत्यंचमात्मानमसंगमक्रियम् ।
विविच्य तत्र प्रविलाप्य सर्वं तदात्मना तिष्ठति यः स मुक्तः॥१५५॥

देहोऽयमन्नभवनोऽन्नमयस्तु कोश-
श्चान्नेन जीवति विनश्यति तद्विहीनः ।
त्वक्चर्ममांसरुधिरास्थिपुरीषराशि-
र्नायं स्वयं भवितुमर्हति नित्यशुद्धः ॥ १५६ ॥

पूर्वं जनेरपि मृतेरपि नायमस्ति

जातः क्षणं क्षणगुणोऽनियतस्वभावः ।
नैको जडश्च घटवत्परिदृश्यमानः
स्वात्मा कथं भवति भावविकारवेत्ता ॥ १५७ ॥
पाणिपादादिमान्देहो नात्मा व्यंगेऽपि जीवनात् ।
तत्तच्छक्तेरनाशाच्च न नियम्यो नियामकः ॥ १५८ ॥
देहतद्धर्मतत्कर्मतदवस्थादिसाक्षिणः ।
स्वत एव स्वतः सिद्धं तद्वैलक्षण्यमात्मनः ॥ १५९ ॥
कुल्यराशिर्मांसलिप्तो मलपूर्णोऽतिकश्मलः ।
कथं भवेदयं वेत्ता स्वयमेतद्विलक्षणः ॥ १६० ॥
त्वङ्मांसमेदोऽस्थिपुरीषराशावहंमतिं मूढजनः करोति ।
विलक्षणं वेत्ति विचारशीलो निजस्वरूपं परमार्थभूतम् ॥१६१॥
देहोऽहमित्येव जडस्य बुद्धिर्देहे च जीवे विदुषस्त्वहंधीः ।
विवेकविज्ञानवतो महात्मनो ब्रह्माहमित्येव मतिः सदात्मनि ॥ १६२ ॥
अत्रात्मबुद्धिं त्यज मूढबुद्धे त्वङ्मांसमेदोऽस्थिपुरीषराशौ ।
सर्वात्मनि ब्रह्मणि निर्विकल्पे कुरुष्व शांतिं परमां भजस्व ॥ १६३ ॥
देहेंद्रियादावसति भ्रमोदितां विद्वानहंतां न जहाति यावत् ।
तावन्न तस्यास्ति विमुक्तिवार्ताप्यस्त्वेष वेदांतनयांतदर्शी ॥ १६४ ॥
छायाशरीरे प्रतिबिंबगात्रे यत्स्वप्नदेहे हृदि कल्पितांगे ।
यथात्मबुद्धिस्तव नास्ति काचिज्जीवच्छरीरे च तथैव मास्तु ॥ १६५ ॥
देहात्मधीरेव नृणामसद्धियां जन्मादिदुःखप्रभवस्य बीजम् ।
यतस्ततस्त्वं जहि तां प्रयत्नात्त्यक्ते तु चित्ते न पुनर्भवाशा ॥ १६६ ॥
कर्मेंद्रियैः पंचभिरंचितोऽयं प्राणो भवेत्प्राणमयस्तु कोशः ।
येनात्मवानन्नमयोऽन्नपूर्णः प्रवर्ततेऽसौ सकलक्रियासु ॥ १६७ ॥
नैवात्मापि प्राणमयो वायुविकारो
गंतागंता वायुवदंतर्बहिरेषः ।
यस्मात्किंचित्क्वापि न वेत्तीष्टमनिष्टं

स्वं वान्यं वा किंचन नित्यं परतंत्रः ॥ १६८ ॥

ज्ञानेंद्रियाणि च मनश्च मनोमयः स्या-
त्कोशो ममाहमिति वस्तुविकल्पहेतुः ।
संज्ञादिभेदकलनाकलितो बलीयां-
स्तत्पूर्वकोशमभिपूर्य विजृंभते यः ॥ १६९ ॥

पंचेंद्रियैः पंचभिरेव होतृभिः प्रचीयमानो विषयाज्यधारया ।
जाज्वल्यमानो बहुवासनेंधनैर्मनोमयाग्निर्दहति प्रपंचम् ॥ १७० ॥

न ह्यस्त्यविद्या मनसोऽतिरिक्ता मनो ह्यविद्या भवबंधहेतुः ।
तस्मिन्विनष्टे सकलं विनष्टं विजृंभितेऽस्मिन्सकलं विजृंभते ॥ १७१ ॥

स्वप्नेऽथ शून्ये सृजति स्वशक्त्या भोक्त्रादि विश्वं मन एव सर्वम् ।
तथैव जाग्रत्यपि नो विशेषस्तत्सर्वमेतन्मनसो विजृंभणम् ॥ १७२ ॥

सुषुप्तिकाले मनसि प्रलीने नैवास्ति किंचित्सकलप्रसिद्धेः ।
अतो मनःकल्पित एव पुंसः संसार एतस्य न वस्तुनोऽस्ति ॥ १७३ ॥

वायुना नीयते मेघः पुनस्तेनैव नीयते ।
मनसा कल्प्यते बंधो मोक्षस्तेनैव कल्प्यते ॥ १७४ ॥

देहादिसर्वविषये परिकल्प्य रागं
बध्नाति तेन पुरुषं पशुवद्गुणेन ।
वैरस्यमत्र विषवत्सु विधाय पश्चा-
देनं विमोचयति तन्मन एव बंधात् ॥ १७४ ॥

तस्मान्मनः कारणमस्य जंतो-
र्बंधस्य मोक्षस्य च वा विधाने ।
बंधस्य हेतुर्मलिनं रजोगुणै-
र्मोक्षस्य शुद्धं विरजस्तमस्कम् ॥ १७६ ॥

विवेकवैराग्यगुणातिरेकाच्छुद्धत्वमासाद्य मनो विमुक्त्यै ।
भवत्यतो बुद्धिमतो मुमुक्षोस्ताभ्यां दृढाभ्यां भवितव्यमग्रे ॥ १७७ ॥

मनो नाम महाव्याघ्रो विषयारण्यभूमिषु ।
चरत्यत्र न गच्छंतु साधवो ये मुमुक्षवः ॥ १७८ ॥
मनः प्रसूते विषयानशेषान्स्थूलात्मना सूक्ष्मतया च भोक्तुः ।
शरीरवर्णाश्रमजातिभेदान्गुणक्रियाहेतुफलानि नित्यम् ॥ १७९ ॥
असंगचिद्रूपममुं विमोह्य देहेंद्रियप्राणगुणैर्निबध्य ।
अहंममेति भ्रमयत्यजस्रं मनः स्वकृत्येषु फलोपभुक्तिषु ॥ १८० ॥
अध्यासदोषात्पुरुषस्य संसृतिरध्यासबंधस्त्वमुनैव कल्पितः ।
रजस्तमोदोषवतो विवेकिनो जन्मादिदुःखस्य निदानमेतत् ॥ १८१ ॥
अतः प्राहुर्मनोऽविद्यां पंडितास्तत्त्वदर्शिनः ।
येनैव भ्राम्यते विश्वं वायुनेवाभ्रमंडलम् ॥ १८२ ॥
तन्मनःशोधनं कार्यं प्रयत्नेन मुमुक्षुणा ।
विशुद्धे सति चैतस्मिन्मुक्तिः करफलायते ॥ १८३ ॥
मोक्षैकसक्त्या विषयेषु रागं निर्मूल्य संन्यस्य च सर्वकर्म ।
सच्छ्रद्धया यः श्रवणादिनिष्ठो रजःस्वभावं स धुनोति बुद्धेः ॥ १८४ ॥
मनोमयो नापि भवेत्परात्मा ह्याद्यंतवत्त्वात्परिणामिभावात् ।
दुःखात्मकत्वाद्विषयत्वहेतोर्द्रष्टा हि दृश्यात्मतया न दृष्टः ॥ १८५ ॥
बुद्धिर्बुद्धींद्रियैः सार्धं सवृत्तिः कर्तृलक्षणः ।
विज्ञानमयकोशः स्यात्पुंसः संसारकारणम् ॥ १८६ ॥
अनुव्रजच्चित्प्रतिबिंबशक्तिर्विज्ञानसंज्ञः प्रकृतेर्विकारः ।
ज्ञानक्रियावानहमित्यजस्रं देहेंद्रियादिष्वभिमन्यते भृशम् ॥ १८७ ॥
अनादिकालोऽयमहंस्वभावो जीवः समस्तव्यवहारवोढा ।
करोति कर्माण्यपि पूर्ववासनः पुण्यान्यपुण्यानि च तत्फलानि ॥ १८८ ॥
भुंक्ते विचित्रास्वपि योनिषु व्रजन्नायाति निर्यात्यध ऊर्ध्वमेषः ।
अस्यैव विज्ञानमयस्य जाग्रत्स्वप्नाद्यवस्था सुखदुःखभोगः ॥ १८९ ॥
देहादिनिष्ठाश्रमधर्मकर्मगुणाभिमानं सततं ममेति ।

विज्ञानकोशोऽयमतिप्रकाशः प्रकृष्टसांनिध्यवशात्परात्मनः ।
अतो भवत्येव उपाधिरस्य यदात्मधीः संसरति भ्रमेण ॥ १९० ॥

योऽयं विज्ञानमयः प्राणेषु हृदि स्फुरत्ययं ज्योतिः ।
कूटस्थः सन्नात्मा कर्ता भोक्ता भवत्युपाधिस्थः ॥ १९१ ॥

स्वयं परिच्छेदमुपेत्य बुद्धेस्तादात्म्यदोषेण परं मृषात्मनः ।
सर्वात्मकः सन्नपि वीक्षते स्वयं स्वतः पृथक्त्वेन मृदो घटानिव ॥१९२॥

उपाधिसंबंधवशात्परात्मा ह्युपाधिधर्माननुभाति तद्गुणः ।
अयोविकारानविकारिवह्निवत्सदैकरूपोऽपि परः स्वभावात् ।। १९३ ॥

शिष्य उवाच--

भ्रमेणाप्यन्यथा वास्तु जीवभावः परात्मनः ।
तदुपाधेरनादित्वान्नानादेर्नाश इष्यते ॥ १९४ ॥

अतोऽस्य जीवभावोऽपि नित्या भवति संसृतिः ।
न निवर्तेत तन्मोक्षः कथं मे श्रीगुरो वद ॥ १९५ ॥

श्रीगुरुरुवाच—

सम्यक्पृष्टं त्वया विद्वन्सावधानेन तच्छृणु ।
प्रामाणिकी न भवति भ्रांत्या मोहितकल्पना ॥ १९६ ॥

भ्रांतिं विना त्वसंगस्य निष्क्रियस्य निराकृतेः ।
न घटेतार्थसंबंधो नभसो नीलतादिवत् ॥ १९७ ॥

स्वस्य द्रष्टुर्निर्गुणस्याक्रियस्य
प्रत्यग्बोधानंदरूपस्य बुद्धेः ।
भ्रांत्या प्राप्तो जीवभावो न सत्यो
मोहापाये नास्त्यवस्तु स्वभावात् १९८ ।

यावद् भ्रांतिस्तावदेवास्य सत्ता
मिथ्याज्ञानोज्जृंभितस्य प्रमादात् ।
रज्ज्वां सर्पो भ्रांतिकालीन एव

भ्रांतेर्नाश नैव सर्पोऽपि तद्वत् ॥ १९९ ॥
अनादित्वमविद्यायाः कार्यस्यापि तथेष्यते ।
उत्पन्नायां तु विद्यायामाविद्यकमनाद्यपि ॥ २०० ॥
प्रबोधे स्वप्नवत्सर्वं सहमूलं विनश्यति ।
अनाद्यपीदं नो नित्यं प्रागभाव इव स्फुटम् ॥ २०१ ॥
अनादेरपि विध्वंसः प्रागभावस्य वीक्षितः ।
यद्बुद्ध्युपाधिसंबंधात्परिकल्पितमात्मनि ॥ २०२ ॥
जीवत्वं न ततोऽन्यत्तु स्वरूपेण विलक्षणः ।
संबंधः स्वात्मनो बुद्ध्यां मिथ्याज्ञानपुरःसरः ॥ २०३ ॥
विनिवृत्तिर्भवेत्तस्य सम्यग्ज्ञानेन नान्यथा ।
ब्रह्मात्मैकत्वविज्ञानं सम्यग्ज्ञानं श्रुतेर्मतम् ॥ २०४ ॥
तदात्मानात्मनोः सम्यग्विवेकेनैव सिध्यति ।
ततो विवेकः कर्तव्यः प्रत्यगात्मासदात्मनोः ॥ २०५ ॥
जलं पंकवदत्यंतं पंकापाये जलं स्फुटम् ।
यथा भाति तथात्मापि दोषाभावे स्फुटप्रभः ॥ २०६ ॥
असन्निवृत्तौ तु सदात्मना स्फुटं प्रतीतिरेतस्य भवेत्प्रतीचः ।
ततो निरासः करणीय एव सदात्मनः साध्वहमादिवस्तुनः ॥ २०७ ॥
अतो नायं परात्मा स्याद्विज्ञानमयशब्दभाक् ।
विकारित्वाज्जडत्वाच्च परिच्छिन्नत्वहेतुतः ।
दृश्यत्वाद्व्यभिचारित्वान्नानित्यो नित्य इष्यते ॥ २०८ ॥
आनंदप्रतिबिंबचुंबिततनुर्वृत्तिस्तमोज्जृंभिता
स्यादानंदमयः प्रियादिगुणकः स्वेष्टार्थलाभोदये ।
पुण्यस्यानुभवे विभाति कृतिनामानंदरूपः स्वयं
भूत्वा नंदति यत्र साधु तनुभृन्मात्रः प्रयत्नं विना ॥२०९॥
आनंदमयकोशस्य सुषुप्तौ स्फूर्तिरुत्कटा ।

स्वप्नजागरयोरीषदिष्टसंदर्शनादिना ॥ २१० ॥

नैवायमानंदमयः परात्मा सोपाधिकत्वात्प्रकृतेर्विकारात् ।
कार्यत्वहेतोः सुकृतक्रियाया विकारसंघातसमाहितत्वात् ॥२११॥

पंचानामपि कोशानां निषेधे युक्तितः श्रुतेः ।
तन्निषेधावधिः साक्षी बोधरूपोऽवशिष्यते ॥ २१२ ॥

योऽयमात्मा स्वयंज्योतिः पंचकोशविलक्षणः ।
अवस्थात्रयसाक्षी सन्निर्विकारो निरंजनः ।
सदानंदः स विज्ञेयः स्वात्मत्वेन विपश्चिता ॥ २१३ ॥

शिष्य उवाच--

मिथ्यात्वेन निषिद्धेषु कोशेष्वेतेषु पंचसु ।
सर्वाभावं विना किंचिन्न पश्याम्यत्र हे गुरो ।
विज्ञेयं किमु वस्त्वस्ति स्वात्मनात्र विपश्चिता ॥ २१४ ॥

श्रीगुरुरुवाच--

सत्यमुक्तं त्वया विद्वन्निपुणोऽसि विचारणे ।
अहमादिविकारास्ते तदभावोऽयमप्यनु ।। २१५ ॥

सर्वे येनानुभूयंते यः स्वयं नानुभूयते ।
तमात्मानं वेदितारं विद्धि बुद्ध्या सुसूक्ष्मया २१६ ॥

तत्साक्षिकं भवेत्तत्तद्यद्यद्येनानुभूयते ।
कस्याप्यननुभूतार्थे साक्षित्वं नोपयुज्यते ॥ २१७ ॥

असौ स्वसाक्षिको भावो यतः स्वेनानुभूयते ।
अतः परं स्वयं साक्षात्प्रत्यगात्मा न चेतरः ।। २१८ ॥

जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरं योऽसौ समुज्जृंभते
प्रत्यग्रूपतया सदाहमहमित्यंतः स्फुरन्नेकधा ।
नानाकारविकारभागिन इमान्पश्यन्नहंधीमुखान्
नित्यानंदचिदात्मना स्फुरति तं विद्धि स्वमेतं हृदि ॥ २१९ ॥

घटोदके बिंबितमर्कबिंबमालोक्य मूढो रविमेव मन्यते ।
तथा चिदाभासमुपाधिसंस्थं भ्रांत्याहमित्येव जडोऽभिमन्यते॥२२०
घटं जलं तद्गतमर्कबिंबं विहाय सर्वं विनिरीक्ष्यतेऽर्कः ।
तटस्थ एतत्त्रितयावभासकः स्वयंप्रकाशो विदुषा यथा यथा २२१
देहं धियं चित्प्रतिबिंबमेवं विसृज्य बुद्धौ निहितं गुहायाम् ।
द्रष्टारमात्मानमखंडबोधं सर्वप्रकाशं सदसद्विलक्षणम् ॥ २२२ ॥
नित्यं विभुं सर्वगतं सुसूक्ष्ममंतर्बहिः शून्यमनन्यमात्मनः ।
विज्ञाय सम्यङ्निजरूपमेतत्पुमान्विपाप्मा विरजो विमृत्युः ॥२२३॥
विशोक आनंदघनो विपश्चित्स्वयं कुतश्चिन्न बिभेति कश्चित् ।
नान्योऽस्ति पंथा भवबंधमुक्तेर्विना स्वतत्त्वावगमं मुमुक्षोः॥२२४॥

ब्रह्माभिन्नत्वविज्ञानं भवमोक्षस्य कारणम् ।
येनाद्वितीयमानंदं ब्रह्म संपद्यते बुधैः ॥ २२५ ॥
ब्रह्मभूतस्तु संसृत्यै विद्वान्नावर्तते पुनः ।
विज्ञातव्यमतः सम्यग्ब्रह्माभिन्नत्वमात्मनः ॥ २२६ ॥
सत्यं ज्ञानमनंतं ब्रह्म विशुद्धं परं स्वतः सिद्धम् ।
नित्यानंदैकरसं प्रत्यगभिन्नं निरंतरं जयति ॥ २२७ ॥
सदिदं परमाद्वैतं स्वस्मादन्यस्य वस्तुनोऽभावात् ।
नह्यन्यदस्ति किंचित्सम्यक्परमार्थतत्त्वबोधे हि ॥ २२८ ॥
यदिदं सकलं विश्वं नानारूपं प्रतीतमज्ञानात् ।
तत्सर्वं ब्रह्मैव प्रत्यस्ताशेषभावनादोषम् ॥ २२९ ॥

मृत्कार्यभूतोऽपि मृदो न भिन्नः कुंभोऽस्ति सर्वत्र तु मृत्स्वरूपात् ।
न कुंभरूपं पृथगस्ति कुंभः कुतो मृषा कल्पितनाममात्रः ॥ २३०
केनापि मृद्भिन्नतया स्वरूपं घटस्य संदर्शयितुं न शक्यते ।
अतो घटः कल्पित एव मोहान्मृदेव सत्यं परमार्थभूतम् ॥२३१॥
सद्ब्रह्मकार्यं सकलं सदैव तन्मात्रमेतन्न ततोऽन्यदस्ति ।

अस्तीति यो वक्ति न तस्य मोहो विनिर्गतो निद्रितवत्प्रजल्पः २३२
ब्रह्मैवेदं विश्वमित्येव वाणी श्रौती ब्रूतेऽथर्वनिष्ठा वरिष्ठाम् ।
तस्मादेतद् ब्रह्ममात्रं हि विश्वं नाधिष्ठानाद्भिन्नतारोपितस्य॥२३३॥
सत्यं यदि स्याज्जगदेतदात्मनोऽनंतत्वहानिर्निगमाप्रमाणता ।
असत्यवादित्वमपीशितुः स्यान्नैतत्त्रयं साधु हितं महात्मनाम् २३४

ईश्वरो वस्तुतत्त्वज्ञो न चाहं तेष्ववस्थितः ।
नच मत्स्थानि भूतानीत्येवमेव व्यचिक्लृपत् ॥ २३५ ॥
यदि सत्यं भवेद्विश्वं सुषुप्तावुपलभ्यताम् ।
यन्नोपलभ्यते किंचिदतोऽसत्स्वप्नवन्मृषा ॥ २३६ ॥

अतः पृथङ्नास्ति जगत्परात्मनः पृथक्प्रतीतिस्तु मृषा गुणादिवत्
आरोपितस्यास्ति किमर्थवत्ताधिष्ठानमाभाति तथा भ्रमेण ॥२३७॥
भ्रांतस्य यद्यद्भ्रमतः प्रतीतं ब्रह्मैव तत्तद्रजतं हि शुक्तिः ।
इदंतया ब्रह्म सदैव रूप्यते त्वारोपितं ब्रह्मणि नाममात्रम् ॥२३८॥
अतः परं ब्रह्म सदद्वितीयं विशुद्धविज्ञानघनं निरंजनम् ।
प्रशांतमाद्यंतविहीनमक्रियं निरंतरानंदरसस्वरूपम् ॥ २३९ ॥
निरस्तमायाकृतसर्वभेदं नित्यं सुखं निष्कलमप्रमेयम् ।
अरूपमव्यक्तमनाख्यमव्ययं ज्योतिः स्वयं किंचिदिदं चकास्ति२४०

ज्ञातृज्ञेयज्ञानशून्यमनंतं निर्विकल्पकम् ।
केवलाखंडचिन्मात्रं परं तत्त्वं विदुर्बुधाः ॥ २४१ ॥
अहेयमनुपादेयं मनोवाचामगोचरम् ।
अप्रमेयमनाद्यंतं ब्रह्म पूर्णमहं महः ॥ २४२ ॥

तत्त्वं पदाभ्यामभिधीयमानयोर्ब्रह्मात्मयोः शोधितयोर्यदीत्थम् ।
श्रुत्या तयोस्तत्त्वमसीति सम्यगेकत्वमेव प्रतिपाद्यते मुहुः ॥ २४३॥

ऐक्यं तयोर्लक्षितयोर्न वाच्ययो-
र्निगद्यतेऽन्योन्यविरुद्धधर्मिणोः ।

खद्योतभान्वोरिव राजभृत्ययोः
कूपांबुराश्योः परमाणुमेर्वोः ॥ २४४ ॥
तयोर्विरोधोऽयमुपाधिकल्पितो न वास्तवः कश्चिदुपाधिरेषः ।
ईशस्य मायामहदादि कारणं जीवस्य कार्यं शृणु पंचकोशम् ॥२४५॥
एतावुपाधी परजीवयोस्तयोः सम्यङ्निरासे न परो न जीवः ।
राज्यं नरेंद्रस्य भटस्य खेटकस्तयोरपोहे न भटो न राजा ॥२४६॥
अथात आदेश इति श्रुतिः स्वयं निषेधति ब्रह्मणि कल्पितं द्वयम् ।
श्रुतिप्रमाणानुगृहीतबोधात्तयोर्निरासः करणीय एवम् ॥ २४७ ॥
नेदं नेदं कल्पितत्वान्न सत्यं रज्जौ दृष्टव्यालवत्स्वप्नवच्च ।
इत्थं दृश्यं साधुयुक्त्या व्यपोह्य ज्ञेयः पश्चादेकभावस्तयोर्यः ॥२४८॥
ततस्तु तौ लक्षणया सुलक्ष्यौ तयोरखंडैकरसत्वसिद्धये ।
नालं जहत्या न तथाऽजहत्या किंतूभयार्थात्मिकयैव भाव्यम् ॥२४९॥
स देवदत्तोऽयमितीह चैकता विरुद्धधर्मांशमपास्य कथ्यते ।
यथा तथा तत्त्वमसीति वाक्ये विरुद्धधर्मानुभयत्र हित्वा ॥२५० ॥
संलक्ष्य चिन्मात्रतया सदात्मनोरखंडभावः परिचीयते बुधैः ।
एवं महावाक्यशतेन कथ्यते ब्रह्मात्मनोरैक्यमखंडभावः ॥ २५१ ॥
अस्थूलमित्येतदसन्निरस्य सिद्धं स्वतो व्योमवदप्रतर्क्यम् ।
अतो मृषामात्रमिदं प्रतीतं जहीहि यत्स्वात्मतया गृहीतम् ।
ब्रह्माहमित्येव विशुद्धबुद्ध्या विद्धि स्वमात्मानमखंडबोधम् ॥२५२॥
मृत्कार्यं सकलं घटादि सततं मृन्मात्रमेवाभित–
स्तद्वत्सज्जनितं सदात्मकमिदं सन्मात्रमेवाखिलम् ।
यस्मान्नास्ति सतः परं किमपि तत्सत्यं स आत्मा स्वयं
तस्मात्तत्त्वमसि प्रशांतममलं ब्रह्माद्वयं यत्परम् ॥ २५३ ॥
निद्राकल्पितदेशकालविषयज्ञात्रादि सर्वं यथा
मिथ्या तद्वदिहापि जाग्रति जगत्स्वाज्ञानकार्यत्वतः ।

१६

यस्मादेवमिदं शरीरकरणप्राणाहमाद्यप्यसत्
तस्मात्तत्त्वमसि प्रशांतममलं ब्रह्माद्वयं यत्परम् ॥ २५४ ॥
जातिनीतिकुलगोत्रदूरगं नामरूपगुणदोषवर्जितम् ।
देशकालविषयातिवर्ति यद्ब्रह्म तत्त्वमसि भावयात्मनि ॥ २५५ ॥
यत्परं सकलवागगोचरं गोचरं विमलबोधचक्षुषः ।
शुद्धचिद्घनमनादिवस्तु यद्ब्रह्म तत्त्वमसि भावयात्मनि ॥२५६ ॥
षड्भिरूर्मिभिरयोगि योगिहृद्भावितं न करणैर्विभावितम् ।
बुद्ध्यवेद्यमनवद्यभूति यद् ब्रह्म तत्त्वमसि भावयात्मनि ॥ २५७ ॥
भ्रांतिकल्पितजगत्कलाश्रयं स्वाश्रयं च सदसद्विलक्षणम्
निष्कलं निरुपमानमृद्धिमद् ब्रह्म तत्त्वमसि भावयात्मनि ॥ २५८ ॥
जन्मवृद्धिपरिणत्यपक्षयव्याधिनाशनविहीनमव्ययम् ।
विश्वसृष्ट्यवनघातकारणं ब्रह्म तत्त्वमसि भावयात्मनि ॥ २५९ ॥
अस्तभेदमनपास्तलक्षणं निस्तरंगजलराशिनिश्चलम् ।
नित्यमुक्तमविभक्तमूर्ति यद् ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६० ॥
एकमेव सदनेककारणं कारणांतरनिरासकारणम् ।
कार्यकारणविलक्षणं स्वयं ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६१ ॥
निर्विकल्पकमनल्पमक्षरं यत्क्षराक्षरविलक्षणं परम् ।
नित्यमव्ययसुखं निरंजनं ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६२ ॥
यद्विभाति सदनेकधा भ्रमान्नामरूपगुणविक्रियात्मना ।
हेमवत्स्वयमविक्रियं सदा ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६३ ॥
यच्चकास्त्यनपरं परात्परं प्रत्यगेकरसमात्मलक्षणम् ।
सत्यचित्सुखमनंतमव्ययं ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६४ ॥
उक्तमर्थमिममात्मनि स्वयं भावय प्रथितयुक्तिभिर्धिया ।
संशयादिरहितं करांबुवत्तेन तत्त्वनिगमो भविष्यति ॥ २६५ ॥
स्वबोधमात्रं परिशुद्धतत्त्वं विज्ञाय संघे नृपवच्च सैन्ये ।

तदात्मनैवात्मनि सर्वदा स्थितो विलापय ब्रह्मणि दृश्यजातम् ॥ २६६ ॥

बुद्धौ गुहायां सदसद्विलक्षणं ब्रह्मास्ति सत्यं परमद्वितीयम् ।
तदात्मना योऽत्र वसेद्गुहायां पुनर्न तस्यांगगुहाप्रवेशः ॥ २६७ ॥

ज्ञाते वस्तुन्यदि बलवती वासनाऽनादिरेषा
कर्ता भोक्ताप्यहमिति दृढा यास्य संसारहेतुः ।
प्रत्यग्दृष्ट्यात्मनि निवसता सापनेया प्रयत्ना-
न्मुक्तिं प्राहुस्तदिह मुनयो वासनातानवं यत् ॥ २६८ ॥

अहं ममेति यो भावो देहाक्षादावनात्मनि ।
अध्यासोऽयं निरस्तव्यो विदुषा स्वात्मनिष्ठया ॥ २६९ ॥

ज्ञात्वा स्वं प्रत्यगात्मानं बुद्धितद्वृत्तिसाक्षिणम् ।
सोऽहमित्येव सद्वृत्त्यानात्मन्यात्ममतिं जहि ॥ २७० ॥

लोकानुवर्तनं त्यक्त्वा त्यक्त्वा देहानुवर्तनम् ।
शास्त्रानुवर्तनं त्यक्त्वा स्वाध्यासापनयं कुरु ॥ २७१ ॥

लोकवासनया जंतोः शास्त्रवासनयापि च ।
देहवासनया ज्ञानं यथावन्नैव जायते ॥ २७२ ॥

संसारकारागृहमोक्षमिच्छोरयोमयं पादनिबद्धशृंखलम् ।
वदंति तज्ज्ञाः पटुवासनात्रयं योऽस्माद्विमुक्तः समुपैति मुक्तिम् ॥ २७३ ॥

जलादिसंपर्कवशात्प्रभूतदुर्गंधधूतागरुदिव्यवासना ।
संघर्षणेनैव विभाति सम्यग्विधूयमाने सति बाह्यगंधे ॥ २७४ ॥

अंतःश्रितानंतदुरंतवासनाधूलीविलिप्ता परमात्मवासना ।
प्रज्ञातिसंघर्षणतो विशुद्धा प्रतीयते चंदनगंधवत्स्फुटा ॥ २७५ ॥

अनात्मवासनाजालैस्तिरोभूतात्मवासना ।
नित्यात्मनिष्ठया तेषां नाशे भाति स्वयं स्फुटा ॥ २७६ ॥

यथा यथा प्रत्यगवस्थितं मनस्तथा तथा मुंचति बाह्यवासनाः ।
निःशेषमोक्षे सति वासनानामात्मानुभूतिः प्रतिबंधशून्या ॥ २७७ ॥

स्वात्मन्येव सदा स्थित्या मनो नश्यति योगिनः ।
वासनानां क्षयश्चातः स्वाध्यासापनयं कुरु ॥ २७८ ॥

तमो द्वाभ्यां रजः सत्त्वात्सत्त्वं शुद्धेन नश्यति ।
तस्मात्सत्त्वमवष्टभ्य स्वाध्यासापनयं कुरु ॥२७९ ॥

प्रारब्धं पुष्यति वपुरिति निश्चित्य निश्चलः ।
धैर्यमालंब्य यत्नेन स्वाध्यासापनयं कुरु ॥ २८० ॥

नाहं जीवः परं ब्रह्मेत्यतद्व्यावृत्तिपूर्वकम् ।
वासनावेगतः प्राप्तस्वाध्यासापनयं कुरु ॥ २८१ ॥

श्रुत्या युक्त्या स्वानुभूत्या ज्ञात्वा सार्वात्म्यमात्मनः ।
क्वचिदाभासतः प्राप्तस्वाध्यासापनयं कुरु ॥ २८२ ॥

अनादानविसर्गाभ्यामीषन्नास्ति क्रिया मुनेः ।
तदेकनिष्ठया नित्यं स्वाध्यासापनयं कुरु ॥ २८३ ॥

तत्त्वमस्यादिवाक्योत्थब्रह्मात्मैकत्वबोधतः ।
ब्रह्मण्यात्मत्वदार्ढ्याय स्वाध्यासापनयं कुरु ॥ २८४ ॥

अहंभावस्य देहेऽस्मिन्निःशेषविलयावधि ।
सावधानेन युक्तात्मा स्वाध्यासापनयं कुरु ॥ २८५ ॥

प्रतीतिर्जीवजगतोः स्वप्नवद्भाति यावती ।
तावन्निरंतरं विद्वन्स्वाध्यासापनयं कुरु ॥ २८६ ॥

निद्राया लोकवार्तायाः शब्दादेरपि विस्मृतेः ।
क्वचिन्नावसरं दत्वा चिंतयात्मानमात्मनि ॥ २८७ ॥

मातापित्रोर्मलोद्भूतं मलमांसमयं वपुः ।
त्यक्त्वा चांडालवद्दूरं ब्रह्मीभूय कृती भव ॥ २८८ ॥

घटाकाशं महाकाश इवात्मानं परात्मनि ।
विलाप्याखंडभावेन तूष्णीं भव सदा मुने ॥ २८९ ॥

स्वप्रकाशमधिष्ठानं स्वयंभूय सदात्मना ।

ब्रह्मांडमपि पिंडांडं त्यज्यतां मलभांडवत् ।। २९० ।।
चिदात्मनि सदानंदे देहारूढामहंधियम् ।
निवेश्य लिंगमुत्सृज्य केवलो भव सर्वदा ॥ २९१ ॥
यत्रैष जगदाभासो दर्पणांतः पुरं यथा ।
तद्ब्रह्माहमिति ज्ञात्वा कृतकृत्यो भविष्यसि ॥ २९२ ॥
यत्सत्यभूतं निजरूपमाद्यं चिदद्वयानंदमरूपमक्रियम् ।
तदेत्य मिथ्यावपुरुत्सृजैतच्छैलूषवद्वेषमुपात्तमात्मनः ॥ २९३ ॥
सर्वात्मना दृश्यमिदं मृषैव नैवाहमर्थः क्षणिकत्वदर्शनात् ।
जानाम्यहं सर्वमिति प्रतीतिः कुतोऽहमादेः क्षणिकस्य सिध्येत् ॥ २९४॥
अहंपदार्थस्त्वहमादिसाक्षी नित्यं सुषुप्तावपि भावदर्शनात् ।
ब्रूते ह्यजो नित्य इति श्रुतिः स्वयं तत्प्रत्यगात्मा सदसद्विलक्षणः ॥२९५॥
विकारिणां सर्वविकारवेत्ता नित्योऽविकारो भवितुं समर्हति ।
मनोरथस्वप्नसुषुप्तिषु स्फुटं पुनः पुनर्दृष्टमसत्त्वमेतयोः ॥ २९६ ॥
अतोऽभिमानं त्यज मांसपिंडे पिंडाभिमानिन्यपि बुद्धिकल्पिते ।
कालत्रयाबाध्यमखंडबोधं ज्ञात्वा स्वमात्मानमुपैहि शांतिम् ॥२९७॥
त्यजाभिमानं कुलगोत्रनामरूपाश्रमेष्वार्द्रशवाश्रितेषु ।
लिंगस्य धर्मानपि कर्तृतादींस्त्यक्त्वा भवाखंडसुखस्वरूपः ॥ २९८ ॥
संत्यन्ये प्रतिबंधाः पुंसः संसारहेतवो दृष्टाः ।
तेषामेकं मूलं प्रथमविकारो भवत्यहंकारः ॥ २९९ ॥
यावत्स्यात्स्वस्य संबंधोऽहंकारेण दुरात्मना ।
तावन्न लेशमात्रापि मुक्तिवार्ता विलक्षणा ॥ ३०० ॥
अहंकारग्रहान्मुक्तः स्वरूपमुपपद्यते !
चंद्रवद्विमलः पूर्णः सदानंदः स्वयंप्रभः ॥ ३०१ ॥
यो वा पुरे सोऽहमिति प्रतीतो बुद्ध्या विक्लृप्तस्तमसातिमूढया ।
तस्यैव निःशेषतया विनाशे ब्रह्मात्मभावः प्रतिबंधशून्यः ॥ ३०२ ॥

ब्रह्मानंदनिधिर्महाबलवताहंकारघोराहिना
संवेष्ट्यात्मनि रक्ष्यते गुणमयैश्चंडैस्त्रिभिर्मस्तकैः ।
विज्ञानाख्यमहासिना द्युतिमता विच्छिद्य शीर्षत्रयं
निर्मूल्याहिमिमं निधिं सुखकरं धीरोऽनुभोक्तुं क्षमः ॥ ३०३ ॥

यावद्वा यत्किंचिद्विषदोषस्फूर्तिरस्ति चेद्देहे ।
कथमारोग्याय भवेत्तद्वदहंतापि योगिनो मुक्त्यै ॥ ३०४ ॥

अहमोऽत्यंतनिवृत्त्या तत्कृतनानाविकल्पसंहृत्या ।
प्रत्यक्तत्त्वविवेकादयमहमस्मीति विंदते तत्त्वम् ॥ ३०५ ॥

अहंकर्तर्यस्मिन्नहमिति मतिं मुंच सहसा
विकारात्मन्यात्मप्रतिफलजुषि स्वस्थितिमुषि ।
यदध्यासात्प्राप्ता जनिमृतिजरादुःखबहुलाः
प्रतीचश्चिन्मूर्तेस्तव सुखतनोः संसृतिरियम् ॥ ३०६ ॥

सदैकरूपस्य चिदात्मनो विभोरानंदमूर्तेरनवद्यकीर्तेः ।
नैवान्यथा क्वाप्यविकारिणस्ते विनाहमध्यासममुष्य संसृतिः ॥ ३०७ ॥

तस्मादहंकारमिमं स्वशत्रुं भोक्तुर्गले कंटकवत्प्रतीतम् ।
विच्छिद्य विज्ञानमहासिना स्फुटं भुंक्ष्वात्मसाम्राज्यसुखं यथेष्टम् ॥ ३०८ ॥

ततोऽहमादेर्विनिवर्त्य वृत्तिं संत्यक्तरागः परमार्थलाभात् ।
तूष्णीं समास्स्वात्मसुखानुभूत्या पूर्णात्मना ब्रह्मणि निर्विकल्पः ॥ ३०९ ॥

समूलकृत्तोऽपि महानहं पुनर्व्युल्लेखितः स्याद्यदि चेतसा क्षणम् ।
संजीव्य विक्षेपशतं करोति नभस्वता प्रावृषि वारिदो यथा ॥ ३१० ॥

निगृह्य शत्रोरहमोऽवकाशः क्वचिन्न देयो विषयानुचिंतया ।
स एव संजीवनहेतुरस्य प्रक्षीणजंबीरतरोरिवांबु ॥ ३११ ॥

देहात्मना संस्थित एव कामी विलक्षणः कामयिता कथं स्यात् ।
अतोऽर्थसंधानपरत्वमेव भेदप्रसक्त्या भवबंधहेतुः ॥ ३१२ ॥

कार्यप्रवर्धनाद्बीजप्रवृद्धिः परिदृश्यते ।

कार्यनाशाद्बीजनाशस्तस्मात्कार्यं निरोधयेत् ।। ३१३ ।।
वासनावृद्धितः कार्यं कार्यवृद्ध्या च वासना ।
वर्धते सर्वथा पुंसः संसारो न निवर्तते ।। ३१४ ।।
संसारबंधविच्छित्त्यै तद्द्वयं प्रदहेद्यतिः ।
वासनावृद्धिरेताभ्यां चिंतया क्रियया बहिः ।। ३१५ ।।
ताभ्यां प्रवर्धमाना सा सूते संसृतिमात्मनः ।
त्रयाणां च क्षयोपायः सर्वावस्थासु सर्वदा ।। ३१६ ।।
सर्वत्र सर्वतः सर्वं ब्रह्ममात्रावलोकनम् ।
सद्भाववासनादार्ढ्यात्तत्त्रयं लयमश्नुते ।। ३१७ ।।
क्रियानाशे भवेच्चिंतानाशोऽस्माद्वासनाक्षयः ।
वासनाप्रक्षयो मोक्षः सा जीवन्मुक्तिरिष्यते ।। ३१८ ।।
सद्वासनास्फूर्तिविजृंभणे सति ह्यसौ विलीना त्वहमादिवासना ।
अतिप्रकृष्टाप्यरुणप्रभायां विलीयते साधु यथा तमिस्रा ।। ३१९ ।।
तमस्तमःकार्यमनर्थजालं न दृश्यते सत्युदिते दिनेशे ।
तथाऽद्वयानंदरसानुभूतौ नैवास्ति बंधो न च दुःखगंधः ।। ३२० ।।
दृश्यं प्रतीतं प्रविलापयन्स्वयं सन्मात्रमानंदघनं विभावयन् ।
समाहितः सन्बहिरंतरं वा कालं नयेथाः सति कर्मबंधे ।। ३२१ ।।
प्रमादो ब्रह्मनिष्ठायां न कर्तव्यः कदाचन ।
प्रमादो मृत्युरित्याह भगवान्ब्रह्मणः सुतः ।। ३२२ ।।
न प्रमादादनर्थोऽन्यो ज्ञानिनः स्वस्वरूपतः ।
ततो मोहस्ततोऽहंधीस्ततो बंधस्ततो व्यथा ।। ३२३ ।।
विषयाभिमुखं दृष्ट्वा विद्वांसमपि विस्मृतिः ।
विक्षेपयति धीदोषैर्योषा जारमिव प्रियम् ।। ३२४ ।।
यथा प्रकृष्टं शैवालं क्षणमात्रं न तिष्ठति ।
आवृणोति तथा माया प्राज्ञं वापि पराङ्मुखम् ।। ३२५ ।।

लक्ष्यंच्युतं चेद्यदि चित्तमीषद्बहिर्मुखं संनिपतेत्ततस्ततः ।
प्रमादतः प्रच्युतकेलिकंदुकः सोपानपंक्तौ पतितो यथा तथा ॥ ३२६ ॥

विषयेष्वाविशच्चेतः संकल्पयति तद्गुणान् ।
सम्यक्संकल्पनात्कामः कामात्पुंसः प्रवर्तनम् ॥ ३२७ ॥

ततः स्वरूपविभ्रंशो विभ्रष्टस्तु पतत्यधः ।
पतितस्य विना नाशं पुनर्नारोह ईक्ष्यते ।
संकल्पं वर्जयेत्तस्मात्सर्वानर्थस्य कारणम् ॥ ३२८ ॥

अतः प्रमादान्न परोऽस्ति मृत्युर्विवेकिनो ब्रह्मविदः समाधौ ।
समाहितः सिद्धिमुपैति सम्यक्समाहितात्मा भव सावधानः ॥ ३२९ ॥

जीवतो यस्य कैवल्यं विदेहे च स केवलः ।
यत्किंचित्पश्यतो भेदं भयं ब्रूते यजुःश्रुतिः ॥ ३३० ॥

यदा कदा वापि विपश्चिदेष ब्रह्मण्यनंतेऽप्यणुमात्रभेदम् ।
पश्यत्यथामुष्य भयं तदैव यद्वीक्षितं भिन्नतया प्रमादात् ॥ ३३१ ॥

श्रुतिस्मृतिन्यायशतैर्निषिद्धे दृश्येऽत्र यः स्वात्ममतिं करोति ।
उपैति दुःखोपरि दुःखजातं निषिद्धकर्ता स मलिम्लुचो यथा ॥ ३३२ ॥

सत्याभिसंधानरतो विमुक्तो महत्त्वमात्मीयमुपैति नित्यम् ।
मिथ्याभिसंधानरतस्तु नश्येद् दृष्टं तदेतद्यदचोरचोरयोः ॥ ३३३ ॥

यतिरसदनुसंधिं बंधहेतुं विहाय
स्वयमयमहमस्मीत्यात्मदृष्ट्यैव तिष्ठेत् ।
सुखयति ननु निष्ठा ब्रह्मणि स्वानुभूत्या
हरति परमविद्याकार्यदुःखं प्रतीतम् ॥ ३३४ ॥

बाह्यानुसंधिः परिवर्धयेत्फलं दुर्वासनामेव ततस्ततोऽधिकाम् ।
ज्ञात्वा विवेकैः परिहृत्य बाह्यं स्वात्मानुसंधिं विदधीत नित्यम् ॥ ३३५ ॥

बाह्ये निरुद्धे मनसः प्रसन्नता मनःप्रसादे परमात्मदर्शनम् ।
तस्मिन्सुदृष्टे भवबंधनाशो बहिर्निरोधः पदवी विमुक्तेः ॥ ३३६ ॥

कः पंडितः सन्सदसद्विवेकी श्रुतिप्रमाणः परमार्थदर्शी ।
जानन्हि कुर्यादसतोऽवलंबं स्वपातहेतोः शिशुवन्मुमुक्षुः ॥ ३३७ ॥
देहादिसंसक्तिमतो न मुक्तिर्मुक्तस्य देहाद्यभिमत्यभावः ।
सुप्तस्य नो जागरणं न जाग्रतः स्वप्नस्तयोर्भिन्नगुणाश्रयत्वात् ॥ ३३८ ॥
अंतर्बहिः स्वं स्थिरजंगमेषु ज्ञानात्मनाधारतया विलोक्य ।
त्यक्ताखिलोपाधिरखंडरूपः पूर्णात्मना यः स्थित एष मुक्तः ॥ ३३९ ॥
सर्वात्मना बंधविमुक्तिहेतुः सर्वात्मभावान्न परोऽस्ति कश्चित् ।
दृश्याग्रहे सत्युपपद्यतेऽसौ सर्वात्मभावोऽस्य सदात्मनिष्ठया ॥ ३४० ॥

दृश्यस्याग्रहणं कथं नु घटते देहात्मना तिष्ठतो
बाह्यार्थानुभवप्रसक्तमनसस्तत्तत्क्रियां कुर्वतः ।
संन्यस्ताखिलधर्मकर्मविषयैर्नित्यात्मनिष्ठापरै-
स्तत्त्वज्ञैः करणीयमात्मनि सदानंदेच्छुभिर्यत्नतः ॥ ३४१ ॥

सार्वात्म्यसिद्धये भिक्षोः कृतश्रवणकर्मणः ।
समाधिं विदधात्येषा शांतो दांत इति श्रुतिः ॥ ३४२ ॥

आरूढशक्तेरहमो विनाशः
कर्तुं न शक्यः सहसापि पंडितैः ॥
ये निर्विकल्पाख्यसमाधिनिश्चला-
स्तानंतरानंतभवा हि वासनाः ॥ ३४३ ॥

अहंबुद्ध्यैव मोहिन्या योजयित्वावृतेर्बलात् ।
विक्षेपशक्तिः पुरुषं विक्षेपयति तद्गुणैः ॥ ३४४ ॥

विक्षेपशक्तिविजयो विषमो विधातुं
निःशेषमावरणशक्तिनिवृत्त्यभावे ।
दृग्दृश्ययोः स्फुटपयोजलवद्विभागे
नश्येत्तदावरणमात्मनि च स्वभावात् ।
निःसंशयेन भवति प्रतिबंधशून्यो

निक्षेपणं नहि तदा यदि चेन्मृषार्थे ॥ ३४५ ॥
सम्यग्विवेकः स्फुटबोधजन्यो विभज्य दृग्दृश्यपदार्थतत्त्वम् ।
छिनत्ति मायाकृतमोहबंधं यस्माद्विमुक्तस्य पुनर्न संसृतिः ॥ ३४६ ॥
परावरैकत्वविवेकवह्निर्दहत्यविद्यागहनं ह्यशेषम् ।
किं स्यात्पुनः संसरणस्य बीजमद्वैतभावं समपेयुषोऽस्य ॥ ३४७ ॥
आवरणस्य निवृत्तिर्भवति च सम्यक्पदार्थदर्शनतः ।
मिथ्याज्ञानविनाशस्तद्वद्विक्षेपजनितदुःखनिवृत्तिः ॥ ३४८ ॥
एतत्त्रितयं दृष्टं सम्यग्रज्जुस्वरूपविज्ञानात् ।
तस्माद्वस्तुसतत्त्वं ज्ञातव्यं बंधमुक्तये विदुषा ॥ ३४९ ॥
अयोऽग्नियोगादिव सत्समन्वयान्मात्रादिरूपेण विजृंभते धीः ।
तत्कार्यमेतत्त्रितयं यतो मृषा दृष्टं भ्रमस्वप्नमनोरथेषु ॥ ३५० ॥
ततो विकाराः प्रकृतेरहंमुखा देहावसाना विषयाश्च सर्वे ।
क्षणेऽन्यथाभावितया ह्यमीषामसत्त्वमात्मा तु कदापि नान्यथा ॥ ३५१ ॥
नित्याद्वयाखंडचिदेकरूपो बुद्ध्यादिसाक्षी सदसद्विलक्षणः ।
अहंपदप्रत्ययलक्षितार्थः प्रत्यक्सदानंदघनः परात्मा ॥ ३५२ ॥
इत्थं विपश्चित्सदसद्विभज्य निश्चित्य तत्त्वं निजबोधदृष्ट्या ।
ज्ञात्वा स्वमात्मानमखंडबोधं तेभ्यो विमुक्तः स्वयमेव शाम्यति ॥ ३५३ ॥
अज्ञानहृदयग्रंथेर्निःशेषविलयस्तदा ।
समाधिनाऽविकल्पेन यदाद्वैतात्मदर्शनम् ॥ ३५४ ॥
त्वमहमिदमितीयं कल्पना बुद्धिदोषात्
प्रभवति परमात्मन्यद्वये निर्विशेषे ।
प्रविलसति समाधावस्य सर्वो विकल्पो
विलयनमुपगच्छेद्वस्तुतत्त्वावधृत्या ॥ ३५५ ॥
शांतो दांतः परमुपरतः क्षांतियुक्तः समाधिं
कुर्वन्नित्यं कलयति यतिः स्वस्य सर्वात्मभावम् ।

तेनाविद्यातिमिरजनितान्साधु दग्ध्वा विकल्पान्
ब्रह्माकृत्या निवसति सुखं निष्क्रियो निर्विकल्पः ॥ ३५६ ॥
समाहिता ये प्रविलाप्य बाह्यं श्रोत्रादि चेतः स्वमहं चिदात्मनि
त एव मुक्ता भवपाशबंधैर्नान्ये तु पारोक्ष्यकथाभिधायिनः ॥ ३५७ ॥
उपाधिभेदात्स्वयमेव भिद्यते चोपाध्यपोहे स्वयमेव केवलः ।
तस्मादुपाधेर्विलयाय विद्वान्वसेत्सदा कल्पसमाधिनिष्ठया ॥ ३५८ ॥
सति सक्तो नरो याति सद्भावं ह्येकनिष्ठया ।
कीटको भ्रमरं ध्यायन्भ्रमरत्वाय कल्पते ॥ ३५९ ॥
क्रियांतरासक्तिमपास्य कीटको ध्यायन्यथालिं ह्यलिभावमृच्छति ।
तथैव योगी परमात्मतत्त्वं ध्यात्वा समायाति तदेकनिष्ठया ॥ ३६० ॥
अतीव सूक्ष्मं परमात्मतत्वं न स्थूलदृष्ट्या प्रतिपत्तुमर्हति ।
समाधिनात्यंतसुसूक्ष्मवृत्त्या ज्ञातव्यमार्यैरतिशुद्धबुद्धिभिः ॥३६१॥
यथा सुवर्णं पुटपाकशोधितं त्यक्त्वा मलं स्वात्मगुणं समृच्छति ।
तथा मनः सत्त्वरजस्तमोमलं ध्यानेन संत्यज्य समेति तत्त्वम् ॥३६२॥
निरंतराभ्यासवशात्तदित्थं पक्वं मनो ब्रह्मणि लीयते यदा ।
तदा समाधिः स विकल्पवर्जितः स्वतोऽद्वयानंदरसानुभावकः ॥३६३॥
समाधिनाऽनेन समस्तवासनाग्रंथेर्विनाशोऽखिलकर्मनाशः ।
अंतर्बहिः सर्वत एव सर्वदा स्वरूपविस्फूर्तिरयत्नतः स्यात् ॥३६४॥
श्रुतेः शतगुणं विद्यान्मननं मननादपि ।
निदिध्यासं लक्षगुणमनंतं निर्विकल्पकम् ॥ ३६५ ॥
निर्विकल्पकसमाधिना स्फुटं ब्रह्मतत्त्वमवगम्यते ध्रुवम् ।
नान्यथा चलतया मनोगतेः प्रत्ययांतरविमिश्रितं भवेत् ॥३६६॥
अतः समाधत्स्व यतेंद्रियः सदा निरंतरं शांतमनाः प्रतीचि ।
विध्वंसय ध्वांतमनाद्यविद्यया कृतं सदेकत्वविलोकनेन ॥ ३६७ ॥
योगस्य प्रथमं द्वारं वाङ्निरोधोऽपरिग्रहः ।

निराशा च निरीहा च नित्यमेकांतशीलता ॥ ३६८ ॥

एकांतस्थितिरिंद्रियोपरमणे हेतुर्दमश्चेतसः

संरोधे करणं शमेन विलयं यायादहंवासना ।

तेनानंदरसानुभूतिरचला ब्राह्मी सदा योगिन-

स्तस्माच्चित्तनिरोध एव सततं कार्यः प्रयत्नान्मुनेः॥३६९॥

वाचं नियच्छात्मनि तं नियच्छ बुद्धौ धियं यच्छ च बुद्धिसाक्षिणि ।

तं चापि पूर्णात्मनि निर्विकल्पे विलाप्य शांतिं परमां भजस्व ॥३७०॥

देहप्राणेंद्रियमनोबुद्ध्यादिभिरुपाधिभिः ।

यैर्यैर्वृत्तेः समायोगस्तत्तद्भावोऽस्य योगिनः ॥ ३७१ ॥

तन्निवृत्त्या मुनेः सम्यक्सर्वोपरमणं सुखम् ।

संदृश्यते सदानंदरसानुभवविप्लवः ॥ ३७२ ॥

अंतस्त्यागो बहिस्त्यागो विरक्तस्यैव युज्यते ।

त्यजत्यंतर्बहिःसंगं विरक्तस्तु मुमुक्षया ॥ ३७३ ॥

बहिस्तु विषयैः संगं तथांतरहमादिभिः ।

विरक्त एव शक्नोति त्यक्तुं ब्रह्मणि निष्ठितः ॥ ३७४ ॥

वैराग्यबोधौ पुरुषस्य पक्षिवत्पक्षौ विजानीहि विचक्षण त्वम् ।

विमुक्तिसौधाग्रतलाधिरोहणं ताभ्यां विना नान्यतरेण सिध्यति ॥३७५॥

अत्यंतवैराग्यवतः समाधिः समाहितस्यैव दृढप्रबोधः ।

प्रबुद्धतत्त्वस्य हि बंधमुक्तिर्मुक्तात्मनो नित्यसुखानुभूतिः ॥ ३७६ ॥

वैराग्यान्न परं सुखस्य जनकं पश्यामि वश्यात्मन-

स्तच्चेच्छुद्धतरात्मबोधसहितं स्वाराज्यसाम्राज्यधुक् ।

एतद् द्वारमजस्रमुक्तियुवतेर्यस्मात्त्वमस्मात्परं

सर्वत्रास्पृहया सदात्मनि सदा प्रज्ञां कुरु श्रेयसे ॥ ३७७ ॥

आशां छिंधि विषोपमेषु विषयेष्वेषैव मृत्योः सृति-

स्त्यक्त्वा जातिकुलाश्रमेष्वभिमतिं मुंचातिदूरात्क्रियाः ।

देहादावसति त्यजात्मधिषणां प्रज्ञां कुरुष्वात्मनि
त्वं द्रष्टास्यमलोऽसि निर्द्वयपरं ब्रह्मासि यद्वस्तुतः ॥ ३७८ ॥
लक्ष्ये ब्रह्मणि मानसं दृढतरं संस्थाप्य बाह्येंद्रियं
स्वस्थाने विनिवेश्य निश्चलतनुश्चोपेक्ष्य देहस्थितिम् ।
ब्रह्मात्मैक्यमुपेत्य तन्मयतया चाखंडवृत्यानिशं
ब्रह्मानंदरसं पिबात्मनि मुदा शून्यैः किमन्यैर्भ्रमैः ॥ ३७९ ॥
अनात्मचिंतनं त्यक्त्वा कश्मलं दुःखकारणम् ।
चिंतयात्मानमानंदरूपं यन्मुक्तिकारणम् ॥ ३८० ॥
एष स्वयंज्योतिरशेषसाक्षी विज्ञानकोशे विलसत्यजस्रम् ।
लक्ष्यं विधायैनमसद्विलक्षणमखंडवृत्यात्मतयानुभावय ॥ ३८१ ॥
एतमच्छिन्नया वृत्या प्रत्ययांतरशून्यया ।
उल्लेखयन्विजानीयात्स्वस्वरूपतया स्फुटम् ॥ ३८२ ॥
अत्रात्मत्वं दृढीकुर्वन्नहमादिषु संत्यजन् ।
उदासीनतया तेषु तिष्ठेद्घटपटादिवत् ॥ ३८३ ॥
विशुद्धमंतःकरणं स्वरूपे निवेश्य साक्षिण्यवबोधमात्रे ।
शनैः शनैर्निश्चलतामुपानयन्पूर्णं स्वमेवानुविलोकयेत्ततः ॥ ३८४ ॥
देहेंद्रियप्राणमनोऽहमादिभिः स्वाज्ञानक्लृप्तैरखिलैरुपाधिभिः ।
विमुक्तमात्मानमखंडरूपं पूर्णं महाकाशमिवावलोकयेत् ॥ ३८५ ॥
घटकलशकुसूलसूचिमुख्यैर्गगनमुपाधिशतैर्विमुक्तमेकम् ।
भवति न विविधं तथैव शुद्धं परमहमादिविमुक्तमेकमेव ॥ ३८६ ॥
ब्रह्मादिस्तंबपर्यंता मृषामात्रा उपाधयः ।
ततः पूर्णं स्वमात्मानं पश्येदेकात्मना स्थितम् ॥ ३८७ ॥
यत्र भ्रांत्या कल्पितं यद्विवेके तत्तन्मात्रं नैव तस्माद्विभिन्नम् ।
भ्रांतेर्नाशे भ्रांतिदृष्टाहितत्त्वं रज्जुस्तद्वद्विश्वमात्मस्वरूपम ॥ ३८८ ॥
स्वयं ब्रह्मा स्वयं विष्णुः स्वयमिंद्रः स्वयं शिवः ।

स्वयं विश्वमिदं सर्वं स्वस्मादन्यन्न किंचन ॥ ३८९ ॥

अंतः स्वयं चापि बहिः स्वयं च स्वयं पुरस्तात्स्वयमेव पश्चात् ।
स्वयं ह्यवाच्यां स्वयमप्युदीच्यां तथोपरिष्टात्स्वयमप्यधस्तात् ॥ ३९० ॥

तरंगफेनभ्रमबुद्बुदादि सर्वं स्वरूपेण जलं यथा तथा ।
चिदेव देहाद्यहमंतमेतत्सर्वं चिदेवैकरसं विशुद्धम् ॥ ३९१ ॥

सदेवेदं सर्वं जगदवगतं वाङ्मनसयोः
सतोऽन्यन्नास्त्येव प्रकृतिपरसीम्नि स्थितवतः ।
पृथक् किं मृत्स्नायाः कलशघटकुंभाद्यवगतं
वदत्येष भ्रांतस्त्वमहमिति मायामदिरया ॥ ३९२ ॥

क्रियासमभिहारेण यत्र नान्यदिति श्रुतिः ।
ब्रवीति द्वैतराहित्यं मिथ्याध्यासनिवृत्तये ॥ ३९३ ॥

आकाशवन्निर्मलनिर्विकल्पनिःसीमनिष्पंदननिर्विकारम् ।
अंतर्बहिःशून्यमनन्यमद्वयं स्वयं परं ब्रह्म किमस्ति बोध्यम् ॥ ३९४ ॥

वक्तव्यं किमु विद्यतेऽत्र बहुधा ब्रह्मैव जीवः स्वयं
ब्रह्मैतज्जगदाततं नु सकलं ब्रह्माद्वितीयं श्रुतेः ।
ब्रह्मैवाहमिति प्रबुद्धमतयः संत्यक्तबाह्याः स्फुटं
ब्रह्मीभूय वसंति संततचिदानंदात्मनैव ध्रुवम् ॥ ३९५ ॥

जहि मलमयकोशेऽहंधियोत्थापिताशां
प्रसभमनिलकल्पे लिंगदेहेऽपि पश्चात् ।
निगमगदितकीर्तिं नित्यमानंदमूर्तिं
स्वयमिति परिचीय ब्रह्मरूपेण तिष्ठ ॥ ३९६ ॥

शवाकारं यावद्भजति मनुजस्तावदशुचिः
परेभ्यः स्यात्क्लेशो जननमरणव्याधिनिलयः ।
यदात्मानं शुद्धं कलयति शिवाकारमचलं
तदा तेभ्यो मुक्तो भवति हि तदाह श्रुतिरपि ॥ ३९७ ॥

स्वात्मन्यारोपिताशेषाभासवस्तुनिरासतः ।
स्वयमेव परं ब्रह्म पूर्णमद्वयमक्रियम् ॥ ३९८ ॥
समाहितायां सति चित्तवृत्तौ परात्मनि ब्रह्मणि निर्विकल्पे ।
न दृश्यते कश्चिदयं विकल्पः प्रजल्पमात्रः परिशिष्यते ततः ॥ ३९९ ॥
असत्कल्पो विकल्पोऽयं विश्वमित्येकवस्तुनि ।
निर्विकारे निराकारे निर्विशेषे भिदा कुतः ॥ ४०० ॥
द्रष्टृदर्शनदृश्यादिभावशून्यैकवस्तुनि ।
निर्विकारे निराकारे निर्विशेषे भिदा कुतः ॥ ४०१ ॥
कल्पार्णव इवात्यंतपरिपूर्णैकवस्तुनि ।
निर्विकारे निराकारे निर्विशेषे भिदा कुतः ॥ ४०२ ॥
तेजसीव तमो यत्र प्रलीनं भ्रांतिकारणम् ।
अद्वितीये परे तत्त्वे निर्विशेषे भिदा कुतः ॥ ४०३ ॥
एकात्मके परे तत्त्वे भेदवार्ता कथं वसेत् ।
सुषुप्तौ सुखमात्रायां भेदः केनावलोकितः ॥ ४०४ ॥
नह्यस्ति विश्वं परतत्त्वबोधात्सदात्मनि ब्रह्मणि निर्विकल्पे ।
कालत्रये नाप्यहिरीक्षितो गुणे नह्यंबुबिंदुर्मृगतृष्णिकायाम् ॥ ४०५ ॥
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ।
इति ब्रूते श्रुतिः साक्षात्सुषुप्तावनुभूयते ॥ ४०६ ॥
अनन्यत्वमधिष्ठानादारोप्यस्य निरीक्षितम् ।
पंडितै रज्जुसर्पादौ विकल्पो भ्रांतिजीवनः ॥ ४०७ ॥
चित्तमूलो विकल्पोऽयं चित्ताभावे न कश्चन ।
अतश्चित्तं समाधेहि प्रत्यग्रूपे परात्मनि ॥ ४०८ ॥
किमपि सततबोधं केवलानंदरूपं
निरुपममतिवेलं नित्यमुक्तं निरीहम् ।
निरवधि गगनाभं निष्कलं निर्विकल्पं

हृदि कलयति विद्वान्ब्रह्म पूर्णं समाधौ ॥ ४०९ ॥

प्रकृतिविकृतिशून्यं भावनातीतभावं
समरसमसमानं मानसंबंधदूरम् ।
निगमवचनसिद्धं नित्यमस्मत्प्रसिद्धं
हृदि कलयति विद्वान्ब्रह्म पूर्णं समाधौ ॥ ४१० ॥

अजरममरमस्ताभासवस्तुस्वरूपं
स्तिमितसलिलराशिप्रख्यमाख्याविहीनम् ।
शमितगुणविकारं शाश्वतं शांतमेकं
हृदि कलयति विद्वान्ब्रह्म पूर्णं समाधौ ॥ ४११ ॥

समाहितांतःकरणः स्वरूपे विलोकयात्मानमखंडवैभवम् ।
विच्छिंधि बंधं भवगंधगंधितं यत्नेन पुंस्त्वं सफलीकुरुष्व ॥४१२॥

सर्वोपाधिविनिर्मुक्तं सच्चिदानंदमद्वयम् ।
भावयात्मानमात्मस्थं न भूयः कल्पसेऽध्वने ॥ ४१३ ॥

छायेव पुंसः परिदृश्यमानमाभासरूपेण फलानुभूत्या ।
शरीरमाराच्छववन्निरस्तं पुनर्न संधत्त इदं महात्मा ॥ ४१४ ॥

सततविमलबोधानंदरूपं समेत्य
त्यज जडमलरूपोपाधिमेतं सुदूरे ।
अथ पुनरपि नैष स्मर्यतां वांतवस्तु
स्मरणविषयभूतं कल्पते कुत्सनाय ॥ ४१५ ॥

समूलमेतत्परिदह्य वह्नौ सदात्मनि ब्रह्मणि निर्विकल्पे ।
ततः स्वयं नित्यविशुद्धबोधानंदात्मना तिष्ठति विद्वरिष्ठः ॥ ४१६ ॥

प्रारब्धसूत्रग्रथितं शरीरं प्रयातु वा तिष्ठतु गोरिव स्रक् ।
न तत्पुनः पश्यति तत्त्ववेत्ताऽऽनंदात्मनि ब्रह्मणि लीनवृत्तिः ॥ ४१७ ॥

अखंडानंदमात्मानं विज्ञाय स्वस्वरूपतः ।
किमिच्छन्कस्य वा हेतोर्देहं पुष्णाति तत्त्ववित् ॥ ४१८ ॥

संसिद्धस्य फलं त्वेतज्जीवन्मुक्तस्य योगिनः ।
बहिरंतः सदानंदरसास्वादनमात्मनि ॥ ४१९ ॥
वैराग्यस्य फलं बोधो बोधस्योपरतिः फलम् ।
स्वानंदानुभवाच्छांतिरेषैवोपरतेः फलम् ॥ ४२० ॥
यद्युत्तरोत्तराभावः पूर्वपूर्वं तु निष्फलम् ।
निवृत्तिः परमा तृप्तिरानंदोऽनुपमः स्वतः ॥ ४२१ ॥
दुष्टदुःखेष्वनुद्वेगो विद्यायाः प्रस्तुतं फलम् ।
यत्कृतं भ्रांतिवेलायां नानाकर्म जुगुप्सितम् ।
पश्चान्नरो विवेकेन तत्कथं कर्तुमर्हति ॥ ४२२ ॥
विद्याफलं स्यादसतो निवृत्तिः प्रवृत्तिरज्ञानफलं तदीक्षितम् ।
तज्ज्ञाज्ञयोर्यन्मृगतृष्णिकादौ नो चेद्विदो दृष्टफलं किमस्मात् ॥ ४२३ ॥
अज्ञानहृदयग्रंथेर्विनाशो यद्यशेषतः ॥
अनिच्छोर्विषयः किं नु प्रवृत्तेः कारणं स्वतः ॥ ४२४ ॥
वासनानुदयो भोग्ये वैराग्यस्य परोऽवधिः ।
अहंभावोदयाभावो बोधस्य परमोऽवधिः ।
लीनवृत्तेरनुत्पत्तिर्मर्यादोपरतेस्तु सा ॥ ४२५ ॥
ब्रह्माकारतया सदा स्थिततया निर्मुक्तबाह्यार्थधी-
रन्यावेदितभोग्यभोगकलनो निद्रालुवद्बालवत् ।
स्वप्नालोकितलोकवज्जगदिदं पश्यन्क्वचिल्लब्धधी-
रास्ते कश्चिदनंतपुण्यफलभुग्धन्यः स मान्यो भुवि ॥ ४२६ ॥
स्थितप्रज्ञो यतिरयं यः सदानंदमश्नुते ।
ब्रह्मण्येव विलीनात्मा निर्विकारो विनिष्क्रियः ॥ ४२७ ॥
ब्रह्मात्मनोः शोधितयोरेकभावावगाहिनी ।
निर्विकल्पा च चिन्मात्रा वृत्तिः प्रज्ञेति कथ्यते ।
सा सर्वदा भवेद्यस्य स्थितप्रज्ञः स उच्यते ॥ ४२८ ॥

यस्य स्थिता भवेत्प्रज्ञा यस्यानंदो निरंतरः ।
प्रपंचो विस्मृतप्रायः स जीवन्मुक्त इष्यते ४२९ ॥
लीनधीरपि जागर्ति यो जाग्रद्धर्मवर्जितः ।
बोधो निर्वासनो यस्य स जीवन्मुक्त इष्यते ॥ ४३० ॥
शांतसंसारकलनः कलावानपि निष्कलः ।
यस्य चित्तं विनिश्चिंतं स जीवन्मुक्त इष्यते ॥४३१॥
वर्तमानेऽपि देहेऽस्मिञ्छायावदनुवर्तिनि ।
अहंताममताभावो जीवन्मुक्तस्य लक्षणम् ॥४३२॥
अतीताननुसंधानं भविष्यदविचारणम् ।
औदासीन्यमपि प्राप्ते जीवन्मुक्तस्य लक्षणम् ॥४३३॥
गुणदोषविशिष्टेऽस्मिन्स्वभावेन विलक्षणे ।
सर्वत्र समदर्शित्वं जीवन्मुक्तस्य लक्षणम् ॥४३४॥
इष्टानिष्टार्थसंप्राप्तौ समदर्शितयाऽऽत्मनि ।
उभयत्राविकारित्वं जीवन्मुक्तस्य लक्षणम् ॥४३५॥
ब्रह्मानंदरसास्वादासक्तचित्ततया यतेः ।
अंतर्बहिरविज्ञानं जीवन्मुक्तस्य लक्षणम् ॥४३६॥
देहेंद्रियादौ कर्तव्ये ममाहंभाववर्जितः ।
औदासीन्येन यस्तिष्ठेत्स जीवन्मुक्तलक्षणः ॥४३७॥
विज्ञात आत्मनो यस्य ब्रह्मभावः श्रुतेर्बलात् ।
भवबंधविनिर्मुक्तः स जीवन्मुक्तलक्षणः ॥४३८॥
देहेंद्रियेष्वहंभाव इदंभावस्तदन्यके ।
यस्य नो भवतः क्वापि स जीवन्मुक्त इष्यते ॥४३९॥
न प्रत्यग्ब्रह्मणोर्भेदं कदापि ब्रह्मसर्गयोः ।
प्रज्ञया यो विजानाति स जीवन्मुक्तलक्षणः ॥४४०॥
साधुभिः पूज्यमानेऽस्मिन्पीडयमानेऽपि दुर्जनैः ।

समभावो भवेद्यस्य स जीवन्मुक्तलक्षणः ॥४४१॥
यत्र प्रविष्टा विषयाः परेरिता नदीप्रवाहा इव वारिराशौ ।
लिनंति सन्मात्रतया न विक्रियामुत्पादयंत्येष यतिर्विमुक्तः॥४४२॥
विज्ञातब्रह्मतत्त्वस्य यथापूर्वं न संसृतिः ।
अस्ति चेन्न स विज्ञातब्रह्मभावो बहिर्मुखः ॥४४३॥
प्राचीनवासनावेगादसौ संसरतीति चेत् ।
न सदेकत्वविज्ञानान्मंदीभवति वासना ॥४४४॥
अत्यंतकामुकस्यापि वृत्तिः कुंठति मातरि ।
तथैव ब्रह्मणि ज्ञाते पूर्णानंदे मनीषिणः ॥४४५॥
निदिध्यासनशीलस्य बाह्यप्रत्यय ईक्ष्यते ।
ब्रवीति श्रुतिरेतस्य प्रारब्धं फलदर्शनात् ॥४४६॥
सुखाद्यनुभवो यावत्तावत्प्रारब्धमिष्यते ।
फलोदयः क्रियापूर्वो निष्क्रियो न हि कुत्रचित् ॥४४७॥
अहं ब्रह्मेति विज्ञानात्कल्पकोटिशतार्जितम् ।
संचितं विलयं याति प्रबोधात्स्वप्नकर्मवत् ॥४४८॥
यत्कृतं स्वप्नवेलायां पुण्यं वा पापमुल्बणम् ।
सुप्तोत्थितस्य किं तत्स्यात्स्वर्गाय नरकाय वा ॥४४९॥
स्वमसंगमुदासीनं परिज्ञाय नभो यथा ।
न श्लिष्यते यतिः किंचित्कदाचिद्भाविकर्मभिः ॥४५०॥
न नभो घटयोगेन सुरागंधेन लिप्यते ।
तथात्मोपाधियोगेन तद्धर्मैर्नैव लिप्यते ॥४५१॥
ज्ञानोदयात्पुरारब्धं कर्म ज्ञानान्न नश्यति ।
अदत्वा स्वफलं लक्ष्यमुद्दिश्योत्सृष्टबाणवत् ॥४५२॥
व्याघ्रबुद्ध्या विनिर्मुक्तो बाणः पश्चात्तु गोमतौ ।
न तिष्ठति छिनत्त्येव लक्ष्यं वेगेन निर्भरम् ॥४५३॥

प्रारब्धं बलवत्तरं खलु विदां भोगेन तस्य क्षयः
सम्यग्ज्ञानहुताशनेन विलयः प्राक्संचितागामिनाम्
ब्रह्मात्मैक्यमवेक्ष्य तन्मयतया ये सर्वदा संस्थिता-
स्तेषां तत्त्रतयं नहि क्वचिदपि ब्रह्मैव ते निर्गुणम॥४५४॥

उपाधितादात्म्यविहीनकेवलब्रह्मात्मनैवात्मनि तिष्ठतो मुनेः ।
प्रारब्धसद्भावकथा न युक्ता स्वप्नार्थसंबंधकथेव जाग्रतः ॥ ४५५ ॥

नहि प्रबुद्धः प्रतिभासदेहे देहोपयोगिन्यपि च प्रपंचे ।
करोत्यहंतां ममतामिदंतां किंतु स्वयं तिष्ठति जागरेण ॥ ४५६ ॥

न तस्य मिथ्यार्थसमर्थनेच्छा न संग्रहस्तज्जगतोऽपि दृष्टः ।
तत्रानुवृत्तिर्यदि चेन्मृषार्थे न निद्रया मुक्त इतीष्यते ध्रुवम् ॥ ४५७ ॥

तद्वत्परे ब्रह्मणि वर्तमानः सदात्मना तिष्ठति नान्यदीक्षते ।
स्मृतिर्यथा स्वप्नविलोकितार्थे तथा विदः प्राशनमोचनादौ ॥ ४५८ ॥

कर्मणा निर्मितो देहः प्रारब्धं तस्य कल्प्यताम् ।
नानादेरात्मनो युक्तं नैवात्मा कर्मनिर्मितः ॥४५९ ॥

अजो नित्यः शाश्वत इति ब्रूते श्रुतिरमोघवाक् ।
तदात्मना तिष्ठतोऽस्य कुतः प्रारब्धकल्पना ॥ ४६० ॥

प्रारब्धं सिध्यति सदा यदा देहात्मना स्थितिः ।
देहात्मभावो नैवेष्टः प्रारब्धं त्यज्यतामतः ।
शरीरस्यापि प्रारब्धकल्पना भ्रांतिरेव हि ॥ ४६१ ॥

अध्यस्तस्य कुतः सत्त्वमसत्त्वस्य कुतो जनिः ।
अजातस्य कुतो नाशः प्रारब्धमसतः कुतः ॥ ४६२ ॥

ज्ञानेनाज्ञानकार्यस्य समूलस्य लयो यदि ।
तिष्ठत्ययं कथं देह इति शंकावतो जडान् ।
समाधातुं बाह्यदृष्ट्या प्रारब्धं वदति श्रुतिः ॥ ४६३ ॥

न तु देहादिसत्यत्वबोधनाय विपश्चिताम् ।

यतः श्रुतेरभिप्रायः परमार्थैकगोचरः ॥ ४६४ ॥
परिपूर्णमनाद्यंतमप्रमेयमविक्रियम् ।
एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ॥ ४६५ ॥
सद्घनं चिद्घनं नित्यमानंदघनमक्रियम् ।
एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ॥ ४६६ ॥
प्रत्यगेकरसं पूर्णमनंतं सर्वतोमुखम् ।
एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ॥ ४६७ ॥
अहेयमनुपादेयमनादेयमनाश्रयम् ।
एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ॥ ४६८ ॥
निर्गुणं निष्कलं सूक्ष्मं निर्विकल्पं निरंजनम् ।
एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ॥ ४६९ ॥
अनिरूप्यस्वरूपं यन्मनोवाचामगोचरम् ।
एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ॥ ४७० ॥
सत्समृद्धं स्वतःसिद्धं शुद्धं बुद्धमनीदृशम् ।
एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ॥ ४७१ ॥

निरस्तरागा विनिरस्तभोगाः शांताः सुदांता यतयो महांतः ।
विज्ञाय तत्त्वं परमेतदंते प्राप्ताः परां निर्वृतिमात्मयोगात् ॥ ४७२ ॥
भवानपीदं परतत्त्वमात्मनः स्वरूपमानंदघनं विचार्य ।
विधूय मोहं स्वमनःप्रकल्पितं मुक्तः कृतार्थो भवतु प्रबुद्धः ॥ ४७३ ॥
समाधिना साधु विनिश्चलात्मना पश्यात्मतत्त्वं स्फुटबोधचक्षुषा ।
निःसंशयं सम्यगवेक्षितश्चेच्छ्रुतः पदार्थो न पुनर्विकल्पते ॥ ४७४ ॥
स्वस्याविद्याबंधसंबंधमोक्षात्सत्यज्ञानानंदरूपात्मलब्धौ ।
शास्त्रं युक्तिर्देशिकोक्तिः प्रमाणं चांतःसिद्धा स्वानुभूतिः प्रमाणम् ॥ ४७५ ॥

बंधो मोक्षश्च तृप्तिश्च चिंतारोग्यक्षुधादयः ।
स्वेनैव वेद्या यज्ज्ञानं परेषामानुमानिकम् ॥ ४७६ ॥

तटस्थिता बोधयंति गुरवः श्रुतयो यथा ।
प्रज्ञयैव तरेद्विद्वानीश्वरानुगृहीतया ॥ ४७७ ॥

स्वानुभूत्या स्वयं ज्ञात्वा स्वमात्मानमखंडितम् ।
संसिद्धः संमुखं तिष्ठेन्निर्विकल्पात्मनात्मनि ॥ ४७८ ॥

वेदांतसिद्धांतनिरुक्तिरेषा ब्रह्मैव जीवः सकलं जगच्च ।
अखंडरूपस्थितिरेव मोक्षो ब्रह्माद्वितीयं श्रुतयः प्रमाणम् ॥ ४७९ ॥

इति गुरुवचनाच्छ्रुतिप्रमाणात्परमवगम्य सतत्त्वमात्मयुक्त्या ।
प्रशमितकरणः समाहितात्मा क्वचिदचलाकृतिरात्मनिष्ठितोऽभूत् ॥४८०॥

कंचित्कालं समाधाय परे ब्रह्मणि मानसम् ।
उत्थाय परमानंदादिदं वचनमब्रवीत् ॥ ४८१ ॥

बुद्धिर्विनष्टा गलिता प्रवृत्तिर्ब्रह्मात्मनोरेकतयाधिगत्या ।
इदं न जानेऽप्यनिदं न जाने किंवा कियद्वा सुखमस्त्यपारम् ४८२

वाचा वक्तुमशक्यमेव मनसा मंतुं न वा शक्यते
स्वानंदामृतपूरपूरितपरब्रह्मांबुधेर्वैभवम् ।
अंभोराशिविशीर्णवार्षिकशिलाभावं भजन्मे मनो
यस्यांशांशलवे विलीनमधुनानंदात्मना निर्वृतम् ॥ ४८३ ॥

क्व गतं केन वा नीतं कुत्र लीनमिदं जगत् ।
अधुनैव मया दृष्टं नास्ति किं महदद्भुतम् ॥ ४८४ ॥

किं हेयं किमुपादेयं किमन्यत्किं विलक्षणम् ।
अखंडानंदपीयूषपूर्णे ब्रह्ममहार्णवे ॥ ४८५ ॥

न किंचिदत्र पश्यामि न शृणोमि न वेद्म्यहम् ।
स्वात्मनैव सदानंदरूपेणास्मि विलक्षणः ॥ ४८६ ॥

नमो नमस्ते गुरवे महात्मने विमुक्तसंगाय सदुत्तमाय ।
नित्याद्वयानंदरसस्वरूपिणे भूम्ने सदापारदयांबुधाम्ने ॥ ४८७ ॥

यत्कटाक्षशशिसांद्रचंद्रिकापातधूतभवतापजश्रमः ।

प्राप्तवानहमखंडवैभवानंदमात्मपदमक्षयं क्षणात् ॥ ४८८ ॥

धन्योऽहं कृतकृत्योऽहं विमुक्तोऽहं भवग्रहात् ।
नित्यानंदस्वरूपोऽहं पूर्णोऽहं तदनुग्रहात् ॥ ४८९ ॥

असंगोऽहमनंगोऽहमलिंगोऽहमभंगुरः ।
प्रशांतोऽहमनंतोऽहममलोऽहं चिरंतनः ॥ ४९० ॥

अकर्ताहमभोक्ताहमविकारोऽहमक्रियः ।
शुद्धबोधस्वरूपोऽहं केवलोऽहं सदाशिवः ॥ ४९१ ॥

द्रष्टुः श्रोतुर्वक्तुः कर्तुर्भोक्तुर्विभिन्न एवाहम् ।
नित्यनिरंतरनिष्क्रियनिःसीमासंगपूर्णबोधात्मा ॥ ४९२ ॥

नाहमिदं नाहमदोऽप्युभयोरवभासकं परं शुद्धम् ।
बाह्याभ्यंतरशून्यं पूर्णं ब्रह्माद्वितीयमेवाहम् ॥ ४९३ ॥

निरुपममनादितत्त्वं त्वमहमिदमद इति कल्पनादूरम् ।
नित्यानंदैकरसं सत्यं ब्रह्माद्वितीयमेवाहम् ॥ ४९४ ॥

नारायणोऽहं नरकांतकोऽहं पुरांतकोऽहं पुरुषोऽहमीशः ।
अखंडबोधोऽहमशेषसाक्षी निरीश्वरोऽहं निरहं च निर्ममः ॥ ४९५ ॥

सर्वेषु भूतेष्वहमेव संस्थितो ज्ञानात्मनांतर्बहिराश्रयः सन् ।
भोक्ता च भोग्यं स्वयमेव सर्वं यद्यत्पृथग्दृष्टमिदंतया पुरा ॥ ४९६ ॥

मय्यखंडसुखांभोधौ बहुधा विश्ववीचयः ।
उत्पद्यंते विलीयंते मायामारुतविभ्रमात् ॥ ४९७ ॥

स्थूलादिभावा मयि कल्पिता भ्रमादारोपिता नु स्फुरणेन लोकैः ।
काले यथा कल्पकवत्सरायनर्त्वादयो निष्कलनिर्विकल्पे ॥४९८॥

आरोपितं नाश्रयदूषकं भवेत्कदापि मूढैर्मतिदोषदूषितैः ।
नार्द्रीकरोत्यूषरभूमिभागं मरीचिकावारिमहाप्रवाहः ॥ ४९९ ॥

आकाशवल्लेपविदूरगोऽहमादित्यवद्भास्यविलक्षणोऽहम् ।
अहार्यवन्नित्यविनिश्चलोऽहमंभोधिवत्पारविवर्जितोऽहम् ॥ ५०० ॥

न मे देहेन संबंधो मेघेनेव विहायसः ।
अतः कुतो मे तद्धर्मा जाग्रत्स्वप्नसुषुप्तयः ॥ ५०१ ॥

उपाधिरायाति स एव गच्छति स एव कर्माणि करोति भुंक्ते ।
स एव जीर्यन्म्रियते सदाहं कुलाद्रिवन्निश्चल एव संस्थितः ॥ ५०२ ॥

न मे प्रवृत्तिर्न च मे निवृत्तिः सदैकरूपस्य निरंशकस्य ।
एकात्मको यो निबिडो निरंतरो व्योमेव पूर्णः स कथं नु चेष्टते ॥ ५०३॥

पुण्यानि पापानि निरिंद्रियस्य निश्चेतसो निर्विकृतेर्निराकृतेः ।
कुतो ममाखंडसुखानुभूतेर्ब्रूते ह्यनन्वागतमित्यपि श्रुतिः ॥ ५०४ ॥

छायया स्पृष्टमुष्णं वा शीतं वा सुष्ठु दुष्ठु वा ।
न स्पृशत्येव यत्किंचित्पुरुषं तद्विलक्षणम् ॥ ५०५ ॥

न साक्षिणं साक्ष्यधर्माः संस्पृशंति विलक्षणम् ।
अविकारमुदासीनं गृहधर्माः प्रदीपवत् ।
देहेंद्रियमनोधर्मा नैवात्मानं स्पृशन्त्यहो ॥ ५०६ ॥

रवेर्यथा कर्मणि साक्षिभावो वह्नेर्यथा दाहनियामकत्वम् ।
रज्जोर्यथारोपितवस्तुसंगस्तथैव कूटस्थचिदात्मनो मे ॥ ५०७ ॥

कर्तापि वा कारयितापि नाहं भोक्तापि वा भोजयितापि नाहम् ।
द्रष्टापि वा दर्शयितापि नाहं सोऽहं स्वयंज्योतिरनीदृगात्मा ॥ ५०८ ॥

चलत्युपाधौ प्रतिबिंबलौल्यमौपाधिकं मूढधियो नयंति ।
स्वबिंबभूतं रविवद्विनिष्क्रियं कर्तास्मि भोक्तास्मि हतोऽस्मि हेति ॥ ५०९

जले वापि स्थले वापि लुठत्येष जडात्मकः ।
नाहं विलिप्ये तद्धर्मैर्घटधर्मैर्नभो यथा ॥ ५१० ॥

कर्तृत्वभोक्तृत्वखलत्वमत्तताजडत्वबद्धत्वविमुक्ततादयः ।
बुद्धेर्विकल्पा न तु संति वस्तुतः स्वस्मिन्परे ब्रह्मणि केवलेऽद्वये ॥५११॥

संतु विहाराः प्रकृतेर्दशधा शतधा सहस्रधा वापि ।
किं मेऽसंगचितेस्तैर्न घनः क्वचिदंबरं स्पृशति ॥ ५१२ ॥

अव्यक्तादि स्थूलपर्यंतमेतद्विश्वं यत्राभासमात्रं प्रतीतम् ।
व्योमप्रख्यं सूक्ष्ममाद्यंतहीनं ब्रह्माद्वैतं यत्तदेवाहमस्मि ॥ ५१३॥
सर्वाधारं सर्ववस्तुप्रकाशं सर्वाकारं सर्वगं सर्वशून्यम् ।
नित्यं शुद्धं निश्चलं निर्विकल्पं ब्रह्माद्वैतं यत्तदेवाहमस्मि ॥ ५१४ ॥
यत्प्रत्यस्ताशेषमायाविशेषं प्रत्यग्रूपं प्रत्ययागम्यमानम् ।
सत्यज्ञानानंतमानंदरूपं ब्रह्माद्वैतं यत्तदेवाहमस्मि ॥ ५१५ ॥
निष्क्रियोऽस्म्यविकारोऽस्मि निष्कलोऽस्मि निराकृतिः ।
निर्विकल्पोऽस्मि नित्योऽस्मि निरालंबोऽस्मि निर्द्वयः ॥ ५१६ ॥
सर्वात्मकोऽहं सर्वोऽहं सर्वातीतोऽहमद्वयः ।
केवलाखंडबोधोऽहमानंदोऽहं निरंतरः ॥ ५१७ ॥
स्वाराज्यसाम्राज्यविभूतिरेषा भवत्कृपाश्रीमहिमप्रसादात् ।
प्राप्ता मया श्रीगुरवे महात्मने नमो नमस्तेऽस्तु पुनर्नमोऽस्तु ॥ ५१८ ॥
महास्वप्ने मायाकृतजनिजरामृत्युगहने
भ्रमंतं क्लिश्यंतं बहुलतरतापैरनुदिनम् ।
अहंकारव्याघ्रव्यथितमिममत्यंतकृपया
प्रबोध्य प्रस्वापात्परमवितवान्मामसि गुरो ॥ ५१९ ॥
नमस्तस्मै सदेकस्मै कस्मैचिन्महसे नमः ।
यदेतद्विश्वरूपेण राजते गुरुराज ते ॥ ५२० ॥
इति नतमवलोक्य शिष्यवर्यं समधिगतात्मसुखं प्रबुद्धतत्त्वम् ।
प्रमुदितहृदयः स देशिकेंद्रः पुनरिदमाह वचः परं महात्मा ॥ ५२१ ॥
ब्रह्मप्रत्ययसंततिर्जगदतो ब्रह्मैव सत्सर्वतः
पश्याध्यात्मदृशा प्रशांतमनसा सर्वास्ववस्थास्वपि ।
रूपादन्यदवेक्षितं किमभितश्चक्षुष्मतां दृश्यते
तद्वद्ब्रह्मविदः सतः किमपरं बुद्धेर्विहारास्पदम् ॥ ५२२ ॥
कस्तां परानंदरसानुभूतिमुत्सृज्य शून्येषु रमेत विद्वान् ।

चंद्रे महाह्लादिनि दीप्यमाने चित्रेंदुमालोकयितुं क इच्छेत् ५२३

असत्पदार्थानुभवे न किंचिन्न ह्यस्ति तृप्तिर्न च दुःखहानिः ।
तदद्वयानंदरसानुभूत्या तृप्तः सुखं तिष्ठ सदात्मनिष्ठया ॥ ५२४ ॥

स्वमेव सर्वथा पश्यन्मन्यमानः स्वमद्वयम् ।
स्वानंदमनुभुंजानः कालं नय महामते ॥ ५२५ ॥

अखंडबोधात्मनि निर्विकल्पे विकल्पनं व्योम्नि पुरः प्रकल्पनम् ।
तदद्वयानंदमयात्मना सदा शांतिं परामेत्य भजस्व मौनम् ॥ ५२६ ॥

तूष्णीमवस्था परमोपशांतिर्बुद्धेरसत्कल्पविकल्पहेतोः ।
ब्रह्मात्मना ब्रह्मविदो महात्मनो यत्राद्वयानंदसुखं निरंतरम् ॥ ५२७ ॥

नास्ति निर्वासनान्मौनात्परं सुखकृदुत्तमम् ।
विज्ञातात्मस्वरूपस्य स्वानंदरसपायिनः ॥५२८॥

गच्छंस्तिष्ठन्नुपविशञ्छयानो वान्यथापि वा ।
यथेच्छं च वसेद्विद्वानात्मारामः सदा मुनिः ॥५२९॥

न देशकालासनदिग्यमादिलक्ष्याद्यपेक्षा प्रतिबद्धवृत्तेः ।
संसिद्धतत्त्वस्य महात्मनोऽस्ति स्ववेदने का नियमाद्यपेक्षा ॥५३०॥

घटोऽयमिति विज्ञातुं नियमः कोऽन्वपेक्ष्यते ।
विना प्रमाणसुष्ठुत्वं यस्मिन्सति पदार्थधीः ॥ ५३१ ॥

अयमात्मा नित्यसिद्धः प्रमाणे सति भासते ।
न देशं नापि वा कालं न शुद्धिं वाप्यपेक्षते ॥ ५३२ ॥

देवदत्तोऽहमित्येतद्विज्ञानं निरपेक्षकम् ।
तद्वद्ब्रह्मविदोऽप्यस्य ब्रह्माहमिति वेदनम् ॥ ५३३ ॥

भानुनेव जगत्सर्वं भासते यस्य तेजसा ।
अनात्मकमसत्तुच्छं किं नु तस्यावभासकम् ॥ ५३४ ॥

वेदशास्त्रपुराणानि भूतानि सकलान्यपि ।
येनार्थवंति तं किं नु विज्ञातारं प्रकाशयेत् ॥ ५३५ ॥

एष स्वयंज्योतिरनंतशक्तिरात्माऽप्रमेयः सकलानुभूतिः ।
यमेव विज्ञाय विमुक्तबंधो जयत्ययं ब्रह्मविदुत्तमोत्तमः ॥ ५३६ ॥
न खिद्यते नो विषयैः प्रमोदते न सज्यते नापि विरज्यते च ।
स्वस्मिन्सदा क्रीडति नंदति स्वयं निरंतरानंदरसेन तृप्तः ॥ ५३७ ॥

क्षुधां देहव्यथां त्यक्त्वा बालः क्रीडति वस्तुनि ।
तथैव विद्वान् रमते निर्ममो निरहं सुखी ॥ ५३८ ॥

चिंताशून्यमदैन्यभैक्षमशनं पानं सरिद्वारिषु
स्वातंत्र्येण निरंकुशा स्थितिरभीर्निद्रा श्मशाने वने ।
वस्त्रं क्षालनशोषणादिरहितं दिग्वास्तु शय्या मही
संचारो निगमांतवीथिषु विदां क्रीडा परे ब्रह्मणि ॥ ५३९ ॥

विमानमालंब्य शरीरमेतद्भुनक्त्यशेषान्विषयानुपस्थितान् ।
परेच्छया बालवदात्मवेत्ता योऽव्यक्तलिंगोऽननुषक्तबाह्यः ॥ ५४० ॥
दिगंबरो वापि च सांबरो वा त्वगंबरो वापि चिदंबरस्थः ।
उन्मत्तवद्वापि च बालवद्वा पिशाचवद्वापि चरत्यवन्याम् ॥ ५४१ ॥

कामान्नीष्कामरूपी संश्चरत्येकचरो मुनिः ।
स्वात्मनैव सदा तुष्टः स्वयं सर्वात्मना स्थितः ॥ ५४२ ॥

क्वचिन्मूढो विद्वान्क्वचिदपि महाराजविभवः ।
क्वचिद्भ्रांतः सौम्यः क्वचिदजगराचारकलितः ।
क्वचित्पात्रीभूतः क्वचिदवमतः क्वाप्यविदित-
श्चरत्येवं प्राज्ञः सततपरमानंदसुखितः ॥ ५४३ ॥

निर्धनोऽपि सदा तुष्टोऽप्यसहायो महाबलः ।
नित्यतृप्तोऽप्यभुंजानोऽप्यसमः समदर्शनः ॥ ५४४ ॥

अपि कुर्वन्नकुर्वाणश्चाभोक्ता फलभोग्यपि ।
शरीर्यप्यशरीर्येष परिच्छिन्नोऽपि सर्वगः ॥ ५४५ ॥

अशरीरं सदा संतमिमं ब्रह्मविदं क्वचित् ।

प्रियाप्रिये न स्पृशतस्तथैव च शुभाशुभे ॥ ५४६ ॥
स्थूलादिसंबंधवतोऽभिमानिनः सुखं च दुःखं च शुभाशुभे च ।
विध्वस्तबंधस्य सदात्मनो मुनेः कुतः शुभं वाप्यशुभं फलं वा ॥ ५४७ ॥
तमसा ग्रस्तवद्भानादग्रस्तोऽपि रविर्जनैः ।
ग्रस्त इत्युच्यते भ्रांत्या ह्यज्ञात्वा वस्तुलक्षणम् ॥ ५४८ ॥
तद्वद्देहादिबंधेभ्यो विमुक्तं ब्रह्मवित्तमम् ।
पश्यंति देहिवन्मूढाः शरीराभासदर्शनात् ॥ ५४९ ॥
अहिर्निर्ल्वयनीं वाऽयं मुक्त्वा देहं तु तिष्ठति ।
इतस्ततश्चाल्यमानो यत्किंचित्प्राणवायुना ॥ ५५० ॥
स्रोतसा नीयते दारु यथा निम्नोन्नतस्थलम् ।
दैवेन नीयते देहो यथाकालोपभुक्तिषु ॥ ५५१ ॥
प्रारब्धकर्मपरिकल्पितवासनाभिः
संसारिवच्चरति भुक्तिषु मुक्तदेहः ।
सिद्धः स्वयं वसति साक्षिवदत्र तूष्णीं
चक्रस्य मूलमिव कल्पविकल्पशून्यः ॥ ५५२ ॥
नैवेंद्रियाणि विषयेषु नियुंक्त एष
नैवापयुंक्त उपदर्शनलक्षणस्थः ।
नैव क्रियाफलमपीषदवेक्षते स
स्वानंदसांद्ररसपानसुमत्तचित्तः ॥ ५५३ ॥
लक्ष्यालक्ष्यगतिं त्यक्त्वा यस्तिष्ठेत्केवलात्मना ।
शिव एव स्वयं साक्षादयं ब्रह्मविदुत्तमः ॥ ५५४ ॥
जीवन्नेव सदा मुक्तः कृतार्थो ब्रह्मवित्तमः ।
उपाधिनाशाद्ब्रह्मैव सद्ब्रह्माप्येति निर्द्वयम् ॥ ५५५ ॥
शैलूषो वेषसद्भावाभावयोश्च यथा पुमान् ।
तथैव ब्रह्मविच्छ्रेष्ठः सदा ब्रह्मैव नापरः ॥ ५५६ ॥

यत्र क्वापि विशीर्णं सत्पर्णमिव तरोर्वपुः पतनात् ।
ब्रह्मीभूतस्य यतेः प्रागेव हि तच्चिदग्निना दग्धम् ॥ ५५७ ॥
सदात्मनि ब्रह्मणि तिष्ठतो मुनेः पूर्णाद्वयानंदमयात्मना सदा ।
न देशकालाद्युचितप्रतीक्षा त्वङ्मांसविट्पिंडविसर्जनाय ॥ ५५८ ॥
देहस्य मोक्षो नो मोक्षो न दंडस्य कमंडलोः ।
अविद्याहृदयग्रंथिमोक्षो मोक्षो यतस्ततः ॥ ५५९ ॥
कुल्यायामथ नद्यां वा शिवक्षेत्रेऽपि चत्वरे ।
पर्णं पतति चेत्तेन तरोः किं नु शुभाशुभम् ॥ ५६० ॥
पत्रस्य पुष्पस्य फलस्य नाशवद्देहेंद्रियप्राणधियां विनाशः ।
नैवात्मनः स्वस्य सदात्मकस्यानंदाकृतेर्वृक्षवदास्त चैषः ॥ ५६१ ॥
प्रज्ञानघन इत्यात्मलक्षणं सत्यसूचकम् ।
अनूद्यौपाधिकस्यैव कथयंति विनाशनम् ॥ ५६२ ॥
अविनाशी वा अरेऽयमात्मेति श्रुतिरात्मनः ।
प्रब्रवीत्यविनाशित्वं विनश्यत्सु विकारिषु ॥ ५६३ ॥
पाषाणवृक्षतृणधान्यकटांबराद्या
दग्धा भवंति हि मृदेव यथा तथैव ।
देहेंद्रियासुमनआदि समस्तदृश्यं
ज्ञानाग्निदग्धमुपयाति परात्मभावम् ॥ ५६४ ॥
विलक्षणं यथा ध्वांतं लीयते भानुतेजसि ।
तथैव सकलं दृश्यं ब्रह्मणि प्रविलीयते ॥ ५६५ ॥
घटे नष्टे यथा व्योम व्योमैव भवति स्फुटम् ।
तथैवोपाधिविलये ब्रह्मैव ब्रह्मवित्स्वयम् ॥ ५६६ ॥
क्षीरं क्षीरे यथा क्षिप्तं तैलं तैले जलं जले ।
संयुक्तमेकतां याति तथात्मन्यात्मविन्मुनिः ॥ ५६७ ॥
एवं विदेहकैवल्यं सन्मात्रत्वमखंडितम् ।

ब्रह्मभावं प्रपद्यैष यतिर्नावर्तते पुनः ॥ ५६८ ॥
सदात्मैकत्वविज्ञानदग्धाविद्यादिवर्ष्मणः ।
अमुष्य ब्रह्मभूतत्वाद्ब्रह्मणः कुत उद्भवः ॥ ५६९ ॥
मायाक्लृप्तौ बंधमोक्षौ न स्तः स्वात्मनि वस्तुतः ।
यथा रज्जौ निष्क्रियायां सर्पाभासविनिर्गमौ ॥ ५७० ॥
नावृतेः सदसत्त्वाभ्यां वक्तव्ये बंधमोक्षणे ।
नावृतिर्ब्रह्मणः काचिदन्याभावादनावृतम् ।
यद्यस्त्यद्वैतहानिः स्याद्द्वैतं नो सहते श्रुतिः ॥ ५७१ ॥
बंधं च मोक्षं च मृषैव मूढा बुद्धेर्गुणं वस्तुनि कल्पयंति ।
दृगावृतिं मेघकृतां यथा रवौ यतोऽद्वयासंगचिदेकमक्षरम् ॥ ५७२ ॥
अस्तीति प्रत्ययो यश्च यश्च नास्तीति वस्तुनि ।
बुद्धेरेव गुणावेतौ न तु नित्यस्य वस्तुनः ॥ ५७३ ॥
अतस्तौ मायया क्लृप्तौ बंधमोक्षौ न चात्मनि ।
निष्कले निष्क्रिये शांते निरवद्ये निरंजने ॥
अद्वितीये परे तत्त्वे व्योमवत्कल्पना कुतः ॥ ५७४ ॥
न निरोधो न चोत्पत्तिर्न बंधो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ ५७५ ॥
सकलनिगमचूडास्वांतसिद्धांतरूपं
परमिदमतिगुह्यं दर्शितं ते मयाद्य ।
अपगतकलिदोषं कामनिर्मुक्तबुद्धिं
स्वसुतवदसकृत्त्वा भावयित्वा मुमुक्षुम् ॥ ५७६ ॥
इति श्रुत्वा गुरोर्वाक्यं प्रश्रयेण कृतानतिः ।
स तेन समनुज्ञातो ययौ निर्मुक्तबंधनः ॥ ५७७ ॥
गुरुरेवं सदानंदसिंधौ निर्मग्नमानसः ।
पावयन्वसुधां सर्वां विचचार निरंतरम् ॥ ५७८ ॥

इत्याचार्यस्य शिष्यस्य संवादेनात्मलक्षणम् ।
निरूपितं मुमुक्षूणां सुखबोधोपपत्तये ॥ ५७९ ॥
हितमिममुपदेशमाद्रियंतां विहितनिरस्तसमस्तचित्तदोषाः ।
भवसुखविरताः प्रशांतचित्ताः श्रुतिरसिका यतयो मुमुक्षवो ये ॥ ८० ॥
संसाराध्वनि तापभानुकिरणप्रोद्भूतदाहव्यथा-
खिन्नानां जलकांक्षया मरुभुवि श्रांत्या परिभ्राम्यताम् ।
अत्यासन्नसुधांबुधिं सुखकरं ब्रह्माद्वयं दर्शय-
न्त्येषा शंकरभारती विजयते निर्वाणसंदायिनी ॥ ५८१ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ विवेकचूडामणिः समाप्तः ॥